॥ श्रीजिनाय नमः ॥

(सान्वयगूर्जरभाषांतरसहितंच)

# ॥ श्री वासुपूज्यचरित्रं ॥ भाग त्रीजो ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित गुजराती भाषांतर करनारतथा छपावी प्रसिद्धकरनार–पंडित श्रावक हीरालाल हंसराज

(अन्वय तथा भाषांतरना प्रसिद्धकर्ताए सर्व हक स्वाधीन राख्या छे,)

संवत् १९८४ सने १९२८ वीर संवत् २४५४

किंमत रु. ७–०–०

॥ श्रीजिनाय नमः ॥
॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥
( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ अथ श्री वासुपूज्यचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा भाषांतर करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा. )

( भाग त्रीजो )

इति श्रीरतिसारस्य सारपुण्यप्रथां कथाम् । निशम्याभून्मुदां सद्म पद्मोत्तरमहीश्वरः ॥ १ ॥

अन्वयः—इति श्रीरतिसारस्य सार पुण्य प्रथां कथां निशम्य पद्मोत्तर महीश्वरः मुदां सद्म अभूत्. ॥ १ ॥

अर्थः-एवीरीते श्रीरतिसारभगवाननी उत्तम पुण्यने विस्तारनारी कथा सांभळीने ते पद्मोत्तर राजा हर्षना स्थानरूप थया. ॥१॥

पात्रेण पार्थिवादिभ्यो दानं नादीयते क्वचित् । नित्यं शीलन्तु शीलं तु सर्वसाधारणं बुधाः ॥ २ ॥

अन्वयः—पात्रेण क्वचित् पार्थिवादिभ्यः दानं न आदीयते, बुधाः सर्वं साधारणं शीलं तु नित्यं शीलंतु. ॥ २ ॥

अर्थः—सुपात्र ( साधु ) क्यांयें पण राजाआदिकोपासेथी दान लेइ शकतो नथी, माटे विचक्षणोए सर्व माटे साधारण एवुं शील हमेशां पालवुं. ॥ २ ॥

धत्ते यः सततोन्मीलं शीलं लीलारविन्दवत् । स कामं मुक्तिकामिन्या कुतुकेन विलोक्यते ॥ ३ ॥

अन्वयः—यः लीला अरविंदवत् सतत उन्मीलं शीलं धत्ते, सः कामं मुक्तिकामिन्या कुतुकेन विलोक्यते. ॥ ३ ॥

अर्थः–जे माणस क्रीडा करवाना कमलनीपेठे हमेशां विकस्वर थयेलां शीलने धारण करे छे, तेनी सामे आनंदपूर्वक मुक्तिरूपी स्त्री आश्चर्यथी जोइ रहे छे. ॥ २ ॥

अतश्चिन्तामणिप्रायसुकृतप्राप्तये जनः । विधत्ते शुद्धधीः शीलसुधाम्भोनिधिमज्जनम् ॥ ४ ॥

अन्वयः—अतः शुद्धधीः जनः चिंतामणि प्राय सुकृत प्राप्तये शील सुधा अंभोनिधि मज्जनं विधत्ते. ॥ ४ ॥

अर्थः—माटे निर्मल बुद्धिवाळो माणस चिंतामणिरत्नसरखां पुण्यनी प्राप्तिमाटे शीलरूपी अमृतना महासागरमां ( डुबकी मारी) स्नान करे छे. ॥ ४ ॥

अघनाशाद्भुतच्छाये शीले नीलेतरा गुणाः । समायान्ति समुत्ताला मराला इव पल्वले ॥ ५ ॥

अन्वयः—अध नाश अद्भुतच्छाये (पक्षे-अ घनाशा अद्भुतच्छाये) पल्वले नीलेतराः समुत्तालाः मरालाः इव, शीले गुणाः समायांति. ॥ ५ ॥

अर्थः—पापोना नाशथी आश्चर्यजनक शोभावाळा ( पक्षे-वरसादनी गरजविनाना अने मनोहर छायावाळा ) तळावमां निर्मल (पक्षे-श्वेत रंगवाळा) अने आनंद कल्लोल करता, एवा हंसोनीपेठे शीलनी अंदर उत्तमगुणो एकठा थाय छे. ॥ ५ ॥

जनानुरक्तिर्भुक्तिश्च मुक्तिश्च नृषु शीलतः । सनत्कुमारशृङ्गारसुन्दर्योरिव जायते ॥ ६ ॥

अन्वयः-शीलतः सनत्कुमार शृंगारसुंदर्योः इव नृषु जन अनुरक्तिः, च भुक्तिः, च मुक्तिः जायते. ॥ ६ ॥

अर्थः-शील पाळवाथी सनत्कुमार अने शृंगारसुंदरीनीपेठे माणसोने लोकोतरफनो प्रेम, भोगो अने मोक्ष प्राप्त थाय छे. ॥६॥

तद्यथा सत्पथाध्वन्यधन्यपौरालिमालिनी । श्रीकान्तेति पुरी जम्बूद्वीपे भारतवर्षभूः ॥ ७ ॥

अन्वयः—तद्यथा-जंबूद्वीपे भारतवर्ष भूः सत्पथ अध्वन्य धन्य पौर आलि मालिनी श्रीकांता इति पुरी. ॥ ७ ॥

अर्थः—ते आ प्रमाणे-जंबूद्वीपमां (आवेला) भरतक्षेत्रमां सन्मार्गे चालनारा भाग्यशाली नागरिकोनी श्रेणिथी शोभिती थयेली, एवी श्रीकांतानामनी नगरी छे. ॥ ७ ॥

इह सिंह इति स्वाम्यग्लपितद्युपतिर्नृपः । बभूव शुभ्रकीर्तिस्रग्राजिराजितदिग्गणः ॥ ८ ॥

अन्वयः—स्वाम्य ग्लपित द्युपतिः, शुभ्र कीर्ति स्रक् राजि राजित दिग् गणः इह सिंहः इति नृपः बभूव. ॥ ८ ॥

अर्थः—अधिकारथी इंद्रने पण झांखो करनारो, तथा उज्ज्वल कीर्तिरूपी पुष्पमाळाओनी श्रेणिथी दिक्चक्रने शोभावनारो, ते नगरमां सिंहनामनो राजा हतो. ॥ ८ ॥

नित्यमुद्यद्गुणग्रामः कलाग्रहकृताग्रहः । सनत्कुमार इत्यासीत्कुमारस्तस्य कीर्तिभूः ॥ ९ ॥

अन्वयः-तस्य नित्यं उद्यत् गुण ग्रामः, कला ग्रह कृत आग्रहः, कीर्तिभूः सनत्कुमारः इति कुमारः आसीत्. ॥ ९ ॥

अर्थः—ते राजाने हमेशां उदय पामता गुणोना समूहवाळो, अने हुन्नर शिखवामाटेना आग्रहवाळो, तथा कीर्तिना स्थानरूप, एवो सनत्कुमारनामनो कुमार हतो. ॥ ९ ॥

अदूषणकणैर्लक्ष्यमाणस्तादृक्षलक्षणैः । सहोत्थैः स गुणै रेजे शरीरावयवैरिव ॥ १० ॥

अन्वयः-शरीर अवयवैः इव सह उत्थैः, अदूषणकणैः, तादृक्षलक्षणैः गुणैः लक्ष्यमाणः सः रेजे. ॥ १० ॥

अर्थः—शरीरना अवयवोनीपेठे जन्मसाथेज उत्पन्न थयेला, लेशमात्र दोषविनाना, तथा प्रत्यक्ष देखाता लक्षणोवाळा गुणोवडे ओळखातो एवो ते राजकुमार शोभतो हतो. ॥ १० ॥

उपदेशावधिक्लेशाद् गुरुतस्तस्य गृह्णतः । हृदि न स्खलितं चक्रुः खिला अप्यखिलाः कलाः ॥ ११ ॥

अन्वयः-उपदेश अवधि क्लेशात् गुरुतः गृह्णतः तस्य हृदि अखिलाः खिला कलाः अपि स्खलितं न चक्रुः. ॥ ११ ॥

अर्थः-फक्त उपदेशजेटलोज श्रम लेता एवा गुरुपासेथी शीखता एवा ते कुमारना हृदयमां सघळी अजाणी कळाओ पण अच-

कातो नहोती. (अर्थात् सघळी अजाणी कळाओ पण मुश्केली विनाज फक्त उपदेशथीज ते शीखीजतो हतो. ॥ ११ ॥

रूपं निशम्य निःसीम तस्य सीमन्तिनीजनैः । तदङ्गसङ्गि खुरलीरजो बहुमतं स्वतः ॥ १२ ॥

अन्वयः—तस्य निःसीम रूपं निशम्य सीमंतिनीजनैः स्वतः तदंग संगि खुरली रजः बहुमतं. ॥ १२ ॥

अर्थः—तेनुं अपार रूप सांभळीने स्त्रीओ स्वाभाविकपणेज ते कुमारना शरीरनो संग करनारी कसरतना अखाडानी रजने पण धन्य मानवा लागी. ॥ १२ ॥

उरसि प्रेयसां कामचित्राभ्यासापदेशतः । अलिख्यत विदग्धाभिः स रहो विरहोदये ॥ १३ ॥

अन्वयः—प्रेयसां विरह उदये विदग्धाभिः कामचित्र अभ्यास अपदेशतः उरसि रहः सः अलिख्यत. ॥ १३ ॥

अर्थः—(पोताना) प्रियतमोनो विरह थतां चतुर स्त्रीओ कामदेवना चित्रनो अभ्यास करवाना मिषथी हृदयमां गुप्तपणे ते कुमारनुं चित्र दोरती हती. ॥ १३ ॥

तस्मिन्शरणसंप्राप्तप्राणभृद्वज्रपञ्जरे । दोर्दण्डमण्डलच्छायामीयुश्चापचराः शराः ॥ १४ ॥

अन्वयः—शरण संप्राप्त प्राणभृत् वज्रपंजरे तस्मिन् चापचराः शराः दोर्दंड मंडल च्छायां ईयुः. ॥ १४ ॥

अर्थः—शरणे आवेला प्राणीओनुं (रक्षण करवामां) वज्रपंजरसरखो ते कुमार होवाथी धनुषपरथी दोडतां बाणो भुजामंडलनी छायामां विश्राम लेवा लाग्यां. ॥ १४ ॥

सोऽन्यदा क्षणदामध्ये वध्यमानस्य विद्विषा । निद्राणश्चन्द्रशालायां रावं शुश्राव कस्यचित् ॥ १५ ॥

अन्वयः-अन्यदा क्षणदामध्ये चंद्रशालायां निद्राणः सः विद्विषा वध्यमानस्य कस्यचित् रावं शुश्राव. ॥ १५ ॥

अर्थः-एक दिवसे मध्यरात्रिए अगासीमां निद्राधीन थयेला एवा ते सनत्कुमारे, शत्रुवडे हणाता कोइक मनुष्यनो पोकार सांभळ्यो.

अथैष रभसभ्रश्यन्निद्रोन्मुद्रदृगीदृशम् । खे वचः सचमत्कारः कारुण्यमसृणोऽशृणोत् ॥ १६ ॥

अन्वयः-अथ रभस भ्रश्यत् निद्रा उन्मुद्र दृक्, सचमत्कारः, कारुण्य मसृणः एषः खे वचः अशृणोत्. ॥ १६ ॥

अर्थः—पछी अचानक जागी उठी आंखो उघाड्याबाद आश्चर्य पामेला तथा दयाथी कोमळ हृदयवाळा एवा ते कुमारे आकाशनी अंदर (नीचे मुजब) वचन सांभळ्युं. ॥ १६ ॥

दुःखितः परदुःखेन दीनानाथोद्धृतिक्षमः । अहो स क्वापि कोऽप्यस्ति यः पापात्पाति मामितः ॥ १७ ॥

अन्वयः-अहो ! पर दुःखेन दुःखितः, दीन अनाथ उध्धृति क्षमः, सः कः अपि क्व अपि अस्ति ? यः मां इतः पापात् पाति

अर्थः—अहो ! परना दुःखथी दुःखी थतो, तथा रंक अनाथोनो उद्धार करवामां समर्थ, एवो कोइ क्यांयें पण छे ! के जे मने आ पापीथी बचावे. ॥ १७ ॥

त्रिजगद्वीरजननीर्जननी येन सूनुना । हसत्यस्ति स कोऽपीह यः पापात्पाति मामितः ॥ १८ ॥

अन्वयः–येन सूनुना जननी त्रिजगत् वीर जननीः इसति, सः कः अपि इह अस्ति ? यः मां इतः पापात् पाति. ॥ १८ ॥
अर्थः—जे पुत्रनी माता त्रणे जगतना शूरवीरोनी माताओनी पण हांसी करे, एवो कोइ पण (पुरुष) अहीं छे? के जे मने आ पापीथी बचावे. ॥ १८ ॥

स्वजन्मतिथिनक्षत्रवारान्धैर्येण गर्वयन् । स कोऽप्यस्ति जगत्यस्मिन् यः पापात्पाति मामितः ॥ १९ ॥

अन्वयः–धैर्येण स्व जन्म तिथि नक्षत्र वारान् गर्वयन् सः कः अपि अस्मिन् जगति अस्ति ? यः मां इतः पापात् पाति.
अर्थः–धैर्यवडे पोताना जन्मना तिथि, नक्षत्र तथा वारने गर्वयुक्त करनारो, एवो कोइ पण (पुरुष) आ जगतमां हस्ती धरावे छे? के जे मने आ पापीथी बचावे. ॥ १९ ॥

प्रेमार्द्राभ्यः प्रियाभ्योऽपि ये प्रियां मन्वते युधम् । तन्मुख्यः कोऽपि किं नास्ति यः पापात्पाति मामितः

अन्वयः–प्रेम आर्द्राभ्यः प्रियाभ्यः अपि ये युधं प्रियां मन्वते, तन्मुख्यः किं कः अपि नास्ति ? यः मां इतः पापात् पाति.
अर्थः–प्रेमथी भींजायेली एवी (पोतानी) प्राणप्रिय स्त्रीओथी पण जेओ युद्धने प्रिय माने छे, तेओमां (पण) अग्रेसर एवो शुं कोइ पण (पुरुष) नथी? के जे मने आ पापीथी बचावे. ॥ २० ॥

हा हा हतो हतोऽहं मां त्रातुं कोऽपि न धावति । तदाकाशे धृतं कस्य सत्त्वेनेदं जगत्त्रयम् ॥ २१ ॥

अन्वयः–हा हा ! अहं हतः हतः, मां त्रातुं कः अपि न धावति, तत् कस्य सत्त्वेन इदं जगत् त्रयं आकाशे धृतं ? ॥ २१ ॥

अर्थः—हा! हा! मने मारी नाख्यो! मारी नाख्यो! मने बचाववाने कोइ पण दोडी आवतो नथी, तो पछी कोना बळथी आ त्रणे जगत् आकाशमां अधर रह्यां छे? ॥ २१ ॥

**विश्वे न सन्ति किं वीराः किं वा सन्तोऽपि निःकृपाः । किं वा बाधिर्यभाजस्ते क्रन्दार्तं यन्न पातिमाम्**

अन्वयः-किं विश्वे वीराः न संति? वा संतः अपि किं निःकृपाः? वा किं ते बाधिर्यभाजः? यत् क्रंदार्त्तं मां न पाति! ।२२।

अर्थः—शुं आ जगतमांथी शूरवीरो नाबूद थया? अथवा हयात छतां पण शुं निर्दय थया? के शुं तेओ बेहेरा थइ गया छे? के आटली बूमो मारी मरतां छतां पण मने (कोइ) बचावतुं नथी! ॥२२॥

**निशि निद्रान्ति चेन्मर्त्यास्तदमर्त्येष्वभूत्किमु । यत्तेऽपि शक्तिमन्तोऽपि न कृपां मयि कुर्वते ॥ २३ ॥**

अन्वयः-चेत् मर्त्याः निशि निद्रांति, तत् अमर्त्येषु किमु अभूत्? यत् शक्तिमंतः अपि ते मयि कृपां न कुर्वते! ॥ २३ ॥

अर्थः—कदाच मनुष्यो (तो) रात्रि होवाथी उंघता होशे, तोपण देवोने शुं थइ गयुं? के छती शक्तिए पण तेओ मारापर दया करता नथी! ॥ २३ ॥

**न मानवो न गन्धर्वो न गीर्वाणो न दानवः । कोऽप्यस्ति साहसी यो मां त्रायते हा हतोऽस्मि हा २४**

अन्वयः-साहसी कः अपि मानवः न, गंधर्वः न, गीर्वाणः न, दानवः न अस्ति, यः मां त्रायते, हा! हा! हतः अस्मि!

अर्थः—हिम्मतवान् एवो नथी कोइपण माणस, नथी गंधर्व, नथी देव, के नथी दानव, के जे मने बचावे, हाय! हाय!

हुं तो) मुओ पड्यो छुं ! ॥ २४ ॥

अथोच्चचञ्चद्रोमाञ्चश्चण्डोद्धूषितमूर्धजः । क्ष्मापस्य सूनुरुत्पश्यंश्चालयंश्चापमुत्थितः ॥ २५ ॥

अन्वयः—अथ उच्च चंचत् रोमांचः, चंड उध्धूषित मूर्धजः, उत्पश्यन्, चापं चालयन् क्ष्मापस्य सूनुः उत्थितः. ॥ २५ ॥

अर्थः—पछी उभा थयेल छे रोमांच जेना, अने भयंकर विखरायेला केशोवाळो, उंचुं जोतो, तथा धनुष्य हलावतो एवो ते राजकुमार उठ्यो. ॥ २५ ॥

विलक्षः खेचरं क्षोणिचारी रक्षितुमक्षमः । पक्षिणोऽपि क्षणं धन्यान्सोऽमन्यत खगामिनः ॥ २६ ॥

अन्वयः—खेचरं रक्षितुं अक्षमः विलक्षः क्षोणिचारी सः क्षणं खगामिनः पक्षिणः अपि धन्यान् अमन्यत. ॥ २६ ॥

अर्थः—आकाशमां चालता एवा ते माणसने बचाववाने असमर्थ थवाथी विलखो थयेलो पृथ्वीचारी ते कुमार क्षणवार तो आकाशमां गमन करनारा पक्षिओने पण धन्य मानवा लाग्यो. ॥ २६ ॥

त्रैलोक्येऽप्यस्ति न त्राता वध्यमानस्य ते मया । मा क्रन्दीर्म्रियमाणस्तदित्यभूत्खे पुनर्ध्वनिः ॥ २७ ॥

अन्वयः—मया वध्यमानस्य ते त्राता त्रैलोक्ये अपि न अस्ति, तत् म्रियमाणः मा आक्रंदीः, इति पुनः खेध्वनिः अभूत् ॥२७॥

अर्थः—मारावडे मरातो एवो जे तुं, तेने बचावनारो त्रण जगतमां पण (कोइ) नथी, माटे मरतोथको तुं (नाहक) बूमो न मार! एवीरीतनी पाछी आकाशमां वाणी थइ. ॥ २७ ॥

हन्तुः स्वरानुसारेण शरासारं ततः कृती । साक्षेपं दिवि चिक्षेप स शरण्यशिरोमणिः ॥ २८ ॥

अन्वयः—ततः कृती, शरण्य शिरोमणिः सः हंतुः स्वर अनुसारेण साक्षेपं दिवि शरासारं चिक्षेप. ॥ २८ ॥

अर्थः—पछी कृतज्ञ तथा शरण करवा लायकोनो सरदार एवो ते राजकुमार मारनारना अवाजने अनुसारें आक्षेप सहित आकाशमां बाणोनो वरसाद फेंकवा लाग्यो. ॥ २८ ॥

एको रिपुकृपाणेन प्रहतः प्रापतत्ततः । पुमान्कुमारनाराचताडितस्त्वपरः पुरः ॥ २९ ॥

अन्वयः—ततः रिपुकृपाणेन प्रहतः एकः पुमान् पुरः प्रापतत्, अपरः तु कुमार नाराच ताडितः. ॥ २९ ॥

अर्थः—पछी शत्रुनी तलवारथी घायल थयेलो एक पुरुष (त्यां) आगळ पड्यो, अने बीजो पण ते राजकुमारना बाणवडे घायल थइने पड्यो. ॥ २९ ॥

अथ तौ मूर्छितौ वीक्ष्य विस्मिते भूपतेः सुते । उत्ततार तडित्तारा कापि ताराध्वतो वधूः ॥ ३० ॥

अन्वयः—अथ तौ मूर्छितौ वीक्ष्य भूपतेः सुते विस्मिते तारा अध्वतः तडित् तारा का अपि वधूः उत्ततार. ॥ ३० ॥

अर्थः—पछी तेओ बन्नेने मूर्छित थयेला जोइने ते राजकुमार आश्चर्य पामते छते आकाशमांथी वीजळीसरखी तेजस्वी कोइक स्त्री (त्यां) उतरी आवी. ॥ ३० ॥

द्विषद्विखण्डिताङ्गस्य पुरुषस्य पुरः स्थिता । चक्रन्द सा रसाधिक्यविकसत्करुणस्वरा ॥ ३१ ॥

अन्वयः-रस आधिक्य विकसत् करुण स्वरा सा द्विषत् विखंडित अंगस्य पुरुषस्य पुरः स्थिता चक्रंद. ॥ ३१ ॥

अर्थः—रसना अधिकपणाथी विस्तार पामतो छे करुण स्वर जेणीनो, एवी ते स्त्री, शत्रुथी घायल थयेल छे शरीर जेनुं, एवा ते पुरुषनी पासे बेसीने विलाप करवा लागी. ॥ ३१ ॥

किं चरित्रमिदं चित्रमिति पृष्टाथ तेन सा । ऊचेऽधरोष्ठं सिञ्चन्ती शुचा शुष्यन्तमश्रुभिः ॥ ३२ ॥

अन्वयः—अथ इदं चित्रं चरित्रं किं ? इति तेन पृष्टा सा शुचा शुष्यंतं अधरोष्ठं अश्रुभिः सिंचंती ऊचे. ॥ २ ॥

अर्थः—पछी आ आश्चर्यकारक वृत्तांत शुं छे ? एम ते राजकुमारे पूछवाथी ते स्त्री शोकथी सुकाइ जता (पोताना) बन्ने होठोने आंसुओवडे सिंचतीथकी बोलवा लागी के, ॥ ३२ ॥

शोणरत्नप्रभापूरसिन्दूरचयचित्रितः । गिरिर्वैताढ्य इत्यस्ति श्रीलीलारौप्यहस्तिवत् ॥ ३३ ॥

अन्वयः—शोण रत्न प्रभापूर सिंदूर चय चित्रितः, श्रीलीला रौप्य हस्तिवत् वैताढ्यः इति गिरिः अस्ति. ॥ ३३ ॥

अर्थः-लाल रत्नोनी कांतिना सहूहरूपी सिंदूरना समूहवडे चित्रेलो, लक्ष्मीदेवीने रमवाना रूपाना हाथीसरखो वैताढ्यनामे पर्वत छे.

तस्योपरि परिस्पन्दलक्ष्मीमन्दमरुत्पुरी । विशालाख्या विशालाक्षीमुखापास्तेन्दुरस्ति पूः ॥ ३४ ॥

अन्वयः—तस्य उपरि परिस्पंदत् लक्ष्मी मंद मरुत्पुरी, विशाल अक्षि मुख अपास्त इंदुः विशालाख्या पूः अस्ति. ॥ ३४ ॥

अर्थः—ते पर्वत उपर उभराइ जती लक्ष्मीथी निस्तेज थइ छे देवनगरी जेनाथी, तथा विस्तीर्ण नेत्रोवाळी स्त्रीना मुखथी तिरस्कार पामेल छे चंद्र ज्यां एवी विशालानामनी नगरी छे. ॥ ३४ ॥

तत्रैष रत्नचूडाख्यो राजा खेलति खेचरः । अस्य प्रियास्मि कश्मीरदेवीति प्रीतिभाजनम् ॥ ३५ ॥

अन्वयः—तत्र एषः रत्नचूड आख्यः खेचरः राजा खेलति, अस्य प्रीति भाजनं कश्मीरदेवी इति प्रिया अस्मि. ॥ ३५ ॥

अर्थः–ते नगरीमां आ रत्नचूडनामनो विद्याधर राजातरीके क्रीडा करे छे, अने तेनी प्रीतिना पात्ररूप कश्मीरदेवीनामे हुं पत्नीछुं

दुष्टश्चन्द्रपुरीभर्ता चन्द्राख्योऽयं तु खेचरः । मया स्मररहस्यानि याचमानोऽवमानितः ॥ ३६ ॥

अन्वयः—अयं तु चंद्रपुरी भर्ता चंद्राख्यः दुष्टः खेचरः स्मर रहस्यानि याचमानः मया अवमानितः. ॥ ३६ ॥

अर्थः—अने आ चंद्रपुरीनामनी नगरीनो राजा चंद्रनामनो दुष्ट विद्याधर छे, तेणे मारीसाथे भोग विलासनी मागणी करतां में तेनो तिरस्कार कर्यो छे. ॥ ३६ ॥

रविणा कौमुदीवेन्दोस्ततः पत्युः समीपतः । तेजःक्रूरेण शूरेण हृताहममुनाधुना ॥ ३७ ॥

अन्वयः—तेजः क्रूरेण शूरेण रविणा इन्दोः कौमुदी इव ततः पत्युः समीपतः अहं अधुना अमुना हृता. ॥ ३७ ॥

अर्थः–तेजथी क्रूर, तथा बळवान एवो सूर्य चंद्रपासेथी जेम चांदनीने हरी ले, तेम ( मारा ) ते पतिपासेथी मने हमणांज आ

(दुष्टे) हरी लीधी छे. ॥ ३७ ॥

अवस्थेयं कृता तेन मद्भर्तुरनुधावतः । दुश्चरित्रफलं वीर त्वयास्येदं च दर्शितम् ॥ ३८ ॥

अन्वयः—अनुधावतः मद्भर्तुः तेन इयं अवस्था कृता, च (हे) वीर! अस्य त्वया इदं दुश्चरित्र फलं दर्शितं ॥ ३८ ॥

अर्थः—पाछळ दोडता एवा मारा स्वामीना तेणे आवा हाल कर्या छे, परंतु हे वीर! ते (दुष्टने) तमोए आ (तेना) दुराचरणनुं फळ देखाड्युं (चखाड्युं) छे. ॥ ३८ ॥

इत्युक्त्वेयं कुमाराय प्रियप्राणितकांक्षिणी । आदिक्षदौषधीः सद्यो मूर्छाशतकृतच्छिदः ॥ ३९ ॥

अन्वयः—इति उक्त्वा प्रिय प्राणित कांक्षिणी इयं मूर्छा शत कृत च्छिदः औषधीः सद्यः कुमाराय आदिक्षत्. ॥ ३९ ॥

अर्थः—एम कहीने पोताना स्वामिने जीवाडवानी इच्छाथी तेणीए, सेंकडो मूर्छाओनो जेथी विनाश थयो छे, एवी औषधीओ तुरत ते राजकुमारने जाहेर करी. ॥ ३९ ॥

अथैनमोषधिस्यन्दैरमन्दीकुरुते स्म सः । कुमारः कैरवस्तोममिव सोमः करोत्करैः ॥ ४० ॥

अन्वयः—अथ सोमः कर उत्करैः कैरव स्तोमं इव, सः कुमारः ओषधिस्यंदैः एनं अमंदी कुरुते स्म. ॥ ४० ॥

अर्थः—पछी चंद्र (पोताना) किरणोना समूहोवडे जेम चंद्रविकासी कमलोना समूहने जागृत करे, तेम ते कुमारे ते औषधीना टीपांओथी ते रत्नचूड विद्याधरने साजो करी जागृत् कर्यो. ॥ ४० ॥

ततः कृपावतारेण कुमारेणौषधीरसैः । चन्द्रोऽप्यजीवि कारुण्यं महतां प्रहतान्तरम् ॥ ४१ ॥

अन्वयः-ततः कृपा अवतारेण कुमारेण औषधी रसैः चंद्रः अपि अजीवि, महतां कारुण्यं प्रहत अंतरं.. ॥ ४१ ॥

अर्थः—पछी दयाना अवताररूप एवा ते कुमारे औषधीओना रसथी ( ते ) चंद्रविद्याधरने पण जीवाड्यो, केमके महानपुरुषोनी दया ( कंइं ) अंतर राखती नथी. ॥ ४१ ॥

ततो वर्णैर्विवेकाब्धिमौक्तिकैर्ग्रथितां गिरम् । कुमारो हृदि चन्द्रस्य हारहृद्यामिति न्यधात् ॥४२॥

अन्वयः-ततः कुमारः विवेक अब्धि मौक्तिकैः वर्णैः ग्रथितां हारहृद्यां इति गिरं चंद्रस्य हृदि न्यधात्. ॥ ४२ ॥

अर्थः—पछी ( ते ) कुमारे विवेकरूपी समुद्रमांथी ( निकळेलां ) मोतीओसरखा अक्षरोवडे गुंथेली मनोहर हारजेवी आवी रीतनी वाणी ( ते ) चंद्रविद्याधरना हृदयमां पहेरावी. ( तेने समजाव्यो ) ॥ ४२ ॥

न दत्ते निर्वृतिं हन्ति पुण्यं पुष्णाति पातकम् । अहो हृतं परस्त्रैणं कुथितान्नमिवाहृतम् ॥ ४३ ॥

अन्वयः-अहो ! परस्त्रैणं हृतं आहृतं कुथित अन्नं इव, निर्वृतिं न दत्ते, पुण्यं हंति, पातकं पुष्णाति. ॥ ४३ ॥

अर्थः-अहो ! परस्त्रीनुं हरण, खाधेलां सडेलां अनाजनीपेठे सुख आपतुं नथी, पुण्यनो नाश करे छे, तथा पापोनी पुष्टि करे छे.

परस्त्रीपरिरम्भेण समारम्भः सुखस्य यः । शीताम्भःस्नपनेनेव ज्वरदाहव्यपोहनम् ॥ ४४ ॥

अन्वयः-पर स्त्री परिरंभेण यः सुखस्य समारंभः, शीत अंभः स्नपनेन ज्वर दाह व्यपोहनं इव. ॥ ४४ ॥

अर्थः-परस्त्रीना आलिंगनवडे जे सुखनो प्रारंभ करवो, ते ठंडा पाणीना स्नानथी तावनी बळतराने दूर करवा जेवुं छे. ॥ ४४ ॥

परनार्यो विभावर्य इवाकीर्तितमःप्रदाः । अदृष्टसत्पथान्पुंसः क्षिपन्ति नरकावटे ॥ ४५ ॥

अन्वयः—परनार्यः विभावर्यः इव अकीर्ति तमः प्रदाः, अदृष्ट सत्पथान् पुंसः नरक अवटे क्षिपंति. ॥ ४५ ॥

अर्थः—परस्त्रीओ रात्रिनीपेठे अपकीर्तिरूपी अंधकारने आपनारी छे, (तथा तेथी) सत्य मार्गने नही देखता एवा पुरुषोने तेओ नरकरूपी खाडामां पटकी पाडे छे. ॥ ४५ ॥

घाताधःकारबन्धार्तिर्मदान्धैर्बुध्यते न कैः । व्रजद्भिः परनारीषु वारीष्विव मतङ्गजैः ॥ ४६ ॥

अन्वयः—वारीषु इव मतंगजैः, परनारीषु व्रजद्भिः कैः मदांधैः घात अधःकार बंधार्तिः न बुध्यते ? ॥ ४६ ॥

अर्थः—वारी एटले पकडवामाटेना खाडामां फसाइ पडता हाथीओनीपेठे परस्त्रीप्रते गमन करता एवा कया मदांध पुरुषो घात, तिरस्कार, तथा बंधननुं दुःख नथी अनुभवता ? (अर्थात् सर्व कोइ अनुभवेज छे.) ॥ ४६ ॥

ततः स्वदारसंतुष्टिः पुण्यपुष्टिरसायनम् । सेवनीया सदा पुम्भिः गुणकुम्भिमहाटवी ॥ ४७ ॥

अन्वयः-ततः पुंभिः सदा पुण्य पुष्टि रसायनं, गुण कुंभि महाटवी स्वदार संतुष्टिः सेवनीया. ॥ ४७ ॥

अर्थः—माटे पुरुषोए हमेशां पुण्योने पोषवामां रसायन सरखो, तथा गुणोरूपी हाथीओने रहेवामाटे विशाल वनसरखो पोतानी

स्त्रीथीज संतोष राखवो. ॥ ४७ ॥

तच्चन्द्र चन्द्रचारूणां यशसां जलदोपमम् । परनारीपरीरम्भारम्भं निर्दम्भधीस्त्यज ॥ ४८ ॥

अन्वयः-ततः (हे) चंद्र! निर्दंभधीः चंद्र चारूणां यशसां जलद उपमं पर नारी परिरंभ आरंभं त्यज ? ॥ ४८ ॥

अर्थः—माटे हे चंद्र! निष्कपट बुद्धि धारण करीने. चंद्रसरखा उज्ज्वल यशने आच्छादित करवाने मेघसरखो, एवो परस्त्रीना आलिंगनमाटेनो प्रयास तुं छोडी दे ? ॥ ४८ ॥

समं च रत्नचूडेन चूडारत्न खचारिणाम् । मा स्म पापघटाजन्मवत्सरं मत्सरं कृथाः ॥ ४९ ॥

अन्वयः—च (हे) खचारिणां चूडारत्न! रत्नचूडेन समं पाप घटा जन्म वत्सरं मत्सरं मा कृथाः स्म. ॥ ४९ ॥

अर्थः-वळी विद्याधरोमां शिरोमणि एवा हे चंद्र! आ रत्नचूडनी साथे, पापोना समूहोने उत्पन्न करवामां वर्षसरखो द्वेष (पण) न कर ? ॥ ४९ ॥

रत्नचूड त्वयाप्येतच्चेतनीयं यतोऽभवत् । प्रत्यक्षं वां परवधूचौर्यमात्सर्ययोः फलम् ॥ ५० ॥

अन्वयः-(हे) रत्नचूड! त्वया अपि एतत् चेतनीयं, यतः परवधू चौर्य मात्सर्ययोः फलं वां प्रत्यक्षं अभवत् ॥ ५० ॥

अर्थः-हे रत्नचूड! तारे पण आथी चेतवानुं छे, केमके परस्त्रीना हरणनुं तथा द्वेषनुं फळ तमोए आ प्रत्यक्ष अनुभव्युं छे. ॥५०॥

इति वाचं प्रतिज्ञाय तौ प्रीतौ खेचरौ मिथः । सनत्कुमारतेजोऽग्निसाक्षिकं सख्यमीयतुः ॥ ५१ ॥

अन्वयः-इति वाचं प्रतिज्ञाय प्रीतौ तौ खेचरौ सनत्कुमार तेजः अग्नि साक्षिकं मिथः सख्यं ईयतुः. ॥ ५१ ॥

अर्थः—एवीरीतनां वचननी प्रतिज्ञा करीने खुशी थयेला ते बन्ने विद्याधरो ते सनत्कुमारना तेजरूपी अग्निनी साक्षीए परस्पर मित्राइमां जोडाया. ॥ ५१ ॥

अदृश्यीकरणीं शिक्षागुरवे गुरुदक्षिणाम् । दत्वा भूपभुवे विद्यां तौ गतौ द्यां तया समम् ॥ ५२ ॥

अन्वयः-शिक्षा गुरवे भूपभुवे अदृश्यीकरणीं विद्यां गुरु दक्षिणां दत्वा तौ तया समं द्यां गतौ. ॥ ५२ ॥

अर्थः-(पोताने) शिखामण आपनारा गुरुसरखा ते राजकुमारने अदृश्य करनारी विद्या गुरुदक्षिणातरीके आपीने ते बन्ने विद्याधरो ते स्त्रीसहित आकाशमां चाल्या गया. ॥ ५२ ॥

कदाप्यथ सदःसद्मभूषणं सिंहभूभुजम् । अत्यातुरश्चरः कश्चिदेत्य विज्ञप्तवानदः ॥ ५३ ॥

अन्वयः-अथ कदापि अति आतुरः कश्चित् चरः सदः सद्म भूषणं सिंहभूभुजं एत्य अदः विज्ञप्तवान्. ॥ ५३ ॥

अर्थः-पछी एकदिवसे अति उत्कंठित थयेलो कोइक बातमीदार सभास्थानने शोभावनारा, एवा सिंहराजानीपासे आवीने आवीरीते विनंति करवा लाग्यो. ॥ ५३ ॥

स्वामिञ्जगज्जयारम्भजृम्भमाणप्रयाणकः । भूरिभूरमणच्छेदमेदस्विप्रसरन्मदः ॥ ५४ ॥

नृपो रिपुद्विपक्रूरकेशरी शूरकेशरी । त्वां प्रत्युपैति काम्पील्यपुरायतनदेवता ॥ ५५ ॥ युग्मम् ॥

अन्वयः—( हे ) स्वामिन् ! जगत् जय आरंभ जृंभमाण प्रयाणकः, भूरि भू रमण च्छेद मेदस्वि प्रसरत् मदः ॥ ५४ ॥ रिपु द्विप क्रूर केशरी, कांपील्यपुर आयतन देवता शूरकेशरी नृपः त्वांप्रति उपैति. ॥ ५५ ॥ युग्मं ॥

अर्थः—हे स्वामी ! जगतने जीतवाना प्रारंभमाटे प्रसरतुं छे प्रयाण जेनुं, तथा घणा राजाओनो विनाश करवाथी अति मदोन्मत्त थयेलो, ॥ ५४ ॥ शत्रुरूपी हाथीओने (विदारवामां) प्रचंड केसरीसिंहसरखो, अने कांपील्यपुररूपी मंदिरनो देव, एवो शूरकेशरी नामनो राजा आपनापर चडी आवे छे. ॥ ५५ ॥ युग्मं ॥

इति वाक्श्रुतिसक्रोधः स्कन्धावाराय दुर्धरः । रथसिन्धुरगन्धर्वभटाध्यक्षान्नृपोऽदिशत् ॥ ५६ ॥

अन्वयः–इति वाक् श्रुति सक्रोधः दुर्धरः नृपः रथ सिंधुर गंधर्व भट अध्यक्षान् स्कंधावाराय आदिशत्. ॥ ५६ ॥

अर्थः—एवीरीतनुं वचन सांभळवाथी क्रोधातुर थयेला, तथा एकदम आवेशमां आवेला ते सिंहराजाए रथ, हाथी, घोडा तथा सुभटोना सेनापतिओने (सैन्य तैयार करी) छावणी नाखवामाटे हुकम कर्यो. ॥ ५६ ॥

प्रयाणकम्बुनादेषु काममम्बरचुम्बिषु । सज्जमानासु सेनासु भटेषूत्कटकेषु च ॥ ५७ ॥

तां मत्वा जयिनीं यात्रामेत्य तत्राधिकोद्यमः । कुमारो मस्तकन्यस्तहस्तः क्ष्मापं व्यजिज्ञपत् ।५८।युग्मम्।

अन्वयः—प्रयाण कंबु नादेषु कामं अंबर चुंबिषु, सेनासु सज्जमानासु, च भटेषु उत्कटेषु, ॥ ५७ ॥तां यात्रां जयिनीं मत्वा,

तत्र अधिक उद्यमः कुमारः एत्य मस्तक न्यस्त हस्तः क्ष्मापं व्यजिज्ञपत्. ॥ ५८ ॥ युग्मं ॥

अर्थः—प्रयाणमाटेना शंखना अवाजो आकाशमां खूब फेलावा लाग्या, सैन्यो तैयार थवा लाग्यां, अने सुभटो ( युद्धमाटे ) तलपापड थइ रह्या, ॥ ५७ ॥ (ते वखते) ते प्रयाणयात्राने जयवंत जाणीने, तेमाटे अधिक उत्साहवाळो ते सनत्कुमार (त्यां) आवी, मस्तकपर हाथ जोडी राजाने विनंति करवा लाग्यो के, ॥ ५८ ॥ युग्मं ॥

**तात मा तव तत्रारिकीटेऽस्तु कटकस्पृहा । किं तृणोत्पाटने कुम्भी कुण्डलीकुरुते करम् ॥ ५९ ॥**

अन्वयः—(हे) तात ! तत्र अरि कीटे तव कटक स्पृहा मा अस्तु, किं तृण उत्पाटने कुंभी करं कुंडलीकुरुते ? ॥ ५९ ॥

अर्थः—हे पिताजी ! कीडासरखा ते शत्रुसाथे आपे लडवानी इच्छा न करवी, केमके शुं तणखलुं उपाडवामाटे हाथी ( जोरथी प्रहार करवामाटे ) पोतानी सुंढनो गोळाकार करे छे ? ॥ ५९ ॥

**अहमेव करिष्यामि तज्जयं त्वत्प्रसादतः । हन्त्यनूरुस्तमःपूरं किं न सूरप्रभावतः ॥ ६० ॥**

अन्वयः—त्वत्प्रसादतः अहं एव तत् जयं करिष्यामि, सूरप्रभावतः अनूरुः किं तमः पूरं न हंति ? ॥ ६० ॥

अर्थः—आपनी कृपाथी हुंज ते शत्रुनो जय करीश, ( केमके ) सूर्यना माहात्म्यथी ( सूर्यनो सारथि ) अरुण शुं अंधकारना समूहनो विनाश करतो नथी ? ॥ ६० ॥

**कटकं यदि तत्रापि शत्रावातनुषे स्वयम् । बलौ वा बलशात्रौ वा किं रोषिणि करोषि तत् ॥ ६१ ॥**

अन्वयः-यदि तत्र शत्रौ अपि स्वयं कटकं आतनुषे, तत् बलौ वा बलशत्रौ वा रोषिणि किं करोषि? ॥ ६१ ॥

अर्थः—ज्यारे आ आवा शत्रुसाथे पण आप पोते संग्राम करशो, तो पछी दानवेंद्र अथवा देवेंद्र शत्रु थइ ज्यारे लडवा आवशे, त्यारे शुं करशो? ॥ ६१ ॥

अथाह पृथिवीनाथो नीतिप्रीतिसखीं गिरम्। रोमाञ्चितवपुः सूनोः शौर्येण विनयेन च ॥ ६२ ॥

अन्वयः-अथ सूनोः शौर्येण, च विनयेन रोमांचितवपुः पृथिवीनाथः नीति प्रीति सखीं गिरं आह. ॥ ६२ ॥

अर्थः-पछी पुत्रना पराक्रम तथा विनयथी रोमांचित शरीरवाळा राजा नीतिनी प्रियसखीसरखी वाणी बोल्या के, ॥ ६२ ॥

लीलासु लालितं शूरास्तनयं नयशालिनः। पुरः कुर्वन्ति भोगेषु रणाभोगेषु पृष्ठतः ॥ ६३ ॥

अन्वयः-नयशालिनः शूराः लीलासु लालितं तनयं भोगेषु पुरः कुर्वंति, रण आभोगेषु पृष्ठतः. ॥ ६३ ॥

अर्थः-न्यायवंत शूरवीरो लाड लडावेला पुत्रने (इंद्रियोना) भोगो भोगववामाटे अगाडी करे छे, अने लडाइ वखते पाछळ राखे छे.

हृदयानन्दनं दक्षा नन्दनं कुलदीपकम्। न प्रभञ्जनभूयिष्ठे भासयन्ति रणाङ्गणे ॥ ६४ ॥

अन्वयः—दक्षाः हृदय आनंदनं, कुल दीपकं नंदनं प्रभंजन भूयिष्ठे रणांगणे न भासयंति. ॥ ६४ ॥

अर्थः—चतुर माणसो मनमां हर्ष उपजावनारा, तथा कुलने दीपाववामां दीपकसरखा पुत्रने अत्यंत छेदनभेदनवाळा (पक्षे-घणा पवनवाळा) रणसंग्रामनी अंदर प्रगट करता नथी. ॥ ६४ ॥

कुलालंकृतये रत्नं भूरिभाग्यार्जितं सुतम् । कः क्षिपत्यसिकल्लोलैरपारे समरार्णवे ॥ ६५ ॥

अन्वयः-भूरि भाग्य अर्जितं, कुल अलंकृतये रत्नं सुतं असि कल्लोलैः अपारे समर अर्णवे कः क्षिपति ? ॥ ६५ ॥

अर्थः—घणा सद्भाग्योवडे प्राप्त थयेला, अने वंशने दीपाववामाटे रत्नसरखा पुत्रने, तलवारोरूपी मोजांओवडे अपार एवा संग्रामरूपी महासागरमां कोण फेंकी दे ? ॥ ६५ ॥

वत्स मत्सरिणो जेतुं यामि तेनाहमाहवे । जगरो नगरस्यास्य भवान्भवितुमर्हति ॥ ६६ ॥

अन्वयः—तेन (हे) वत्स ! मत्सरिणः जेतुं अहं आहवे यामि, भवान् अस्य नगरस्य जगरः भवितुं अर्हति. ॥ ६६ ॥

अर्थः—माटे हे पुत्र ! (ते) शत्रुओने जीतवा माटे हुं रणसंग्राममां जाउं छुं, अने तुं आ नगरनुं बख्तर तरीके ( रक्षण करवाने ) लायक छे. ॥ ६६ ॥

अथाकिरद्गिरं गौरीमास्यगौरांशुकौमुदीम् । कुमारः कैरवाकारवीरमानसमोदिनीम् ॥ ६७ ॥

अन्वयः—-अथ कुमारः आस्य गौर अंशु कौमुदीं, कैरव आकार वीर मानस मोदिनीं गिरं अकिरत्. ॥ ६७ ॥

अर्थः-पछी ते सनत्कुमार (पोताना) मुखरूपी चंद्रमांथी ( निकळेली) चांदनी सरखी, अने चंद्रविकासी कमलसरखा शूरवीरोना हृदयने आनंद उपजावनारी वाणी बोल्यो के, ॥ ६७ ॥

त एव तात सत्पुत्राः स्वं मत्वा कवचक्षमम् । ये निर्बन्धात्पितुः स्कन्धादुद्धरन्ति धुरं युधः ॥ ६८ ॥

अन्वयः-हे तात! ये स्वं कवच क्षमं मत्वा निर्बंधात् पितुः स्कंधात् युधः धुरं उद्धरंति, ते एव सत्पुत्राः. ॥ ६८॥
अर्थः—-हे पिताजी! जे पुत्रो पोताने बख्तरसरखो समर्थ मानीने आग्रहथी पण पितानी खांधपरथी युद्धनो भार (धोंसरुं) उतारे छे, तेओज उत्तम पुत्रो (कहेवाय छे.) ॥ ६८ ॥

**शूरास्तानेव मन्यन्ते नन्दनान्कुलदीपकान्। येषां रिपुस्त्रीनिःश्वासैस्तेजः प्रत्युत वर्धते ॥ ६९ ॥**

अन्वयः-शूराः तान् एव नंदनान् कुलदीपकान् मन्यंते, येषां तेजः प्रत्युत रिपु स्त्री निःश्वासैः वर्धते. ॥ ६९ ॥
अर्थः-शूरवीरो तेज पुत्रोने कुलमां दीपकसमान माने छे, के जेओनुं तेज उलटुं शत्रुओनी स्त्रीओना निःश्वासोथी वृद्धि पामे छे.

**कुलालङ्काररत्नानि कुमारानुर्वरावराः। उत्तेजयन्ति युद्धोर्व्यामसिपट्टघटाजुषि ॥ ७० ॥**

अन्वयः-उर्वरावराः कुल अलंकार रत्नानि कुमारान् असि पट्टघटा जुषि युद्ध ऊर्व्यां उत्तेजयंति. ॥ ७० ॥
अर्थः-राजाओ तो वंशना आभूषणरूप रत्नसरखा कुमारोने तलवारोरूपी सराणोना समूहवाळी युद्धभूमिपर जवा माटे उत्तेजन आपे छे, (चळकाटवाळा बनावे छे.) ॥ ७० ॥

**तत्प्रभो मां दिश द्वेषिपेषायेति ब्रुवन्नसौ। अग्रहीदग्रहस्ताभ्यां चरणौ धरणीशितुः ॥ ७१ ॥**

अन्वयः—तत् हे प्रभो! मां द्वेषिपेषाय दिश? इति ब्रुवन् असौ अग्रहस्ताभ्यां धरणी ईशितुः चरणौ अग्रहीत्. ॥ ७१ ॥
अर्थः—माटे हे स्वामी! मने ते शत्रुनो विनाश करवा माटे आज्ञा आपो? एम कहेता ते राजकुमारे (पोताना) बन्ने हाथोवडे

राजाना चरणो ग्रहण कर्या. ॥ ७१ ॥

उत्थाप्य परिरभ्याथ प्रमोदी मेदिनीपतिः । कुमारमसुहृद्वीरवैराय स्वैरमैरयत् ॥ ७२ ॥

अन्वयः-अथ प्रमोदी मेदिनीपतिः कुमारं उत्थाप्य परिरभ्य असुहृद् वीर वैराय स्वयं ऐरयत्. ॥ ७२ ॥

अर्थः-पछी खुशी थयेलो एवो (ते) सिंह राजा सनत्कुमारने उठाडीने, तथा आलिंगन आपीने ते शत्रुवीर साथे लडवा जवाने पोतेज प्रेरणा करवा लाग्यो. ॥ ७२ ॥

कृतमाङ्गलिकः सोऽपि रेणुगोपितगोपतिः । चचालोच्चचमूपूरः शूरकेशरिणं प्रति ॥ ७३ ॥

अन्वयः—कृत मांगलिकः, रेणु गोपित गोपतिः उच्च चमू पूरः सः अपि शूरकेशरिणं प्रति चचाल. ॥ ७३ ॥

अर्थः—करेल छे मांगलिक जेणे एवो, तथा रजथी आच्छादित करेल छे सूर्यने जेणे एवो, तथा उछळतो छे सैन्यनो समूह जेनो एवो ते सनत्कुमार पण ( ते ) शूरकेशरीनी सामे चाल्यो. ॥ ७३ ॥

भ्रश्यन्तीं निजभारेण भुवं धर्तुमिवाग्रतः । प्रलम्बमानहस्ताग्रैश्चलितं बलिभिर्द्विपैः ॥ ७४ ॥

अन्वयः—निजभारेण भ्रश्यंतीं भुवं धर्तुं इव प्रलंबमान हस्त अग्रैः बलिभिः द्विपैः अग्रतः चलितं. ॥ ७४ ॥

अर्थः—पोताना भारथी पडीजती पृथ्वीने धारण करवा माटे जाणे लंबावेला छे सुंढना अग्र भागो जेओए, एवा बलवान हाथीओ मोखरे चालवा लाग्या. ॥ ७४ ॥

मा भूदस्मत्खुरापातैः खण्डशः क्षोणिमण्डलम् । इत्युड्डीन इवाचालीद्व्योम्ना हयसमुच्चयः ॥ ७५ ॥

अन्वयः—अस्मत् खुरापातैः क्षोणि मंडलं खंडशः माभूत्, इति व्योम्ना उड्डीनः इव हय समुच्चयः अचालीत्. ॥ ७५ ॥

अर्थः–अमारी खरीओना आघातथी पृथ्वीमंडलना टुकडा न थाओ ? एम विचारीने जाणे आकाशमां अधर उडतो होय नही ! एम घोडाओनो समूह चालवा लाग्यो. ॥ ७५ ॥

नर्तयन्रथिनां कीर्तिं मूर्तां केतनकैतवात् । पवनानामनुप्रासः प्रासरद्रथसंचयः ॥ ७६ ॥

अन्वयः—केतन कैतवात् रथिनां मूर्तां कीर्तिं नर्तयन् पवनानां अनुप्रासः रथसंचयः प्रासरत् ॥ ७६ ॥

अर्थः—( वळी फरकती ) पताकाओना मिषथी रथमां बेठेला सुभटोनी देहधारी कीर्तिने नचावतो, तथा पवननी हरिफाइ करतो एवो रथोनो समूह चालवा लाग्यो. ॥ ७६ ॥

हृदा कवलयन्तः खं ज्वलयन्तो दृशा दिशः । प्रतस्थिरे स्थिरागोलं लोलयन्तो गतैर्भटाः ॥ ७७ ॥

अन्वयः—भटाः हृदा खं कवलयंतः, दृशा दिशः ज्वलयंतः, गतैः स्थिरा गोलं लोलयंतः प्रतस्थिरे। ॥ ७७ ॥

अर्थः–( वळी ) सुभटो हृदयथी आकाशने कोळीओ करी जता, आंखोथी दिशाओने बाळता, तथा गतिथी पृथ्वीना गोळाने हचमचावता चालवा लाग्या. ॥ ७७ ॥

इत्युपान्तं रिपोराप कुमारः सारसैनिकः । क्वचिदप्यकृतस्थानैः प्रस्थानैः कैश्चिदप्ययम् ॥ ७८ ॥

अन्वयः–इति सार सैनिकः अयं कुमारः क्वचित् अपि अकृत स्थानैः कैश्चित् प्रस्थानैः रिपोः उपांतं आप. ॥ ७८ ॥

अर्थः—एवीरीते शूरवीर सुभटोवाळो आ सनत्कुमार क्यांयें पण मुकाम कर्या विना केटलांक प्रस्थानोए शत्रुनी नजीक आवी पहोंच्यो. ॥ ७८ ॥

**अथान्तरच्चरद्दूतस्यूतक्रोधविरोधयोः । तयोः सेनाद्वयं जज्ञे संपरायपरायणम् ॥ ७९ ॥**

अन्वयः–अथ अंतर चरत् दूत स्यूत क्रोध विरोधयोः तयोः सेना द्वयं संपराय परायणं जज्ञे. ॥ ७९ ॥

अर्थः–पछी वच्चे आवता जता दूतोथी संधायेल छे क्रोध अने वैर जेओनां एवा ते बन्नेनी बन्ने सेनाओ युद्ध करवा माटे तैयार थइ

**आसदत्सादिनं सादी निषादी च निषादिनम् । रथिनं च रथी पत्तिः पत्तिं च प्रोद्धतक्रुधः ॥ ८० ॥**

अन्वयः–प्रोद्धत क्रुधः सादी सादिनं, च निषादी निषादिनं, च रथी रथिनं, च पत्तिः पत्तिं आसदत्. ॥ ८० ॥

अर्थः—उछळेला क्रोधथी गजस्वार गजस्वारनी सामे, घोडेस्वार घोडेस्वारनी सामे, रथस्वार रथस्वारनी सामे, तथा पाळो पाळानी सामे गोठवाइ गया. ॥ ८० ॥

**असहिष्णुः परतेजस्तेजस्वी वीरसंचयः । खण्डयामास चण्डांशुभासः काण्डौघमण्डपैः ॥ ८१ ॥**

अन्वयः–परतेजः असहिष्णुः वीर संचयः कांड ओघ मंडपैः चंड अंशु भासः खंडयामास. ॥ ८१ ॥

अर्थः—शत्रुना तेजने सहन नही करनारो एवो सुभटोनो समूह बाणोना समूहना मंडपोवडे सूर्यनी कांतिने पण आच्छादित

करवा लाग्यो. ॥ ८१ ॥

जयश्रीपरिरम्भाय स्फायमानमनोरथैः । हृष्यद्भिर्वीक्षितं वीरै रणे रेणुमयं तमः ॥ ८२ ॥

अन्वयः-स्फायमान मनोरथैः वीरैः जय श्री परिरंभाय रणे रेणुमयं तमः हृष्यद्भिः वीक्षितं. ॥ ८२ ॥

अर्थः-विस्तीर्ण मनोरथोवाळा सुभटो जयलक्ष्मीने आलिंगवामाटे रणसंग्राममां धूलिथी थयेला अंधकारने आनंदपूर्वक जोवा लाग्या.

सहुंकारैरथोदारैः प्रहारैर्बलशालिनाम् । आलम्भि समरारम्भः स्फूर्जत्तूर्यहतिश्रुतिः ॥ ८३ ॥

अन्वयः—अथ बलशालिनां सहुंकारैः उदारैः प्रहारैः स्फूर्जत्तूर्य हति श्रुतिः समर आरंभः आलंभि. ॥ ८३ ॥

अर्थः-पछी बलवान सुभटोना हुंकारसहित गाढ प्रहारोवडे, जोरथी वागतां वाजित्रोना नादोवाळो रणसंग्रामनो प्रारंभ थयो.

स्फुलिङ्गैः स्फुरितं शत्रुशस्त्रापातेन वर्मसु । राज्ञां निस्तुष्यमाणस्य प्रतापस्य तुषैरिव ॥ ८४ ॥

अन्वयः—राज्ञां निस्तुष्यमाणस्य प्रतापस्य तुषैः इव वर्मसु शत्रु शस्त्र आपातेन स्फुलिंगैः स्फुरितं. ॥ ८४ ॥

अर्थः—राजाओना निर्दोष थता प्रतापना जाणे फोतरां उडी जतां होय नही! तेम बख्तरोपर (अथडाता) शत्रुओना शस्त्रोना आघातथी (उत्पन्न थयेला) तणखाओ उडवा लाग्या. ॥ ८४ ॥

द्रवीभूयेव सूरेण रक्तपूरेण रेणवः । समरे समनीयन्त तमःसमरुचः शमम् ॥ ८५ ॥

अन्वयः—समरे द्रवीभूय इव शूरेण तमःसम रुचः रेणवः रक्तपूरेण शमं समनीयंत. ॥ ८५ ॥
अर्थः-रणसंग्राममां जाणे (पोते) ओगळीने होय नही! तेम शूरवीरे अंधकारसरखी कांतिवाळी रजने रुधिरना समूहवडे शांत करी.

**अश्वः कोऽप्यश्ववारं स्वं पतितं वर्मभारितम्। उपविश्यैनमारोप्य समुत्तस्थौ मृधोद्धतः ॥ ८६ ॥**

अन्वयः-मृधोद्धतः कः अपि अश्वः पतितं स्वं अश्ववारं वर्मभारितं (मत्वा) उपविश्य,, एनं आरोप्य समुत्तस्थौ. ॥ ८६ ॥
अर्थः—रणसंग्राममां अति उत्साहवाळो कोइक घोडो तो पडी गयेला एवा पोताना स्वारने बख्तरना भारवाळो जाणीने, (पोते) बेशीने (तथा तेम करी पोतानी पीठपर) ते स्वारने बेसाडीने पाछो (पोते उभो थइ गयो) ॥ ८६ ॥

**स्फुटितोदरनिर्यातः कश्चिदन्त्रावलीर्बली। धावन्नतुत्रुटद्वाजी खुरलग्ना लता इव ॥ ८७ ॥**

अन्वयः—कश्चित् बली वाजी धावन् स्फुटित उदर निर्यातः अंत्रावलीः खुरलग्नाः लताः इव अतुत्रुटत्. ॥ ८७ ॥
अर्थः-कोइक बलवान घोडो दोडतोथको (पोताना) फुटेलां उदरमांथी निकळेली आंतरडांओनी श्रेणिओने खरीओमां वळगेली वेलडीओनीपेठे तोडी नाखवा लाग्यो. ॥ ८७ ॥

**दष्टौष्ठो भृकुटीभीमः क्ष्मापातिन्यपि मूर्धनि। धृत्वा दोर्भ्यां रिपुं कश्चित्पतन्नश्वादपातयत् ॥ ८८ ॥**

अन्वयः-दष्टौष्ठः भृकुटी भीमः कश्चित् मूर्धनि क्ष्मा पातिनि अपि पतन् रिपुं दोर्भ्यां धृत्वा अश्वात् अपातयत्. ॥ ८८ ॥

अर्थः—(दांतोवडे) होठोने करडतो, तथा भयंकर भृकुटीवाळो कोइक घोडेस्वार ( पोतानुं ) मस्तक ( कपाइने ) पृथ्वीपर पडतां छतां पण ( पोते ) पडतोथको शत्रुने बे हाथोवडे पकडीने घोडापरथी पाडतो हतो. ॥ ८८ ॥

वाहयित्वाग्रतो वाहं कुन्ते वक्षो विशत्यपि । युद्धक्षीणायुधो दन्तैः कोऽपि कण्ठं द्विषोऽपिषत् ॥ ८९ ॥

अन्वयः—युद्ध क्षीण आयुधः कः अपि कुंते वक्षः विशति अपि अग्रतः वाहं वाहयित्वा दंतैः द्विषः कंठं अपिषत्. ॥ ८९ ॥

अर्थः—युद्धमाटे हथीयारो खूटी जवाथी कोइक स्वार, (पोतानी) छातीमां भालुं पेसी गया छतां पण घोडाने आगळ दोडावीने (पोताना) दांतोवडे शत्रुनी गरदन तोडवा लाग्यो. ॥ ८९ ॥

प्रतिद्विपं द्विपः कोऽपि कोपान्मूर्धन्यताडयत् । करेणोन्मूल्य तस्यैव रणक्षीणरदो रदम् ॥ ९० ॥

अन्वयः—रणक्षीणरदः कः अपि द्विपः तस्य एव रदं करेण उन्मूल्य कोपात् प्रतिद्विपं मूर्धनि अताडयत्. ॥ ९० ॥

अर्थः—रणसंग्राममां नष्ट थया छे दांत जेना, एवो कोइक हाथी, ते दुश्मन हाथीनोज दांत (पोतानी) सुंढवडे मूळमांथी उखेडी नाखीने क्रोधथी दुश्मन हाथीना मस्तकपर तेवडे प्रहार करवा लाग्यो. ॥ ९० ॥

पातितस्य द्विपः कोपी कोऽपीभस्य रिपोर्वपुः । रदाग्रेण विदार्योच्चैर्मत्तो रक्तासवं पिबन् ॥ ९१ ॥

अन्वयः—कः अपि कोपी द्विपः पातितस्य रिपोः इभस्य वपुः रदाग्रेण विदार्य रक्तासवं पिबन् उच्चैः मत्तः. ॥ ९१ ॥

अर्थः—कोइक क्रोध पामेलो हाथी (पोते) पाडी नाखेला वैरीहाथीना शरीरने (पोताना) दांतोनी अणीओवडे फाडीने रुधिर-

रूपी मदिरा पीतोथको अत्यंत उन्मत्त थयो. ॥ ९१ ॥

त्रस्यन्प्रतिद्विपान्मेऽसौ जितारेरपि दुर्यशः । मा दादिति जघानैकः स्वहस्तेन स्वहस्तिनम् ॥ ९२ ॥

अन्वयः–जित अरेः अपि मे असौ प्रतिद्विपात् त्रस्यन् दुर्यशः मादात् इति एकः स्वहस्तेन स्वहस्तिनं जघान. ॥ ९२ ॥

अर्थः—शत्रुने जीत्या छतां पण मारो आ हाथी दुश्मनना हाथीथी भय पामीने मने अपयश न आपे तो ठीक, एम विचारीने कोइक सुभटे पोताना ते हाथीने पोताने हाथे मारी नाख्यो. ॥ ९२ ॥

हतस्य पततो युग्यनागस्योत्प्लुत्य पृष्ठतः । क्षितिमेत्य स्थितोऽजैषीद्वेषिणं मार्गणैः परः ॥ ९३ ॥

अन्वयः–परः हतस्य पततः युग्य नागस्य पृष्ठतः उत्प्लुत्य क्षितिं एत्य स्थितः मार्गणैः द्वेषिणं अजैषीत् ॥ ९३ ॥

अर्थः—कोइक सुभट हणायेला, ( अने तेथी ) पडता एवा ( पोताना ) वाहनरूप हाथीनी पीठपर कूदीने जमीनपर आवी ( त्यां ) उभो रहीने बाणोवडे शत्रुने जीतवा लाग्यो. ॥ ९३ ॥

कश्चिद्रथी प्रथीयांसि शरजालानि लालयन् । अस्त्राण्येव द्विषोऽकृन्तन्नाङ्गानि तु कृपान्वितः ॥ ९४ ॥

अन्वयः–कश्चित् कृपान्वितः रथी प्रथीयांसि शर जालानि लालयन् द्विषः अस्त्राणि एव अकृन्तत्, तु अंगानि न. ॥ ९४ ॥

अर्थः—कोइक दयालु रथी बाणोना विस्तीर्ण समूहोने उछाळी ( ते वडे ) फक्त शत्रुना शस्त्रोनेज कापवा लाग्यो, परंतु तेना शरीरने तेणे इजा थवा दीधी नही. ॥ ९४ ॥

शरैरेकस्य चक्रस्य च्छिन्नेऽक्षे नमतो रथात् । विलुण्ठन्तं क्षितौ शत्रुं कोऽप्यलोकत कौतुकी ॥ ९५ ॥

अन्वयः-शरैः एकस्य चक्रस्य अक्षे छिन्ने, नमतः रथात् क्षितौ विलुंठन्तं शत्रुं कः अपि कौतुकी अलोकत. ॥ ९५ ॥

अर्थः—बाणोवडे एक चक्रनी धरी कपाइ जवाथी नमी जता रथमांथी जमीनपर पडीने लोटता एवा शत्रुने कोइक सुभट तो कौतुकथी जोवाज लाग्यो. ॥ ९५ ॥

कर्णान्ताकृष्टकोदण्ड एवैकः खेदमासदत् । यं यं लक्षीचकारैष तूर्णं स स यदत्रसत् ॥ ९६ ॥

अन्वयः—एकः कर्ण अंत आकृष्ट कोदंडः एव खेदं आसदत्, यत् एषः यं यं लक्षी चकार, सः सः तूर्णं अत्रसत्. ॥ ९६ ॥

अर्थः-कोइक सुभट तो छेक कानना छेडा सुधी धनुषनी ( दोरी ) खेंचीने थाकी गयो, केमके तेणे जेने जेने चींधणीमां लीधो, ते ते सुभट तूर्त नाशवाज लाग्यो. ॥ ९६ ॥

मार्तण्ड इव कोदण्डपरिवेषधरः परः । दिशन्शरमयीं वृष्टिं राजहंसभियेऽभवत् ॥ ९७ ॥

अन्वयः-मार्तंडः इव कोदंड परिवेष धरः परः शरमयीं वृष्टिं दिशन् राजहंस भिये अभवत्. ॥ ९७ ॥

अर्थः—सूर्यनीपेठे धनुषरूपी मंडलने धारण करनारो कोइक सुभट बाणोनो वरसाद वरसावतो थको म्होटा म्होटा राजाओने ( पक्षे-राजहंसोने ) पण भयानक थइ पड्यो. ॥ ९७ ॥

धृतासिस्त्रासयन्विश्वं मुक्तकेशः करालवाक् । शौर्यावतारतः कश्चिदभ्रमद्दृश्रुद्दग्भटः ॥ ९८ ॥

अन्वयः—धृतासिः, मुक्तकेशः, करालवाक्, बभ्रुदृग् कश्चिद् भटः शौर्य अवतारतः विश्वं त्रासयन् अभ्रमत् . ॥ ९८ ॥
अर्थः-पकडेल छे तलवार जेणे, एवो, छूटा केशवाळो, भयंकर वाणीवाळो, अने पीळी आंखोवाळो कोइक सुभट शूरातन चडवाथी जगतने डरावतो थको ( पिशाचनीपेठे ) भमवा लाग्यो. ॥ ९८ ॥

दलितस्य रिपोरन्त्रमालाभिः कृतमण्डनः । कुर्वन्किलकिलामेकः शेके केनापि नेक्षितुम् ॥ ९९ ॥

अन्वयः—दलितस्य रिपोः अंत्र मालाभिः कृत मंडनः, किलकिलां कुर्वन् एकः केन अपि ईक्षितुं न शेके. ॥ ९९ ॥
अर्थः—मारी नाखेला शत्रुना आंतरडांओनी माळाओवडे करेल छे, ( पोताना शरीरनी शोभा जेणे एवा, तथा मुखथी) किलकिल शब्द करता, एवा कोइक एक सुभटनी ( सामे पण ) कोइ जोइ शक्युं नही ॥ ९९ ॥

द्विपान्निर्मदयामास त्रासयामास वाजिनः । भटान्विघटयामास क्ष्वेडयैवोद्धुरः परः ॥ १०० ॥

अन्वयः—उध्धुरः परः क्ष्वेडया एव द्विपान् निर्मदयामास, वाजिनः त्रासयामास, भटान् विघटयामास. ॥ १०० ॥
अर्थः—उन्मत्त थयेलो कोइक सुभट (पोताना) सिंहनादथीज हाथीओने मदरहित करवा लाग्यो, घोडाओने भडकाववा लाग्यो. तथा सुभटोने नसाडवा लाग्यो. ॥ १०० ॥

विक्रम्य पतितस्याजौ कस्यचिद्रक्तबिन्दवः । वीरवारेण वीरश्रीमन्दिरेण ववन्दिरे ॥ १ ॥

अन्वयः-आजौ विक्रम्य पतितस्य कस्यचित् रक्त बिंदवः वीर श्री मंदिरेण वीर वारेण ववंदिरे. ॥ १ ॥

अर्थः—संग्राममां बहादुरी बताव्याबाद (नीचे) पडी गयेला कोइक (घायेल थयेला) सुभटना रुधिरना बिंदुओने शौर्यलक्ष्मीना मंदिरसरखो सुभटोनो समूह वंदन करतो हतो. ॥ १ ॥

इत्याजिप्रसरे वाजिदन्तिस्यन्दनपत्तिषु । पतत्सु तुच्छतां गच्छद्बलं स्वं सैंहिरैक्षत ॥ २ ॥

अन्वयः-इति आजि प्रसरे वाजि दंति स्यंदन पत्तिषु पतत्सु सैंहिः स्वं बलं तुच्छतां गच्छत् ऐक्षत. ॥ २ ॥

अर्थः—एवीरीते संग्रामनो विस्तार थतां घोडा, हाथी, रथो, तथा पाळाओनो संहार थते छते सिंहराजाना पुत्र सनत्कुमारे पोतानुं सैन्य नबळुं पडतुं जोयुं. ॥ २ ॥

अथाहितहतत्रस्तसमस्तध्वजिनीजनः । गन्धसिन्धुरमारुह्य प्रसरच्चापचापलः ॥ ३ ॥
संरम्भी स्तम्भयन्दूरे शूरकेशरिणश्चमूम् । सनत्कुमारो नाराचधाराचयमचञ्चयत् ॥ ४ ॥ युग्मम् ॥

अन्वयः—अथ अहित हत त्रस्त समस्त ध्वजिनी जनः, प्रसरत् चाप चापलः, संरंभी सनत्कुमारः गंध सिंधुरं आरुह्य शूरकेशरिणः चमूं दूरे स्तंभयन् नाराच धारा चयं अचंचयत्. ॥ ३ ॥ ४ ॥ युग्मं ॥

अर्थः—पछी शत्रुना माराथी कंटाळीने नाशी गयेल छे सैन्यमांथी सर्व सुभटो जेना एवो, तथा विस्तार पामती छे धनुषनी चालाकी जेनी, एवो बहादूर सनत्कुमार गंधहस्तीपर चडीने, ते शूरकेशरी राजानी सेनाने दूर थंभावी राखतोछतो बाणोनी श्रेणिनो समूह फेंकवा लाग्यो. ॥ ३ ॥ ४ ॥ युग्मं ॥

तद्बाणपातभीमासु रणसीमासु शात्रवः । न रथो न भटो नेभो न चाश्वः प्राविशद् भृशम् ॥ ५ ॥

अन्वयः-भृशं तद् बाण पात भीमासु रण सीमासु शात्रवः न रथः, न भटः, न इभः, च न अश्वः प्राविशत्. ॥ ५ ॥

अर्थः—ते सनत्कुमारना बाणोना पडवाथी अत्यंत भयंकर थयेली संग्रामनी हदमां शत्रुनो न (कोइ) रथ, के न सुभट, के न हाथी, के न (कोइ) घोडो दाखल थइ शक्यो. ॥ ५ ॥

मुञ्चन्नथ शरासारं भूरिशो रिपुभूपतीन् । न्यवारयदसावेको विवेकोऽरीनिवान्तरान् ॥ ६ ॥

अन्वयः-अथ विवेकः आंतरान् अरीन् इव एकः असौ भूरिशः शर आसारं मुंचन् रिपु भूपतीन् न्यवारयत्. ॥ ६ ॥

अर्थः—पछी विवेक जेम अंतरंग शत्रुओने (राग आदिकोने) अटकावी राखे, तेम एकलो आ सनत्कुमार घणा बाणोनो वरसाद वरसावतोथको शत्रुना राजाओने अटकाववा लाग्यो. ॥ ६ ॥

इत्यस्मिन्नुग्रसंग्रामभरेण क्षीणमार्गणे । धीरा विरोधिनोऽधावन्प्रधनायोद्धृतायुधाः ॥ ७ ॥

अन्वयः-इति उग्र संग्राम भरेण अस्मिन् क्षीण मार्गणे विरोधिनः धीराः उद्धृत आयुधाः प्रधनाय अधावन्, ॥ ७ ॥

अर्थः—एरीते थोभ्याविना भयंकर संग्राम करवाथी ते सनत्कुमारनां बाणो खूटी जवाने लीधे शत्रुना सुभटो हथीयारो उगामीने लडवामाटे (तेनापर) धसी आव्या. ॥ ७ ॥

वर्षन्तो मङ्क्षु धारालैः शरजालैः समन्ततः । वव्रुः कुमारमार्तण्डं तोयदा इव ते तदा ॥ ८ ॥

अन्वयः-तदा समंततः धारालैः शर जालैः मंक्षु वर्षतः ते तोयदाः इव कुमार मार्तंडं वव्रुः. ॥ ८ ॥

अर्थः--ते वखते चोतरफथी तीक्ष्ण धारवाळां बाणोना समूहोनो एकदम वरसाद वरसावता एवा ते शत्रुओए वादळांओनीपेठे ते कुमाररूपी सूर्यने घेरी लीधो. ॥ ८ ॥

जीविताशां विमुच्याशु विधृतासिर्मृधाय सः । नन्दनो मेदिनीजानेर्यावदुत्तरति द्विपात् ॥ ९ ॥

हस्तस्त्रस्तसमस्तास्त्रं लालामालावृताननम् । तावन्निद्रामिलच्चक्षुर्विपक्षबलमैक्षत ॥ १० ॥ युग्मं ॥

अन्वयः-मेदिनी जानेः नंदनः सः जीवित आशां विमुच्य मृधाय विधृत असिः यावत् द्विपात् उत्तरति, ॥ ९ ॥ तावत् हस्त स्रस्त समस्त अस्त्रं, लाला माला आवृत आननं, निद्रा मिलत् चक्षुः विपक्षबलं ऐक्षत. ॥ १० ॥ युग्मं ॥

अर्थः—(पछी) राजानो पुत्र ते सनत्कुमार जीवितनी आशा छोडीने लडवामाटे तलवार पकडीने जेवामां हाथीउपरथी उतरे छे, ।।९।। तेवामां, हाथमांथी पडी गयेल छे सघळां शस्त्रो जेनां, निकळती लाळोनी श्रेणिथी आच्छादित थयेल छे मुखोजेनां, अने निद्राथी मीचाती छे आंखो जेनी, एवां शत्रुना सैन्यने तेणे जोयुं. ॥ १० ॥ युग्मं ॥

सुप्तानां विद्विषामन्तर्विरराज स राजसूः । आत्मेव ज्ञानिनो मूर्छत्कर्मपद्धतिमध्यगः ॥ ११ ॥

अन्वयः-मूर्छत् कर्म पद्धति मध्यगः ज्ञानिनः आत्मा इव सुप्तानां विद्विषां अंतः सः राजसूः विरराज. ॥ ११ ॥

अर्थः—(पछी) मूर्छा पामती कर्मोनी श्रेणिओनी वच्चे रहेला ज्ञानीना आत्मानीपेठे, सुतेला शत्रुओनी वच्चे ते राजकुमार

शोभवा लाग्यो. ॥ ११ ॥

तन्निद्राविस्मितं चन्द्ररत्नचूडौ खचारिणौ । नेमतुः संयतानीतशूरकेशरिणावमुम् ॥ १२ ॥

अन्वयः—संयतानीत शूरकेशरिणौ चंद्र रत्नचूडौ ख चारिणौ तन्निद्रा विस्मितं अमुं नेमतुः. ॥ १२ ॥

अर्थः—(एवामां) बांधीने लावेलो छे शूरकेशरी राजाने जेओए, एवा ते चंद्र तथा रत्नचूड नामना बन्ने विद्याधरो, ते शत्रुओनी निद्राथी आश्चर्यमां पडेला ते सनत्कुमारने आवी नम्या. ॥ १२ ॥

अथोत्फुल्लदृगुन्मीलत्पुलकः परिरभ्य तौ । प्रातः किमिदमित्येष पप्रच्छ पृथिवीशभूः ॥ १३ ॥

अन्वयः-अथ उत्फुल्ल दृग् उन्मीलत्पुलकः एषः पृथिवी ईश भूः तौ परिरभ्य मीतः इदं किं? इति पप्रच्छ. ॥ १३ ॥

अर्थः—पछी विकस्वर थयेली आंखोवाळो, तथा रोमांचित थयेलो ते राजकुमारे तेओने भेटी, आनंद पामी आ शुं? एम पूछयुं.

सद्योऽभ्युदयदानन्दरसोर्मिस्नाननिर्मलाम् । ऊचे वाचं तदा चन्द्रनामा खेचरशेखरः ॥ १४ ॥

अन्वयः-तदा चंद्रनामा खेचर शेखरः सद्यः अभ्युदयत् आनंद रस ऊर्मि स्नान निर्मलां वाचं ऊचे. ॥ १४ ॥

अर्थः-त्यारे (ते) चंद्रनामनो खेचरराज तुरत उछळता आनंदरसना मोजांओना स्नानथी निर्मल थयेली वाणी बोल्यो के, ।१४।

कुमार मार्यमाणेषु खेचरेन्द्रेषु जीवतोः । पुनर्जन्मेव जज्ञेऽद्य त्वदाज्ञापालनेन नौ ॥ १५ ॥

अन्वयः-(हे) कुमार! खेचरेंद्रेषु मार्यमाणेषु त्वत् आज्ञा पालनेन जीवतोः नौ अद्य पुनः जन्म इव जज्ञे. ॥ १५ ॥

अर्थः—हे सनत्कुमार! खेचरेंद्रो तो अमोने मारी नाखता हता, (परंतु एवामां) आपनी आज्ञा पालवाथी जीवता रहेला एवा अमो बन्नेनो जाणे आजे पुनर्जन्मज थयो छे. ॥ १५ ॥

**तथाहि हृदयग्राहिद्युतिविद्योति विद्यते । रथनूपुरचक्राख्यं वैताढ्यशिखरे पुरम् ॥ १६ ॥**

अन्वयः—तथाहि-वैताढ्य शिखरे हृदय ग्राहि द्युति विद्योति रथनूपुरचक्र आख्यं पुरं विद्यते. ॥ १५ ॥

अर्थः—तेनुं वृत्तांत नीचे मुजब छे-वैताढ्यपर्वतना शिखरपर मनने आनंदित करनारी कांतिवडे शोभितुं थयेलुं एवुं रथनूपुरचक्र नामनुं (एक) नगर छे. ॥ १६ ॥

**तस्मिन्नस्ति मनस्तिग्मभावेन भुवनं द्विषन् । भृशं भीमात्मनां सीमा भीमाख्यः खेचराग्रणीः ॥ १७ ॥**

अन्वयः—तस्मिन् मनः तिग्म भावेन भुवनं भृशं द्विषन् भीम आत्मनां सीमा भीम आख्यः खेचर अग्रणीः अस्ति. ॥ १७ ॥

अर्थः-ते नगरमां हृदयना क्रोधी स्वभावथी जगत्पर घणो द्वेष करनारो, तथा भयंकर माणसोनी सीमा सरखो भीमनामनो खेचरोनो स्वामी छे. ॥ १७ ॥

**तपोभिर्दुस्तपैरेष निःशेषखगपेषधीः । क्रूराक्षो राक्षसीं विद्यामसाधुः समसाधयत् ॥ १८ ॥**

अन्वयः-निःशेष खग पेषधीः क्रूर अक्षः एषः असाधुः दुस्तपैः तपोभिः राक्षसीं विद्यां समसाधयत्. ॥ १८ ॥

अर्थः—सर्वे खेचरोने मारी नाखवानी बुद्धिवाळा, तथा भयंकर आंखोवाळा एवा ते दुष्ट आकरा तपोवडे राक्षसी विद्यानुं साधन करेलुं छे. ॥ १८ ॥

**तत्ततः संकटं शङ्कमानाः क्वापि न निर्ववुः। नवोत्तरशतद्रङ्गसङ्गिनः खेचरेश्वराः ॥ १९ ॥**

अन्वयः–तत् ततः संकटं शंकमानाः नव उत्तर शत द्रंग संगिनः खेचरेश्वराः क्व अपि न निर्ववुः. ॥ १९ ॥

अर्थः–तेथी तेनाथी संकट पामवानी शंका करता. एवा एकसो नव नगरोना खेचर राजाओ क्यांयें पण निरांत पाम्या नही.

**अद्य तद्भयचिन्तार्तिगतनिद्रस्य मे निशि। पुरोऽभूत्कामिनी काचिदियत्ता रूपसंपदाम् ॥ २० ॥**

अन्वयः–तद्भय चिंता अर्ति गत निद्रस्य मे पुरः अद्य निशि रूप संपदां इयत्ता काचित् कामिनी अभूत्. ॥ २० ॥

अर्थः—ते भयनी चिंताना दुःखथी गयेली छे निद्रा जेनी, एवो जे हुं, तेनी आगळ आजे रात्रिए रूप अने समृद्धिनी सीमासरखी कोइक स्त्री आवीने उभी. ॥ २० ॥

**मकरध्वजराजस्य राजधानीव जङ्गमा। दर्शयन्ती दृशं भावमयीमित्याह मामियम् ॥ २१ ॥**

अन्वयः—मकर ध्वज राजस्य जंगमा राजधानी इव इयं भावमयीं दृशं दर्शयंती मां इति आह. ॥ २१ ॥

अर्थः–कामदेवनी जंगम राजधानी सरखी, एवी ते स्त्री (पोतानी) स्नेहभाववाळी दृष्टि देखाडतीथकी मने एम कहेवा लागी के,

**जानीहि मां महेन्द्रस्य महिषीं मोहदद्युते। मनो बद्धानुरागं तु सुभग त्वद्गुणेषु मे ॥ २२ ॥**

अन्वयः-(हे) मोहद द्युते ! मां महेंद्रस्य महिषीं जानीहि ? (हे) सुभग ! मे मनः तु त्वद्गुणेषु बद्ध अनुरागं. ॥ २२ ॥

अर्थः—हे मोह उपजावनारी कांतिवाळा ! मने तारे महान् इंद्रनी पट्टराणी जाणवी, (वळी) हे सुभग ! मारुं मन तो तारा गुणोमां प्रेमरागथी चोंटी गयेलुं छे. ॥ २२ ॥

तन्मदङ्गमनङ्गार्तं निर्वापय कृपामय । त्यज चिन्तां तवारातिं हुंकारेणैव भस्मये ॥ २३ ॥

अन्वयः-तत् (हे) कृपामय ! अनंग आर्तं मदंगं निर्वापय ? चिंतां त्यज ? तव अरातिं हुंकारेण एव भस्मये. ॥ २३ ॥

अर्थः—माटे हे दयाळु ! कामथी पीडायेलां मारां शरीरने तुं शांत कर ? चिंताने तजी दे ? तारा शत्रुने फक्त हुंकारमात्रथीज हुं (बाळीने) भस्म करी नाखीश. ॥ २३ ॥

क्षोभकैर्लोभकैश्चेति चेतोहृद्भिर्वचोभरैः । चिरमभ्यर्थयामास सा मां कामान्धिता भृशम् ॥ २४ ॥

अन्ववः-इति क्षोभकैः च लोभकैः चेतः हृद्भिः वचः भरैः सा कामांधिता चिरं मां भृशं अभ्यर्थयामास. ॥ २४ ॥

अर्थः—ए रीते क्षोभ पमाडनारां, अने लालच करावनारां मनोहर वचनोनां समूहोवडे ते कामांध थयेली स्त्रीए घणा काळसुधी मारीपासे घणी घणी प्रार्थना करी. ॥ २४ ॥

परस्त्रीति निषिद्धैव त्वदाज्ञां ध्यायता मया । क्षणदान्ते विलक्षत्वं दधती सा तिरोदधे ॥ २५ ॥

अन्वयः—परस्त्री मया निषिद्धा एव, इति त्वदाज्ञां ध्यायता, क्षणदा अंते विलक्षत्वं दधती सा तिरोदधे. ॥ २५ ॥

अर्थः—परस्त्रीनो में (तो) त्यागज कर्यो छे, एम तमारी आज्ञानो हुं तो विचारज करतो हतो, ( एवामां ) रात्रिने अंते विलखी थयेली ते स्त्री अदृश्य थइ गइ. ॥ २५ ॥

**सुहृद्यथ रथाङ्गानां दृक्पथाङ्गणभूषणे । आक्रन्दः श्रवणास्कन्दः कोऽपि व्याप दिशोऽद्भुतः ॥ २६ ॥**

अन्वयः—अथ रथांगानां सुहृदि दृक् पथ अंगण भूषणे श्रवण आस्कंदः कः अपि अद्भुतः आक्रंदः दिशः व्याप. ॥ २६ ॥

अर्थः—पछी चक्रवाकोनो मित्र (सूर्य ज्यारे ) आकाशरूपी आंगणांने शोभाववा लाग्यो, (अर्थात् सूर्योदय थयो त्यारे) कानने फाडी नाखे एवो कोइक विचित्र प्रकारनो रुदननो अवाज दिशाओमां फेलावा लाग्यो. ॥ २६ ॥

**अथैत्य खेचराधीशपुरेभ्यः खेचरेश्वराः । क्रंन्दसंरम्भसंभ्रान्तहृदि मय्यवदन्नदः ॥ २७ ॥**

अन्वयः—अथ क्रंद संरंभ संभ्रांत हृदि मयि खेचर अधीश पुरेभ्यः खेचर ईश्वराः एत्य अदः अवदन्. ॥ २७ ॥

अर्थः—पछी ते रुदनना ककळाटथी (जेवामां) हुं व्याकुळ हृदयवाळो थयो, (तेवामां) ते विद्याधरपतिओना नगरमांथी आवेल महोटा विद्याधरो (मारीपासे) आवींने आरीते कहेवा लाग्या. ॥ २७ ॥

**भीमेनाद्य पुरश्रेणिद्वयैश्वर्याय याचिता । हृद्यानि राक्षसी विद्या स्त्रीरूपाण्यभितः श्रिता ॥ २८ ॥**

अन्वयः—अद्य भीमेन पुर श्रेणि द्वय ऐश्वर्याय याचिता राक्षसी विद्या अभितः हृद्यानि स्त्रीरूपाणि श्रिता. ॥ २८ ॥

अर्थः—आजे ते भीमे बन्ने श्रेणिओनां नगरोनां राज्यमाटे मागणी करवाथी ते राक्षसी विद्याए चोतरफ मनोहर स्त्रीओनां रूपो

विकुर्व्यां हतां. ॥ २८ ॥

चटूक्तिभिः पतीकृत्य निखिलान्खेचराधिपान् । छलिनी तलिनीभूय बलिनी निजघान सा ॥ २९ ॥

अन्वयः-छलिनी बलिनी सा चटु उक्तिभिः निखिलान् खेचर अधिपान् पतीकृत्य तलिनीभूय निजघान. ॥ २९ ॥

अर्थः—कपटी अने बलवान एवी ते राक्षसीविद्याए मिष्ट वचनोवडे सघळा खेचराधीशोने (पोताना) स्वामी बनावीने (पोते) शय्यारूढ थइने मारी नाख्या. ॥ २९ ॥

द्वावेव बत जीवन्तौ दैवयोगेन केनचित् । भवांश्च रत्नचूडश्च दिष्ट्या दृष्ट्वाद्य वीक्षितौ ॥ ३० ॥

अन्वयः-बत केनचित् दैवयोगेन भवान् च रत्नचूडः च जीवंतौ अद्य दिष्टया दृष्ट्या वीक्षितौ. ॥ ३० ॥

अर्थः—(पण) अरेरे! कोइक दैवयोगे तमो अने रत्नचूड जीवता रह्या छो, तथा आजे (अमो) नशीबदार के (तमोने अमोए जीवता) नजरे जोया. ॥ ३० ॥

इति तद्वचनैर्मत्वा जीवन्तं सुहृदं निजम् । प्रीत्याहममृताम्भोधिमध्यमग्न इवाभवम् ॥ ३१ ॥

अन्वयः-इति तद्वचनैः निजं सुहृदं जीवंतं मत्वा अहं प्रीत्या अमृत अंभोधि मध्य मग्नः इव अभवं. ॥ ३१ ॥

अर्थः—एवी रीते तेओना कहेवाथी मारा मित्र ते रत्नचूडने जीवतो जाणीने हुं तो प्रेमथी जाणे अमृतना समुद्रमां मग्न थयो.

अथ जीयात्कुमारस्य शिक्षा नौ जीवनौषधम् । विरुद्धराक्षसीरक्षासिद्धमन्त्रायितं यया ॥ ३२ ॥

इति ब्रुवन्कुतोऽप्येत्य तदा हृदि लुलोठ मे । वयस्य एष पीयूषतुषारलवहारवत् ॥ ३३ ॥ युग्मम् ॥

अन्वयः—अथ यया विरुद्ध राक्षसी रक्षा सिद्ध मंत्रायितं, नौ जीवन औषधं कुमारस्य शिक्षा जीयात्, ॥ ३२ ॥ इति ब्रुवन् एषः मे वयस्यः तदा कुतः अपि एत्य पीयूष तुषार लव हारवत् मे हृदि लुलोठ. ॥ ३३ ॥ युग्मं ॥

अर्थः-पछी जे शिखामण शत्रुरूप राक्षसीथी बचाववाने सिद्ध मंत्ररूप थइ छे, तथा आपणा जीवनना औषधसरखी, एवी ते सनत्कुमारनी शिखामण जय पामो? ॥ ३२ ॥ एम बोलतो थको ते मारो मित्र रत्नचूड ते समये क्यांकथी आवीने अमृतबिंदुओना नमुनावाळा हारनीपेठे मारा हृदयपर लोटवा लाग्यो, (अर्थात् ते मने आवीने मळयो. ) ॥ ३३ ॥ युग्मं ॥

ततः प्रीतिभरस्यास्य भागं ते दातुमुद्यतौ । आवामिहागतौ दृष्टस्त्वं च युद्धसमुद्धतः ॥ ३४ ॥

अन्वयः—ततः अस्य प्रीति भरस्य ते भागं दातुं उद्यतौ आवां इह आगतौ, त्वं च युद्धसमुद्धतः दृष्टः. ॥ ३४ ॥

अर्थः—पछी आ आनंदसमूहनो तमोने (पण) भाग आपवा माटे उत्कंठित थयेला एवा अमो बन्ने अहीं आव्या, (एवामां) तमोने तो (अमोए) युद्धमां घुंचवायेला जोया. ॥ ३४ ॥

स्वापिता रिपवो बध्ध्वाऽऽनीतश्चायं ततोऽधुना । किं कुर्वो जीवदानैककल्पद्रुम समादिश ॥ ३५ ॥

अन्वयः—ततः रिपवः स्वापिताः, च अयं बध्ध्वा आनीतः, (हे) जीव दान एक कल्पद्रुम! समादिश? अधुना किं कुर्वः?

अर्थः-पछी (तमारा) शत्रुओने अमोए निद्राधीन कर्या, अने आ शूरकेशरीने (पण) बांधीने लाव्या छीए, माटे जीवितदान

आपवामां एक कल्पवृक्षसरखा एवा हे सनत्कुमार! अमोने आज्ञा आपो, के हवे अमो शुं करीये? ॥ ३५ ॥

अथास्यकमलोन्मीलन्मधूच्चयमयं वचः । इदं गदितुमारेभे कुमारेण प्रमोदिना ॥ ३६ ॥

अन्वयः—अथ प्रमोदिना कुमारेण आस्य कमल उन्मीलत् मधु उच्चयमयं इदं वचः गदितुं आरेभे. ॥ ३६ ॥

अर्थः–पछी खुशी थयेला ते सनत्कुमारे मुखरूपी कमलमांथी नीकळता मधना समूह सरखुं आवुं वचन कहेवा मांड्युं. ॥ ३६ ॥

युवां दिष्ट्याद्य निःक्रान्तौ राक्षसीकवलग्रहात् । अद्य दिष्ट्याहमाकृष्टो भवद्भ्यां संकटादितः ॥ ३७ ॥

अन्वयः—दिष्ट्या अद्य युवां राक्षसी-कवल ग्रहात् निःक्रांतौ, दिष्ट्या अद्य अहं भवद्भ्यां इतः संकटात् आकृष्टः ॥ ३७ ॥

अर्थः–-सारुं थयुं के, आजे तमो बन्ने ते राक्षसीना कोळीयामांथी निकळीने बची गया, तेमज ( आ पण ) सारुं थयुं के, आजे मने तमोए आ संकटमांथी बचावी लीधो. ॥ ३७ ॥

इदानीं तु क्षतैरार्तं क्षतरोहिलतारसैः । बलयोरङ्गिसंघातं समुल्लाघयतं रयात् ॥ ३८ ॥

अन्वयः—इदानीं तु क्षतैः आर्तं बलयोः अंगि संघातं क्षत रोहि लता रसैः रयात् समुल्लाघयतं? ॥ ३८ ॥

अर्थः—अने हवे प्रहारोथी पीडित थयेला बन्ने सैन्योना प्राणीओना समूहने ( तमो ) क्षतरोहिणी नामनी वेलडीना रसथी तुरत साजा करो? ॥ ३८ ॥

इदं रचयतं निद्रादरिद्रं च द्विषां बलम् । अमुं च मुञ्चतं बन्धान्मा विपद्भूद्रिपोरपि ॥ ३९ ॥

अन्वयः—च द्विषां इदं बलं निद्रादरिद्रं रचयतं? च अमुं बंधात् मुंचतं? रिपोः अपि विपद् माभूत् ॥ ३९ ॥

अर्थः—वळी शत्रुओना आ सैन्यने निद्रारहित करो? तथा आ शूरकेशरीराजाने (पण) बंधन रहित करो? केमके शत्रुने पण आपदा न होवी जोइये. ॥ ३९ ॥

**इत्यादेशे कुमारेन्दोस्ताभ्यां तूर्णं विनिर्मिते । उत्तस्थौ दलिताशेषविकारं तद्बलद्वयम् ॥ ४० ॥**

अन्वयः-इति कुमारेन्दोः आदेशे ताभ्यां तूर्णं विनिर्मिते दलित अशेष विकारं तद् बल द्वयं उत्तस्थौ. ॥ ४० ॥

अर्थः-एवीरीतनो ते राजकुमारनो हुकम तेओए तुर्त बजाववाथी सर्व विकारोथी रहित थयेलां ते बन्ने सैन्यो उठीने उभां थयां.

**दूरं त्रपानतः शूरकेसरी सिंहसूनुना । बहु संमान्य सत्कृत्य मुक्तः स्वमगमत् पुरम् ॥ ४१ ॥**

अन्वयः—दूरं त्रपा नतः शूरकेसरी सिंह सूनुना बहु संमान्य सत्कृत्य मुक्तः स्वं पुरं अगमत् . ॥ ४१ ॥

अर्थः—(पछी) लज्जावडे अत्यंत नम्र थयेला ते शूरकेसरीराजाने सिंहराजाना पुत्र एवा ते सनत्कुमारे घणा सन्मान अने सत्कारपूर्वक छोडी मूकवाथी (ते) पोताना नगरमां चाल्यो गयो. ॥ ४१ ॥

**भीमतो भीमती मा भूद्भूर्वां संभूय भास्वतोः । इत्युक्त्वाऽऽशु कुमारेण महितौ प्रहितौ खगौ ॥ ४२ ॥**

अन्वयः-भास्वतोः वां संभूय भूः भीमतः भीमती माभूत्, इति उक्त्वा कुमारेण महितौ खगौ आशु महितौ ॥ ४२ ॥

अर्थः-तेजस्वी एवा तमो बन्नेनी मालिकीवाळी ( ते वैताढ्यनी ) पृथ्वी, ते भीमथी हवे भययुक्त न रहेवी जोइये, एम कही

सनत्कुमारे सन्मानसहित ते बन्ने विद्याधरोने तुरत त्यांथी रवाना कर्या. ॥ ४२ ॥

**अवलिष्ट बलिष्ठानां धुर्यः पुर्यै ततः कृती । पदे पदे नृदेवानां वृन्दैर्वन्द्यपदाम्बुजः ॥ ४३ ॥**

अन्वयः—ततः बलिष्ठानां धुर्यः, पदे पदे नृदेवानां वृन्दैः वंद्य पद अंबुजः कृती पुर्यै अवलिष्ट. ॥ ४३ ॥

अर्थः—पछी बलवानोमां अग्रेसर, तथा पगले पगले राजाओना समूहोवडे वंदाता छे चरणकमलो जेना, एवो कृतार्थ थयेलो ते सनत्कुमार (पोताना) नगर प्रत्ये ( जवामाटे त्यांथी ) पाछो वळ्यो. ॥ ४३ ॥

**प्रयाणान्ते पटावासविश्रान्ते शान्तचेतसः । विज्ञप्तं प्रतिहारेण कुमारस्येदमन्यदा ॥ ४४ ॥**

अन्वयः- अन्यदा प्रयाण अंते पट आवास विश्रांते शांत चेतसः कुमारस्य प्रतिहारेण इदं विज्ञप्तं. ॥ ४४ ॥

अर्थः-एक दिवसे प्रयाणने अंते तंबूमां विश्राम लेती वेलाए शांत हृदयवाळा एवा ते सनत्कुमारने प्रतिहारे ( आवीने ) एवी विनंति करी के, ॥ ४४ ॥

**केनापि सहितः पुंसा प्रहितः स्वामिना स्वयम् । जीमूतो नाम दूतोऽस्ति कुमार द्वारि वारितः ॥ ४५ ॥**

अन्वयः-( हे ) कुमार! केन अपि पुंसा सहितः, स्वामिना स्वयं प्रहितः जीमूतः नाम दूतः द्वारि वारितः अस्ति. ॥ ४५ ॥

अर्थः-हे कुमार! कोइक पुरुष सहित ( आपना ) पिताजीए पोते मोकलेलो जीमूत नामनो दूत में दरवाजे रोकेलो (उभो) छे.

**विज्ञाय वेत्रभृन्नेत्रसंज्ञां भूपभुवस्ततः । दूतं च तं पुमांसं च दत्तसम्मानमानयत् ॥ ४६ ॥**

अन्वयः-ततः भूप भुवः नेत्र संज्ञां विज्ञाय वेत्रभृत् तं दूतं च तं पुमांसं च दत्त संमानं आनयत्. ॥ ४६ ॥

अर्थः-पछी ( ते ) राजकुमारनी चक्षुसंज्ञा जाणीने ते छडीदार ते दूतने तथा ते पुरुषने आदरमानपूर्वक (त्यां) लाव्यो. ॥४६॥

**नरं तमग्रे कृत्वाऽथ दूतो नत्वेदमभ्यधात् । कुमार यदयं वक्ति तत्कार्यं राजवागियम् ॥ ४७ ॥**

अन्वयः-अथ दूतः तं नरं अग्रे कृत्वा नत्वा इदं अभ्यधात्, (हे) कुमार ! अयं यत् वक्ति तत् कार्यं, इयं राजवाक् ॥ ४७ ॥

अर्थः—पछी ते दूते ते पुरुषने आगळ करीने कह्युं के, हे कुमार ! आ पुरुष जे (कंइ) कहे, ते तमारे करवुं, एवा ( आपना ) पिताजीनी आज्ञा छे. ॥ ४७ ॥

**उल्लसद्भ्रूलतेनाथ कुमारेण निरीक्षितः । सोऽभ्यधत्त सुधारोचिरौचित्यरुचिरं वचः ॥ ४८ ॥**

अन्वयः—अथ उल्लसद् भ्रूलतेन कुमारेण निरीक्षितः सः सुधारोचिः औचित्य रुचिरं वचः अभ्यधत्त. ॥ ४८ ॥

अर्थः—पछी उल्लसायमान थयेली भमरवाळा ते कुमारथी जोवायेलो ते पुरुष चंद्रनी योग्यताथी मनोहर (अति शीतल ) वचन बोल्यो के, ॥ ४८ ॥

**अस्ति संसारसारश्रीः स्वश्रीजितमरुत्पुरी । लक्ष्मीविलसनावासो वासन्तीति श्रुता पुरी ॥ ४९ ॥**

अन्वयः—संसार सार श्रीः, स्व श्री जित मरुत्पुरी, लक्ष्मी विलसन आवसः, वासंती इति श्रुता पुरी अस्ति. ॥ ४९. ॥

अर्थः—संसारमां मनोहर शोभावाळी, पोतानी लक्ष्मीवडे देवपुरीने ( पण ) जीतनारी, अने लक्ष्मीने क्रीडा करवाना स्थान-

सरखी, वासंती नामथी प्रख्यात थयेली नगरी छे. ॥ ४९ ॥

तस्यां नाभाङ्कनामास्ति नाकनाथनिभो नृपः । पद्मवासेति यत्पाणिवासेनेवाभ्यधुः श्रियम् ॥ ५० ॥

अन्वयः—तस्यां नाक नाथ निभः नाभांक नामा नृपः अस्ति, यत्पाणि वासेन इव श्रियं पद्मवासा इति अभ्यधुः. ॥ ५० ॥

अर्थः-ते नगरीमां इन्द्र सरखो नाभांकनामे राजा छे, के जेना हस्तकमलमां निवास करवाथी जाणे लक्ष्मीने (लोको) 'पद्मवासा' (कमलमां रहेनारी) कहेवा लाग्या छे!

तस्य प्रिया श्रियामेकसदनं मदनावली । अस्ति राजीवजीवातुवदना मदनायुधम् ॥ ५१ ॥

अन्वयः—तस्य श्रियां एक सदनं, राजीव जीवातु वदना, मदन आयुधं मदनावली प्रिया अस्ति. ॥ ५१ ॥

अर्थः—ते राजाने लक्ष्मीना एक स्थान सरखी, चंद्रसरखा मुखवाळी, अने कामदेवना शस्त्र सरखी मदनावली नामनी राणी छे.

तदङ्गजा गजगतिर्जगति प्राप्तविश्रुतिः । आस्ते मुखानिलमिलद्भृङ्गा शृङ्गारसुन्दरी ॥ ५२ ॥

अन्वयः—गज गतिः, जगति प्राप्त विश्रुतिः, मुख अनिल मिलद् भृंगा शृंगारसुंदरी तदंगजा आस्ते. ॥ ५२ ॥

अर्थः-हाथी सरखी (मनोहर) गतिवाळी, जगतमां प्रख्याति पामेली, अने मुखना पवनथी एकठा थता भ्रमरोवाळी ( सुगंधि श्वासोश्वासवाळी ) एवी शृंगारसुंदरी नामनी तेनी पुत्री छे. ॥ ५२ ॥

त्रैलोक्यरमणीभ्योऽपि रमणीयतमामिमाम् । कन्यामनन्यस्पृहया ग्रहयांचक्रिरे गुणाः ॥ ५३ ॥

अन्वयः—त्रैलोक्य रमणीभ्यः अपि रमणीयतमां इमां कन्यां गुणाः अनन्य स्पृहया ग्रहयांचक्रिरे. ॥ ५३ ॥

अर्थः—त्रणे लोकनी सुंदरीओथी पण अत्यंत मनोहर, एवी आ कन्याने, गुणोए बीजी कोइ स्त्रीनी पण इच्छा राख्या विना स्वीकारेली छे. ( अर्थात् सर्व गुणो ते कन्यामां आवीने वसेला छे.) ॥ ५३ ॥

भात्यसौ शशिलीलेन शीलेनैव मयात्र किम् । इतीवास्या बहिर्नास्यादेति प्रीत्यामपि स्मितम् ॥ ५४ ॥

अन्वयः—असौ शशिलीलेन शीलेन एव भाति, अत्र मया किं? इति इव, प्रीत्यां अपि अस्याः आस्यात् स्मितं बहिः न एति

अर्थः—आ कन्या चन्द्र सरखां निर्मल शील वडेज शोभी रही छे, ( माटे ) अहीं मारुं शुं प्रयोजन छे? जाणे एवा विचारथीज प्रीति समये पण तेणीना मुखमांथी हास्य बहार आवतुं नथी. ॥ ५४ ॥

इयं बालापि शीलस्य परमां भूमिकां गता । कदापि न ददात्येव खिन्नेव त्वरितं पदम् ॥ ५५ ॥

अन्वयः—बाला अपि शीलस्य परमां भूमिकां गता इयं, खिन्ना इव कदापि त्वरितं पदं न ददाति एव. ॥ ५५ ॥

अर्थः—बाला छतां पण शीलनी परम कोटीए पहोंचेली आ कन्या, जाणे थाकी गइ होय नही! तेम कोइ पण समये उतावळुं पगलुं तो भरतीज नथी. ॥ ५५ ॥

चन्दनाद्यपि सेव्यं सा सिषेवे स्वच्छया धिया । मनःकामनया हंसगमना न मनागपि ॥ ५६ ॥

अन्वयः—हंसगमना सा सेव्यं चंदनादि अपि स्वच्छया धिया सिषेवे, मनः कामनया मनाक् अपि न. ॥ ५६ ॥

अर्थः—हंससरखी चालवाळी ते कन्या भोगववा योग्य चंदन आदिक पण निर्मल बुद्धिथीज वापरे छे, परंतु हृदयना कामविकारथी जरा पण वापरती नथी. ॥ ५६ ॥

केलीषु सफलीचक्रे कदापीयं न मामिति । विमुक्ता कुपितेनेव सांप्रतं शैशवेन सा ५७ ॥

अन्वयः-इयं केलीषु कदापि मां न सफलीचक्रे, इति कुपितेन इव शैशवेन सांप्रतं सा विमुक्ता. ॥ ५७ ॥

अर्थः—आ कन्याये क्रीडानी अंदर कोइ पण वखते मने सफल कर्युं नही, एवा विचारथी जाणे क्रोधातुर थयेला बाळपणाए हालमां तेणीनो त्याग कर्यो छे. (अर्थात् ते युवती थयेली छे,) ॥ ५७ ॥

यौवनं नलिनाक्षीषु विकारैककलागुरुम् । निर्विकारविलासेषु सा शिष्ययति संप्रति ॥ ५८ ॥

अन्वयः—नलिनाक्षीषु विकार एक कला गुरुं यौवनं सा संप्रति निर्विकार विलासेषु शीष्ययति. ॥ ५८ ॥

अर्थः—स्त्रीओने विषे (स्वभावथीज ) विकार उत्पन्न करवामां एक कलाचार्यसरखा यौवनने, ते कन्याए हालमां विकार रहित विलासो (शिखववामाटे) शिष्य तरीके गोठवेलुं छे. ॥ ५८ ॥

भूपे तदनुरूपाय वराय विहितोद्यमे । सांप्रतं सर्वभूपानां रूपं चित्रेषु पश्यति ॥ ५९ ॥

स्वमातृपितृसोदर्यवयस्याविरहासहा । विवाहं स्पृहये नाहमिति स्माह सखीषु सा ॥ ६० ॥ युग्मम् ॥

अन्वयः-तत् अनुरूपाय वराय विहत उद्यमे भूपे सांप्रतं सर्वे भूपानां रूपं चित्रेषु पश्यति, ॥ ५९ ॥ स्व मातृ पितृ सोदर्य वयस्या विरह असहा सा, अहं विवाहं न स्पृहये इति सखीषु स्माह. ॥ ६० ॥ युग्मं ॥

अर्थः-तेणी माटे सरखा रूपवाळा वरनी शोध करता राजा हालमां सर्वे राजाओनी छबी चित्रो मारफते जोइ रह्या छे, ॥ ५९॥ ( परंतु ) पोताना माता पिता, भाइ तथा सखीओना विरहने नही सहन करनारी ते कन्याए सखीओ पासे एम जाहेर कर्युं छे के, हुं विवाह करवानी इच्छा राखती नथी. ॥ ६० ॥ युग्मं ॥

तदाकर्ण्य तदास्येभ्यो निर्मोदा मदनावली । आरोप्य तनयामङ्के सशङ्केन हृदाऽवदत् ॥ ६१ ॥

अन्वयः—तत् आस्येभ्यः तत् आकर्ण्य निर्मोदा मदनावली तनयां अंके आरोप्य सशंकेन हृदा अवदत् . ॥ ६१ ॥

अर्थः—ते सखीओना मुखथी ते वृत्तांत सांभळीने हर्ष रहित थयेली मदनावलीए पुत्रीने खोळामां बेसाडीने शंकायुक्त हृदयथी कह्युं के, ॥ ६१ ॥

विवाहोत्सववैमुख्यं वत्से धत्से कथं वृथा । शोच्या प्रियं विना रामा त्रियामा शशिनं विना ॥ ६२ ॥

अन्वयः—(हे) वत्से ! वृथा विवाह उत्सव वैमुख्यं कथं धत्से ? शशिनं विना त्रियामा, प्रियं विना रामा शोच्या. ॥ ६२ ॥

अर्थः—हे पुत्री ! ( तुं ) फोकट विवाहना उत्सवनी शा माटे मना करे छे ? (केमके) चंद्र विना रात्रिनीपेठे भर्तारविना स्त्री

सारी देखाय नही. ॥ ६२ ॥

रमणी रमणीयापि रमणेन विवर्जिता । ज्ञानश्रीरिव चारित्ररहिता न हि राजते ॥ ६३ ॥

अन्वयः--चारित्र रहिता ज्ञान श्रीः इव रमणेन विवर्जिता रमणीया रमणी अपि हि न राजते. ॥ ६३ ॥

अर्थः—चारित्रविनानी ज्ञानलक्ष्मीनीपेठे भर्तारविनानी मनोहर स्त्री पण खरेखर शोभती नथी. ॥ ६३ ॥

अभर्तृका तृणेभ्योऽपि स्त्री पितॄणां गृहे लघुः । आयाति भ्रातृजायानामपि मुण्डीति वाच्यताम् ॥ ६४॥

अन्वयः-अभर्तृका स्त्री पितॄणां गृहे तृणेभ्यः अपि लघुः, भ्रातृ जायानां अपि " मुंडी " इति वाच्यतां आयाति. ॥ ६४ ॥

अर्थः-भर्तारविनानी स्त्री माबापने घेर तणखलांथी पण हलकी थाय छे, अने भोजाइयो पासे " मुंडको " एवां अपमानने पामे छे, ( अर्थात् भोजाइयो) तेणोने "मुंडकी" (रांड) कही अपमानथी बोलावे छे. ॥ ६४ ॥

कलाहीनः पुमानग्निरज्वालो निर्जला नदी । विपतिर्युवतिश्चेति काप्यर्घ्यं न चतुष्टयम् ॥ ६५ ॥

अन्वयः—कला हीनः पुमान्, अज्वालः अग्निः, निर्जला नदी, च विपतिः युवतिः, इति चतुष्टयं क्व अपि अर्घ्यं न. ॥ ६५ ॥

अर्थः—हुन्नर विनानो पुरुष, ज्वालाविनानो अग्नि, जल विनानी नदी, तथा भर्तार विनानी युवान स्त्री, ए चारे क्यांये पण सन्मान पामतां नथी. ॥ ६५ ॥

स्त्रीणां भवत्यनाथानां बन्धुरप्यभिभूतये । अब्जिनीनामिवाब्जोऽपि चन्द्रोऽनुद्गतभास्वताम् ॥ ६६ ॥

अन्वयः—अनुद्गत भास्वतां अब्जीनीनां अब्जः अपि चन्द्रः इव, अनाथानां स्त्रीणां बंधुः अपि अभिभूतये भवति. ॥ ६६ ॥
अर्थः—ज्यांसुधीमां सूर्य नथी उग्यो, त्यांसुधीमां जलथी उत्पन्न थयेली कमलीनीओने जेम जलथी उत्पन्न थयेलो पण चंद्र (पराभव करे छे) तेम भर्तारविनानी स्त्रीओने सगो भाइ पण पराभव करे छे. ॥ ६६ ॥

**श्रद्धेहि तद्विवाहाय पुत्रि मार्तिं विधेहि मे । गर्भवासेऽपि यद्दत्तः क्लेशलेशोऽपि न त्वया ॥ ६७ ॥**

अन्वयः-तत् (हे) पुत्री ! विवाहाय श्रद्धेहि ? मे आर्तिं मा विधेहि ? यत् गर्भ आवासे अपि त्वया क्लेश लेशः अपि न दत्तः.
अर्थः--माटे हे पुत्री ! तुं विवाह माटे मानी जा ? अने मने कष्ट न आप ? केमके गर्भावासमां पण तें मने जरा पण क्लेश आप्यो नथी. ॥ ६७ ॥

**इत्युक्तिमवधार्येयमजेयममृतैर्वचः । आददे दीनशृङ्गाररसं शृङ्गारसुन्दरी ॥ ६८ ॥**

अन्वयः—इति उक्तिं अवधार्य इयं शृंगारसुंदरी अमृतैः अजेयं दीन शृंगार रसं वचः आददे. ॥ ६८ ॥
अर्थः-एवीरीतनां मातानां वचनो सांभळीने ते शृंगारसुंदरी अमृतथी पण न जीताय एवुं, तथा शृंगाररसने दूर करनारुं वचन बोलीके,

**युक्तमुक्तमिदं मातर्जातनीतिलयं त्वया । दुःखाय तु गुणेनैकेनापि हीनः प्रियः स्त्रियाम् ॥ ६९ ॥**

अन्वयः—हे मातः त्वया जात नीति लयं इदं युक्तं, उक्तं तु एकेन अपि गुणेन हीनः प्रियः स्त्रियां दुःखाय. ॥ ६९ ॥
अर्थः—हे माताजी ! तमोए नीतिना समावेशवाळुं आ (सघळुं) सत्यज कह्युं छे, परंतु एक पण गुण विनानो भर्तार स्त्रीने दुः-

खदाइ (थइ पडे छे.) ॥ ६९ ॥

कुलं यदि न तद्रूपं ते चेत्तन्नामलाः कलाः । चेत्ते च ताश्च तन्मातर्न शीलं सुलभं नृषु ॥ ७० ॥

अन्वयः—(हे) मातः! यदि कुलं तद् रूपं न, चेत् ते तत् अमलाः कलाः न, च चेत् ते च ताः, तत् नृषु शीलं सुलभं न.

अर्थः—हे माताजी! जो कुल (सारुं) होय तो रूप न होय, कदाच ते बन्ने होय, पण निर्मल कला न होय, वळी कदाच तेवुं कुल अने रूप, तेमज तेवी कलाओ पण होय, परंतु पुरुषोमां शीलपालन सुलभ होतुं नथी. ॥ ७० ॥

रूपशाली कलामाली कुलीनश्चैकरागभाक् । न प्राप्यश्चेत्प्रियो नारी तत्कुमार्येव जीर्यतु ॥ ७१ ॥

अन्वयः-चेत् रूप शाली, कला माली, कुलीनः च एकरागभाक् प्रियः न प्राप्यः, तत् नारी कुमारी एव जीर्यतु. ॥ ७१ ॥

अर्थः—कदाच मनोहर रूपवाळो, कलावान्, उत्तम कुलवाळो, अने एक पत्नीव्रतना प्रेमवाळो भर्तार प्राप्त न थाय, तो स्त्रीए कुमारीपणेज जींदगी पूरी करवी (ए सारुं छे.) ॥ ७१ ॥

कर्तुं शक्यं वरे रूपकलाकुलनिरूपणम् । कस्त्विदं वेद यत्तस्य मनः कुत्रापि रंस्यते ॥ ७२ ॥

अन्वयः—वरे रूप कला कुल निरूपणं कर्तुं शक्यं. यत् तस्य मनः कुत्र अपि रंस्यते, इदं तु कः वेद? ॥ ७२ ॥

अर्थः—वरनां रूप, कला अने कुलनी तो परीक्षा (पण) करी शकाय, परंतु तेनुं मन जे क्यांक रमतुं होय, ते बाबतने कोइ जाणी शके? ॥ ७२ ॥

एकस्यां विरतः कन्यामन्यामप्युद्वहेत् पुमान् । नार्याः पतिविरक्ताया मरणं शरणं पुनः ॥ ७३ ॥

अन्वयः—एकस्यां विरतः पुमान् अन्यां कन्यां अपि उद्वहेत्, पति विरक्तायाः नार्याः पुनः मरणं शरणं. ॥ ७३ ॥

अर्थः—एक स्त्रीथी विरक्त थयेलो पुरुष बीजी कन्याने पण परणी शके छे, परंतु पतिथी विरक्त थयेली स्त्रीने तो मृत्युनुंज शरणुं स्वीकारवुं पडे छे. ॥ ७३ ॥

इत्यादिगुणदोषैकविचाराचलचेतना । मातर्नाहं विवाहाय वाच्या किंचित्कदाचन ॥ ७४ ॥

अन्वयः-(हे) मातः ! इत्यादि गुण दोष एक विचार अचल चेतना अहं कदाचन किंचित् विवाहाय न वाच्या. ॥ ७४ ॥

अर्थः—(माटे) हे माताजी ! एरीते गुणो तथा दोषोनाज विचारमां निश्चल मनवाळी एवी जे हुं, तेने कोइ पण दिवसे कंइ पण विवाहसंबंधी (तमारे) कहेवुं नही. ॥ ७४ ॥

एवं निरुत्तरीकृत्य मातरं कातराशया । अह्वायोत्थाय वैलक्ष्यविलोपाय ननाम सा ॥ ७५ ॥

अन्वयः-एवं मातरं निरुत्तरीकृत्य कातर आशया सा अह्वाय उत्थाय वैलक्ष्य विलोपाय ननाम. ॥ ७५ ॥

अर्थः—एरीते (पोतानी) माताने निरुत्तर करीने कायर मनवाळी ते शृंगारसुंदरीए तुरत उठीने विलखापणुं मटाडवामाटे नमस्कार कर्यो. ॥ ७५ ॥

ततो निरादरीभूते भूपे तन्महकर्मसु । कलावलिविलासैकसुखमग्नैव सा स्थिता ॥ ७६ ॥

अन्वयः-ततः तन्मह कर्मसु भूपे निरादरीभूते सा कला आवलि विलास एक सुख मग्ना स्थिता. ॥ ७६ ॥

अर्थः—पछी तेणीना विवाह महोत्सवना कार्यमाटे राजा पण उत्साहरहित थयो, अने ते शृंगारसुंदरी पण कलाओनो समूह शिखवासंबंधी सुखमांज लीन थइने रही. ॥ ७६ ॥

**मुदा स्वप्नेऽन्यदापश्यन्निशान्ते शान्तधीरियम् । आत्मानं कल्पवृक्षस्य वामतः कामतः स्थितम् ॥७७॥**

अन्वयः-अन्यदा मुदा शांतधीः इयं निशांते स्वप्ने कल्पवृक्षस्य वामतः कामतः आत्मानं स्थितं अपश्यत्. ॥ ७७ ॥

अर्थः—एक दिवसे हर्षथी शांत बुद्धिवाळी ते शृंगारसुंदरी रात्रिने छेडे स्वप्नमां कल्पवृक्षनी डावी बाजुए आनंदथी पोताने बेठेली जोवा लागी. ॥ ७७ ॥

**यथेप्सितप्रदो भावी वल्लभस्ते यथेप्सितः । इत्याचचक्षिरे तस्यै स्वप्नव्याख्यां विचक्षणाः ॥ ७८ ॥**

अन्वयः-विचक्षणाः तस्यै स्वप्न व्याख्यां इति आचचक्षिरे, यथा इप्सित प्रदः यथा इप्सितः ते वल्लभः भावी. ॥ ७८ ॥

अर्थः-(पछी) पंडितोए तेणीने ते स्वप्ननो अर्थ एवो कही बताव्यो के, वांछित पदार्थो आपनारो मनगमतो तने भर्तार प्राप्त थशे.

**साचलन्नृविमानेन प्रातः प्रीतिमती ततः । नन्तुमुद्यानसद्मानं पद्मानन्दनमुद्यता ॥ ७९ ॥**

अन्वयः-ततः प्रातः प्रीतिमती सा उद्यान सद्मानं पद्मा नंदनं नंतु उद्यता नृविमानेन अचलत्. ॥ ७९ ॥

अर्थः—पछी प्रभाते प्रीतिवाळी एवी ते शृंगारसुंदरी उद्यानमां जेनुं मंदिर छे, एवा लक्ष्मीना पुत्र कामदेवने नमस्कार करवाने

उत्सुक थइने मीयानामां बेसीने चाली. ॥ ७९॥

केनचित्पथि विक्रीयमाणं माणिक्यपञ्जरे । कंचिद्वचनचातुर्यधीरं कीरं ददर्श सा ॥ ८० ॥

अन्वयः-पथि केनचित् विक्रीयमाणं माणिक्य पंजरे वचन चातुर्य धीरं कंचित् कीरं सा ददर्श. ॥ ८० ॥

अर्थः-मार्गमां कोइकवडे वेचाता, तथा माणिक्यना पांजरामां रहेला, अने वचननी चतुराइमां पंडितपणुं धरनारा कोइक शुकने (पोपटने) तेणीए जोयो. ॥ ८० ॥

तदिष्टवित्तदानेन तं क्रीत्वाकृष्य पञ्जरात् । कलयन्ती करे कीरं कामायतनमाप सा ॥ ८१ ॥

अन्वयः-तत् इष्ट वित्त दानेन तं कीरं क्रीत्वा, पंजरात् आकृष्य करे कलयंती सा काम आयतनं आप. ॥ ८१ ॥

अर्थः—ते माणसने तेनी इच्छामुजब धन आपी ते शुकने वेचातो लेइने, तथा तेने पांजरामांथी कहाडी हाथमां लेइने ते शृंगारसुंदरी कामदेवना मंदिरमां आवी. ॥ ८१ ॥

ततो मरकतश्मश्रुभ्रूकुन्तलकनीनिकः । बालप्रवालनिष्पन्नपदपाणिरदच्छदः ॥ ८२ ॥

पद्मरागदलश्रेणिपिनद्धनखपद्धतिः । कांचित्कांचित्क्रियामङ्गैर्जीवद्भिरिव कल्पयन् ॥ ८३ ॥

हसान्निवाल्पभिन्नोष्ठद्वयमौक्तिकदन्तरुक् । दृशा प्रसादस्मितया पश्यन्निव पुरःसरान् ॥ ८४ ॥

जातरूपमयं बिभ्रज्जातरूपमयं वपुः । दृष्टश्च कामः कीरेण गतश्चोत्पत्य तत्पुरः ॥ ८५ ॥

अन्वयः—ततः मरकत श्मश्रु भ्रु कुंतल कनीनिकः, बाल प्रवाल निष्पन्न पद पाणि रद च्छदः, ॥ ८२ ॥ पद्मराग दल श्रेणि पिनद्ध नख पद्धतिः, जीवद्भिः इव अंगैः कांचित् कांचित् क्रियां कल्पयन्, ॥ ८३ ॥ हसन् इव अल्प भिन्न ओष्ठ दृश्य मौक्तिक कंदरुक्, प्रसाद स्मितया दृशा पुरःसरान् पश्यन् इव, ॥ ८४ ॥ जातरूपं जातरूपमयं वपुः बिभ्रत् अयं कामः कीरेण दृष्टः, च उत्पत्य तत्पुरः गतः. ॥ ८५ ॥ चतुर्भिः कलापकं ॥

अर्थः—पछी (श्याम रंगना) मरकतमणिसरखां डाढीमूछ, भृकुटी, वाळ, तथा आंखोनी कीकीवाळा, नवां कुपलीयांनी बनेली पग, हाथ तथा दांतोनी कांतिवाळा, ॥ ८२ ॥ माणिक्यपत्रनी श्रेणिसरखी जडेली नखमालावाळा, जाणे जीवतां होय नही! एवां उपांगोवडे कंइक कंइक क्रिया करता, ॥ ८३ ॥ जाणे हसता होय नहिं! एम स्वल्प खुल्ला थयेला होठमांथी देखाती मोतीना कंदसरखी (दांतोनी) कांतिवाळा, कृपावडे हसती दृष्टिथी आगळ उभेलाओने जाणे जोता एवा, ॥ ८४ ॥ मनोहर रूपवाळां सुवर्णमय शरीरने धारण करता, एवा आ कामदेवने ते शुके जोया, अने तेथी ते उडीने तेनी पासे गयो. ॥ ८५ ॥ च. क. ॥

ततः कौतूहलाद् दृश्यमानः क्ष्मानाथकन्यया । काममूर्तिं प्रति प्रोचे वाचमित्युत्सुकः शुकः ॥ ८६ ॥

अन्वयः-ततः क्ष्मा नाथ कन्यया कौतूहलात् दृश्यमानः उत्सुकः शुकः काम मूर्तिंप्रति इति वाचं प्रोचे. ॥ ८६ ॥

अर्थः—पछी ते राजपुत्री जेने आश्चर्यथी जोइ रही छे, एवो (ते) उत्सुक थयेलो शुक (ते) कामदेवनी मूर्तिप्रते आवीरीतनुं

वचन बोलवा लाग्यो. ॥ ८६ ॥

**कुमारराज यच्छाशु सुप्रियाणि फलानि मे । सुप्रियं ते पठाम्यार्याद्वयमेतन्निशम्यताम् ॥ ८७ ॥**

अन्वयः-(हे) कुमारराज! मे आशु सुप्रियाणि फलानि यच्छ ? ते सुप्रियं एतत् आर्या द्वयं पठामि, निशम्यतां ? ॥ ८७ ॥

अर्थः—हे राजकुमार! मने तुरत मनगमतां फलो आपो ? (हुं) तमोने आ मनोहर बे आर्याओ कहुं छुं, ते (तमो) सांभळो ?

**अभियुक्तिशुक्तिमुक्तागुणगणयुक्ताः श्रयन्कलाः सकलाः । उपलभरविपुलभारैः किमलंकारैः कृती कुरुते**

अन्वयः-अभियुक्ति शुक्ति मुक्ता गुण गण युक्ताः सकलाः कलाः श्रयन् कृती उपल भर विपुल भारैः अलंकारैः किं कुरुते ?

अर्थः—युक्तिओरूपी छीपमां रहेलां मोतीओ सरखा (निर्मल) गुणोना समूहथी भरेली सर्व कलाओने धारण करतो विचक्षण माणस पत्थरना समूहसरखा अत्यंत भार करनारां आभूषणोने शुं करे ? ॥ ८८ ॥

**फलमविकलदुर्जपजपदुस्तपतपसोर्यदर्जयन्ति जनाः । तत्कृतये निजयुवतिषु सुकृतकृतः सन्तु संतुष्टाः**

अन्वयः-जनाः अविकल दुर्जप जप दुस्तप तपसोः यत् फलं अर्जयंति तत्कृतये सुकृतकृतः निजयुवतिषु संतुष्टाः संतु. ॥८९॥

अर्थः—माणसो निर्मल अने मुश्केलीवाळा जपो, तथा आकरा तपोनुं जे फल मेळवे छे, ते कार्यमाटे ते पुण्यवंतो पोतानी स्त्रीओमांज संतुष्ट थाओ ? ॥ ८९ ॥

तावन्मत्प्रियमेवेदमार्यायुग्मं शुकस्तु कः । इति ध्यानप्लुते सिंहसुते सोऽथकयत्कथाम् ॥ ९० ॥

अन्वयः-इदं आर्यायुग्मं तावत् मत्प्रियं एव, तु शुकः कः ? इति सिंहसुते ध्यान प्लुते सः कथां अकथयत्. ॥ ९० ॥

अर्थः—आ बन्ने आर्याओ तो मने प्रियज छे, हवे ते शुक कयो ? एम ते सनत्कुमार विचारमां पडतां ते माणस कथा आगळ कहेवा लाग्यो के, ॥ ९० ॥

इति कीरोक्तिमाकर्ण्य कन्यां कापि सखी जगौ । आस्ते भुवि युवा दुःखलोपी कोऽपीदृशोऽप्यहो ॥९१॥

अन्वयः-इति कीरोक्तिं आकर्ण्य का अपि सखी कन्यां जगौ, अहो ! ईदृशः अपि कः अपि दुःख लोपी युवा भुवि आस्ते.

अर्थः—एवीरीतनी ते शुकनी वाणी सांभळीने कोइक सखीए ते राजकन्याने कह्युं के, आवो पण कोइक दुःख मटाडनारो युवान पुरुष पृथ्वीपर विद्यमान लागे छे, ॥ ९१ ॥

स्मरं भ्रमात्कुमारेति संबोध्यार्यायुगं पठन् । रूपं कुलं वयः शीलं गुणान्यस्य शुकोऽभ्यधात् ॥ ९२ ॥

अन्वयः-भ्रमात् स्मरं कुमार इति संबोध्य आर्यायुगं पठन् शुकः यस्य रूपं, कुलं, वयः, शीलं, गुणान् अभ्यधात्. ॥ ९२ ॥

अर्थः-अथवा भ्रांतिथी (आ) कामदेवने हे कुमार ! एम संबोधीने बे आर्याओ कहेतांथकां आ शुके जेनां रूप, कुल, वय तथा शील (विगेरे) गुणो कही संभळाव्या छे. ॥ ९२ ॥ युग्मं ॥

अथ कीरकुमारासि त्वं कुमारस्य कस्य रे । तथ्यं वद यथा दद्यां हृद्यां तव फलावलीम् ॥ ९३ ॥

अन्वयः-अथ रे कीर कुमार ! त्वं कस्य कुमारस्य असि, तथ्यं वद ? यथा तव हृद्यां फल आवलीं दद्यां. ॥ ९३ ॥

अर्थः-हवे हे शुककुमार ! तुं कया कुमारनी (मालिकीनो) छे ? खरुं बोल ? के जेथी तने (हुं) मनोहर फलोनी श्रेणि आपुं. ॥९३॥

इति पृष्टः करे कृत्वा कीरः कन्यकया तया । स पपाठ सुधाक्तानि सूक्तान्येव मुहुर्मुहुः ॥ ९४ ॥

अन्वयः-तया कन्यकया करे कृत्वा इति पृष्टः सः कीरः मुहुः मुहुः सुधाक्तानि सूक्तानि एव पपाठ. ॥ ९४ ॥

अर्थः---ते राजकन्याये हाथमां लेइने एरीते पूछेलो ते शुक वारंवार अमृतसरखां उत्तम काव्योज बोलवा लाग्यो. ॥ ९४ ॥

ततस्तिरश्चां चैतन्यचातुरी क्वेति चेतनी । किंचिदञ्चितपञ्चेषुः सा विचित्ता गृहं गता ॥ ९५ ॥

अन्वयः—ततः तिरश्चां चैतन्य चातुरी क्व ? इति चेतनी सा किंचित् अंचित पंचेषुः विचित्ता गृहं गता. ॥ ९५ ॥

अर्थः-पछी तिर्यंचोने (एवी) स्वाभाविक हुशीयारी क्यांथी होय ? एम विचारती एवी ते शृंगारसुंदरी जरातरा कामदेवनी पूजा करीने शून्य मनथी घेर गइ. ॥ ९५ ॥

न तल्पे न सखीजल्पे न वने न निकेतने । न जले न स्थलेऽप्यस्या मनः क्वचन निर्वृतम् ॥ ९६ ॥

अन्वयः-अस्याः मनः न तल्पे, न सखी जल्पे, न वने, न निकेतने, न जले, न स्थले, क्वचन अपि न निर्वृतं. ॥ ९६ ॥

अर्थः—तेणीनुं मन, नही शय्यामां, न सखीओनां वचनोमां, न बगीचामां, न घरमां, न जलमां, के न स्थलमां, एम क्यांये पण गोठवा न लाग्युं. ॥ ९६ ॥

**तुलितार्कच्छविरहो विरहोऽस्या हृदि ज्वलन् । ददौ निद्रापनोदाय मदनस्य दिनोदयम् ॥ ९७ ॥**

अन्वयः–अहो ! तुलित अर्क च्छविः अस्याः हृदि ज्वलन् विरहः निद्रा अपनोदाय मदनस्य दिन उदयं ददौ. ॥ ९७ ॥

अर्थः—अहो ! सूर्यनी छबीनी तुलना करनारो, एवो तेणीना हृदयमां बळतो विरहाग्नि निद्राना नाशमाटे कामदेवना दिवसने उदय आपवा लाग्यो. (अर्थात् तेणीना हृदयमां कामदेव उत्पन्न थयो. ) ॥ ९७ ॥

**स कुमारः क्व रे कीर जल्पन्तीति प्रतिक्षणम् । मनोमनोभवभवव्याधिमत्तमधत्त सा ॥ ९८ ॥**

अन्वयः—रे कीर ! सः कुमारः क्व ? इति प्रतिक्षणं जल्पंती सा मनोभव भव व्याधि मत्तं मनः अधत्त. ॥ ९८ ॥

अर्थः—अरे शुक ! ते राजकुमार क्यां छे ? एम क्षणे क्षणे बोलती एवी ते शृंगारसुंदरी कामदेवथी उत्पन्न थयेली पीडाने लीधे उन्मत्त थयेलां मनने धारण करवा लागी. ॥ ९८ ॥

**क्रमान्निह्नुतवह्निश्रीर्विरहस्तां व्यहस्तयत् । पुष्पचापधरापस्य प्रताप इव दुःसहः ॥ ९९ ॥**

अन्वयः—क्रमात् निह्नुत वह्नि श्रीः, पुष्प चाप धरापस्य दुःसहः प्रतापः इव विरहः तां व्यहस्तयत् . ॥ ९९ ॥

अर्थः—अनुक्रमे अग्निनी शोभानो ( पण ) तिरस्कार करनारो, तथा कामदेवरूपी राजाना सहन न थइ शके एवा प्रताप सरखो

( ते राजकुमारनो) विरह तेणीने बेभान करवा लाग्यो. ॥ ९९ ॥

तदङ्गेषु हिमं सख्यो यद्यदार्तिभिदे ददुः । तत्तत्तदूष्मणेवाशु पतदेवापदा(ऽऽ)पदम् ॥ २०० ॥

अन्वयः—सख्यः अर्तिभिदे यत् यत् हिमं तदंगेषु ददुः, तत् तत् तदुष्मणा इव आशु पतत् आपदं एव आपत्. ॥ २०० ॥

अर्थः–सखीओए दुःख मटाडवा माटे जे जे ठंडा पदार्थो तेणीना शरीरपर लगाडवा मांड्या, ते ते पदार्थो जाणे कामानलथी तुरत गळी जइने (तेणीने) दुःखरूपज थवा लाग्या. ॥ २०० ॥

अमान्मन्ये मदङ्गेषु व्याप तापोऽखिलं जगत् । उष्णाः किमन्यथा चन्द्रजलजन्मदलस्रजः ॥ १ ॥

निशेश त्वं निशाहीनो दीनो भवसि तत्कथम् । वियुक्तान्दहसि स्युर्वा नराः सहजनिष्ठुराः ॥ २ ॥

जले कुमुदिनीप्रेम्णा प्राप्तमादाय पाणिना । दलयध्वं विधुं सख्यः साक्षान्मत्तापकारिणम् ॥ ३ ॥

जानानापि वियोगार्तिं पद्मिनीशस्य पद्मिनि । किं मां दहसि हा कष्टं स्त्रियोऽपि स्त्रीषु निष्कृपाः ॥ ४ ॥

सख्यः स्फुटति मे वक्षः साधु स्फुटतु वा जवात् । स कुमारः स्माराकारः प्रेक्ष्यते यदि हृद्गतः ॥ ५ ॥

इत्यादि बहु जल्पन्ती पतन्ती मूर्छया मुहुः । सुदती रुदतीभिः सा वयस्याभिरलोक्यत ॥ ६ ॥

अन्वयः—मन्ये, मदंगेषु अमान् तापः अखिलं जगत् व्याप, अन्यथा चंद्र जलजन्म दल स्रजः उष्णाः किं? ॥ १ ॥ (हे)

निशेश ! त्वं निशा हीनः दीनः भवसि, तत् वियुक्तान् कथं दहसि ? वा नराः सहज निष्ठुराः स्युः, ॥ २ ॥ (हे) सख्यः ! कुमुदिनी प्रेम्णा जले प्राप्तं, मत्ताप कारिणं विधुं पाणिना आदाय साक्षात् दलयध्वं ? ॥ ३ ॥ ( हे ) पद्मिनि ! पद्मिनी ईशस्य वियोग अर्तिं जानाना अपि मां किं दहसि ? हा ! कष्टं ! स्त्रियः अपि स्त्रीषु निष्कृपाः, ॥ ४ ॥ ( हे ) सख्यः ! मे वक्षः स्फुटति, वा जवात् स्फुटतु साधु, यदि हृद्गतः स्मर आकारः सः कुमारः प्रेक्ष्यते. ॥ ५ ॥ इत्यादि बहु जल्पंती, मूर्छया मुहुः पतंती, सुदती सा रुदतीभिः वयस्याभिः अलोक्यत. ॥६ ॥ षड्भिः कुलकं ॥

अर्थः—(हे सखीओ !) हुं एम मानुं छुं के, मारा शरीरमां न समावाथी ताप समस्त जगतमां फेलायो छे, नहीतर चंद्र, तथा कमलपत्रोनी माळाओ ( मने ) उष्ण केम लागे ? ॥ १ ॥ हे चंद्र ! तुं (पण) रात्रिना वियोगथी ज्यारे झांखो थाय छे, तो पछी वियोगीओने शा माटे बाळे छे ? अथवा पुरुषो स्वभावथीज कठोर मनवाळा होय छे. ॥ २ ॥ हे सखीओ ! कुमुदिनीना प्रेमथी जलमां आवेला, अने मने संताप उपजावनारा (आ) चंद्रने हाथमां पकडीने मारी नजर आगळ तोडी नाखो ? ॥ ३ ॥ हे कमलिनी ? (तारा) स्वामी एवा सूर्यना वियोगनी पीडाने जाण्या छतां पण (तुं) मने शा माटे बाळ्या करे छे ? अरेरे ! स्त्रीओ पण स्त्रीओ प्रत्ये (ईर्षाथी) निर्दय थइ बेसे छे. ॥ ४ ॥ हे सखीओ ! मारुं हृदय फाटी जाय छे, अथवा मारा हृदयमां रहेला अने कामदेवसरखा आकारवाळा ते कुमार जो देखाइ जता होय, तो मारुं ते हृदय पण तुरतज फाटी जाय तो सारुं, ॥ ५ ॥ एम घणुं घणुं बोलती, मूर्छावडे वारंवार पडती अने खेद पामती ते शृंगारसुंदरीने तेणीनी रडती सखीओए जोइ. ॥६॥ षड्भिः कुलकं ॥

रे कीर क्व कुमारो मां मुक्त्वा यात्यनुमीयताम् ॥ इति निद्रालयान्तेषु सा स्वप्नानलपन्मुहुः ॥ ७ ॥

अन्वयः—रे कीर! मां मुक्त्वा कुमरः क्व याति? अनुमीयतां? इति निद्रा लय अंतेषु सा मुहुः स्वप्नान् अलपत्. ॥ ७ ॥

अर्थः—अरे शुक! मने छोडीने (ते) कुमार क्यां जाय छे? (तेनुं तुं) अनुमान कर? एम निद्रानी अंदर ते वारंवार स्वप्नोने बोलवा लागी. ॥ ७ ॥

तीव्रतापभृतस्तस्या वयस्याः परितः स्थिताः । अस्रैरधारयन्धारायन्त्रपुत्रीचयश्रियम् ॥ ८ ॥

अन्वयः—परितः स्थिताः, तीव्र ताप भृतः तस्याः सख्यः अस्रैः धारा यंत्र पुत्री चय श्रियं अधारयन् ॥ ८ ॥

अर्थः—आसपास बेठेली, तथा अत्यंत खेदने धारण करतो एवी तेणीनी सखीओ आंसुओवडे फुआरानी पुतळीओना समूहनी शोभाने धारण करवा लागी. ॥ ८ ॥

अथेदं मेदिनीशेन मत्वा दिष्टैः पुरे चरैः । अवगन्तुं कुमारं तं व्यलोकि शुकविक्रयी ॥ ९ ॥

अन्वयः—अथ इदं मत्वा मेदिनी ईशेन दिष्टैः चरैः तं कुमारं अवगंतु शुक विक्रयी पुरे व्यलोकि. ॥ ९ ॥

अर्थः—पछी आ हकीकत जाणीने राजाए हुकम करेला बातमीदारो ते कुमारने ओळखवामाटे ते शुकने वेचनारा माणसनी नगरमां शोध करवा लाग्या. ॥ ९ ॥

चिरं निरीक्ष्यमाणोऽपि क्वापि प्रापि नरैर्न सः । शुद्धधर्मोपदेष्टेव दूरभव्यैः शरीरिभिः ॥ १० ॥

अन्वयः–दूर भव्यैः शरीरिभिः शुद्ध धर्म उपदेष्टा इव, नरैः चिरं निरीक्ष्यमाणः अपि सः क अपि न प्रापि. ॥ १० ॥
अर्थः—दूरभवी माणसो निर्मल धर्मनो उपदेश करनारा (गुरुने) जेम न मेळवी शके, तेम ते माणसोए घणा काळसुधी शोध्या छतां पण तेओ तेने क्यांयें पण मेळवी शक्या नही. ॥ १० ॥

**सद्यः क्वचिदनासाद्य रसाविभुरसाविमम् । समारब्ध कुमारस्य लब्धयेऽस्य स्वयंवरम् ॥ ११ ॥**

अन्वयः—असौ रसाविभुः इमं कचित् अनासाद्य अस्य कुमारस्य सद्यः लब्धये स्वयंवरं समारब्ध. ॥ ११ ॥
अर्थः–पछी ते राजाए तेने क्यांयें पण न मेळववाथी, ते कुमारने तुरत मेळववामाटे स्वयंवरमंडपनो प्रारंभ कर्यो छे. ॥ ११ ॥

**सद्यो विमुच्य कौमार्यं ये राज्यं भेजिरे नृपाः । गुणोदाराः कुमाराश्च ये तान्भूपोऽयमाह्वयत् ॥ १२ ॥**

अन्वयः–कौमार्यं विमुच्य ये नृपाः सद्यः राज्यं भेजिरे, च ये गुण उदाराः कुमाराः तान् अयं भूपः आह्वयत्. ॥ १२ ॥
अर्थः—कुमारपणुं छोडीने जे राजाओ ताजेतरमां राजगादी पाम्या छे, तथा उत्तम गुणोवाळा जेओ (हजु) कुमारअवस्थामां छे, तेओने आ राजाए बोलाव्या छे. ॥ १२ ॥

**तनयो नयसारस्य मन्त्रिणः सागराभिधः । त्वामाह्वातुमहं नाथ प्रहितस्त्वत्पितुः पुरम् ॥ १३ ॥**

अन्वयः–हे नाथ! नयसारस्य मंत्रिणः सागराभिधः अहं तनयः, त्वां आह्वातुं त्वत्पितुः पुरं प्रहितः. ॥ १३ ॥

अर्थः—हे स्वामी! नयसारनामना मंत्रिनो हुं सागरनामे पुत्र छुं, तमोने बोलाववामाटे (मने) तमारा पिताना नगरमां मोकल्यो छे.

**आज्ञातोऽसि कृतिन्राज्ञा त्वज्जयोत्कर्षहर्षिणा । तद्वासन्तीं पुरीमेतुमुरीकुरुतरां त्वराम् ॥ १४ ॥**

अन्वयः—हे कृतिन्! त्वत् जय उत्कर्ष हर्षिणा राज्ञा आज्ञातः असि, तत् वासंतीं पुरीं एतुं त्वरां उररी कुरुतरां? ॥ १४ ॥
अर्थः—हे चतुर कुमार! तमारा जयनी उन्नतिथी हर्षित थयेला राजाए (तमारा पिताए) आज्ञा आपी छे, माटे (ते) वासंती नामनी नगरीमां आववा माटे (तमो) उतावळ करो? ॥ १४ ॥

**न तत्रायामि वामाक्ष्या तयान्यस्मिन्वृते यतः । ममाभिभव एव स्यादिदं वदति भूपजे ॥ १५ ॥**
**स जगौ वीरवर्य त्वं वर्य एव तया यतः । त्वयि दृष्टे ममाद्याभूदुद्यानमदनभ्रमः ॥ १६ ॥ युग्मं ॥**

अन्वयः—तत्र न आयामि, यतः तया वामाक्ष्या अन्यस्मिन् वृते मम अभिभवः एव स्यात्, इदं भूपजे वदति, ॥ १५ ॥ सः जगौ (हे) वीरवर्य! तया त्वं वर्यः एव, यतः त्वयि दृष्टे अद्य मम उद्यान मदन भ्रमः अभूत्. ॥ १६ ॥ युग्मं ॥
अर्थः—(हुं) त्यां नही आवुं, केमके ते राजकन्या जो बीजा वरने वरे, तो मारुं अपमानज थाय, एरीते ते सनत्कुमारे कहेवाथी, ॥ १५ ॥ ते मंत्रिपुत्रे कह्युं के, हे पराक्रमशाली कुमार! ते राजकन्या तमोनेज वरसे, केमके तमोने जोवाथी आजे मने (पण) ते बगीचामां रहेला कामदेवनोज भ्रम उत्पन्न थयो छे. ॥ १६ ॥ युग्मं ॥

ईदृग्रूपं विहाय त्वां कन्या सान्यं वृणोति चेत् । तत्का तव पराभूतिस्तया किमगुणज्ञया ॥ १७ ॥

अन्वयः-ईदृग्रूपं त्वां विहाय सा कन्या चेत् अन्यं वृणोति, तत् तव का पराभूतिः ? अगुणज्ञया तया किं ? ॥ १७ ॥

अर्थः—आवा ( मनोहर ) रूपवाळा तमोने छोडीने ते राजकन्या जो बीजाने वरे, तो तेमां तमारुं शुं अपमान थवानुं हतुं ? केमके गुणोने नही जाणनारी एवी ते राजकन्याथी (तमोने) शुं लाभ थवानो हतो ? ॥ १७ ॥

इत्याद्युक्तिभरैः स्वस्य दर्शयन्मन्त्रिपुत्रताम् । कुमारं सागरः कीर्तिसागरं नगरेऽनयत् ॥ १८ ॥

अन्वयः—इत्यादि उक्तिभरैः स्वस्य मंत्रिपुत्रतां दर्शयन् सागरः कीर्ति सागरं कुमारं नगरे अनयत्. ॥ १८ ॥

अर्थः—इत्यादिक वचनोना समूहोथी पोतानुं मंत्रिपुत्रपणुं देखाडतो ते सागर कीर्तिना महासागरसरखा ते सनत्कुमारने (पोताना ) नगरमां लइ गयो. ॥ १८ ॥

वासन्तीवासवेनाथ संमुखं समुपेयुषा । कृतसत्कृतिनास्थापि स धामनि सधामनि ॥ १९ ॥

अन्वयः—अथ संमुखं समुपेयुषा वासंती वासवेन कृत सत्कृतिना सः सधामनि धामनि अस्थापि. ॥ १९ ॥

अर्थः-पछी सन्मुख आवेला एवा ते वासंतीनगरीना राजाए सत्कारपूर्वक ते सनत्कुमारने तेजस्वी (उमदा) मकानमां उतारो आप्यो.

यैर्न्यभालि प्रभालिप्तनभास्तत्र स भूपभूः । वृथान्यवीरागमनं ते नरा मेनिरेतराम् ॥ २० ॥

अन्वयः–यैः तत्र प्रभा लिप्त नभाः सः भूपभूः न्यभालि, ते नराः अन्य वीर आगमनं वृथा मेनिरेतरां. ॥ २० ॥

अर्थः—जे माणसोए त्यां कांतिवडे आकाशने (पण) तेजस्वी करनारा एवा ते राजकुमारने जोयो, ते माणसो (त्यां) बीजा शूरवीर वीरोना आगमनने नकामुं मानवा लाग्या. ॥ २० ॥

**तदा शृङ्गारसुन्दर्यै चारवर्यैरुपागतः । कुमारः सोऽयमाचख्ये व्याचख्ये च गुणे गुणे ॥ २१ ॥**

अन्वयः—तदा चारवर्यैः सः अयं उपागतः कुमारः शृंगारसुंदर्यै आचख्ये, च गुणे गुणे व्याचख्ये. ॥ २१ ॥

अर्थः—( वळी ) ते वखते गुप्तचरोए ते आ आवेला कुमारनुं वृत्तांत शृंगारसुंदरीने कही संभळाव्युं, तथा तेना दरेके दरेक गुणोनी प्रशंसा करी. ॥ २१ ॥

**अथ पृथ्वीशपुत्री सा प्रैषयच्चम्पिकां सखीम् । ज्ञातुं वृत्तानि वीराणां सर्वेषां शर्वरीमुखे ॥ २२ ॥**

अन्वयः–अथ सा पृथ्वीश पुत्री सर्वेषां वीराणां वृत्तानि ज्ञातुं शर्वरी मुखे चंपिकां सखीं प्रैषयत्. ॥ २२ ॥

अर्थः—पछी ते राजकुमारीए ते सघळा शूरवीरोनां आचरणो जाणवामाटे संध्या काळे ( पोतानी ) चंपिकानामनी सखीने (तेओना उताराओमां ) मोकली. ॥ २२ ॥

**सा यात्वा यामिनीयामयमले समुपेयुषी । सुप्ताखिलसखीलोकां प्राह भूपसुतां प्रति ॥ २३ ॥**

अन्वयः–सा यात्वा यामिनी याम यमले समुपेयुषी सुप्त अखिल सखी लोकां भूप सुतां प्रति प्राह. ॥ २३ ॥

अर्थः—ते(त्यां) जइ बे पहोर रात्रि गयाबाद पाछी आवीने ( बीजी ) सघळी सखीओ निद्रावश होते छते राजकुमारीने कहेवा लागी के, ॥ २३ ॥

भूपप्रहितसत्कारधारिनारीशतान्विता । न्यभालयं भुजभृतः समस्तानपि तानहम् ॥ २४ ॥

अन्वयः—भूप प्रहित सत्कार धारि नारी शत अन्विता अहं समस्तान् अपि भुजभृतः न्यभालयं ॥ २४ ॥

अर्थः—राजाए मोकलेला (तांबूल आदिक ) सत्कारना पदार्थोने उपाडनारी एकसो स्त्रीओनी साथे जइने में ते सर्वे राजकुमारोनी परीक्षा करी छे. ॥ २४ ॥

कन्दर्पहस्तशस्त्रीषु स्त्रीषु तासु गतास्वमी । विविधां विदधुर्वीरा विकृतिं कृतिताकृते ॥ २५ ॥

अन्वयः—कंदर्प हस्त शस्त्रीषु तासु स्त्रीषु गतासु अमी वीराः कृतिताकृते विविधां विकृतिं विदधुः. ॥ २५ ॥

अर्थः-कामदेवनी कटारीसरखी एवी ते स्त्रीओ त्यां गये छते ते शूरवीरो कामचेष्टामाटे नाना प्रकारना विकारोने धारण करवा लाग्या.

कलाकलापरुचिरः सुरोचिर्लोचनप्रियः । कश्चिदात्मनि भूपेन्दुः षिङ्गतामकलङ्कयत् ॥ २६ ॥

अन्वयः-कला कलाप रुचिरः, सुरोचिः, लोचन प्रियः कश्चित् भूपेंदुः आत्मनि षिड्गतां अकलंकयत्. ॥ २६ ॥

अर्थः-कलाओना समूहथी मनोहर, उत्तम कांतिवाळो, तथा आंखोने आनंद आपनारो, एवो कोइक राजा पोतामां लंपटपणानुं कलंक धारण करतो हवो. ॥ २६ ॥

कलानां पटलं रूपं गुणानां च गणं परः । मदेनादूषयन्मद्यबिन्दुनेव पयोघटीम् ॥ २७ ॥ ॥

अन्वयः-परः कलानां पटलं, रूपं, च गुणानां गणं, मद्य बिंदुना पयः घटीं इव मदेन अदूषयत्. ॥ २७ ॥

अर्थः---(वळी) बीजो ( कोइक राजकुमार पोतानी ) कलाओना समूहने, रूपने, अने गुणोना समूहने, मद्यना बिंदुथी जेम दूधना घडाने, तेम मदवडे दूषित करतो हतो. ॥ २७ ॥

कीर्तिं कलाधुनीधौतां गुणस्यूतां पटीमिव । व्यधान्मित्रक्रुधा कश्चिद् धूम्ययेव मलीमसाम् ॥ २८ ॥

अन्वयः—कश्चित् कला धुनी धौतां, गुण स्यूतां पटीं इव कीर्तिं धूम्यया इव मित्र क्रुधा मलिमसां व्यधात्. ॥ २८ ॥

अर्थः—(वळी) कोइक राजकुमार तो कलाओरूपी नदीमां धोएली, तथा गुणोवडे (दोरावडे) सीवेली साडी सरखी ( पोतानी ) कीर्तिने धूमाडासरखा मित्रपरना क्रोधवडे मलीन करतो हतो. ॥ २८ ॥

किमप्यजल्पन्हृद्याङ्गः कोऽपि स्तब्धत्वनिश्चलः । अविज्ञ एव विज्ञातो मया ग्रावपुमानिव ॥ २९ ॥

अन्वयः-हृद्य अंगः कः अपि किं अपि अजल्पन् स्तब्धत्व निश्चलः मया ग्राव पुमान् इव अविज्ञ एव विज्ञातः ॥ २९ ॥

अर्थः-मनोहर शरीरवाळो कोइक तो कंइ पण बोल्याविना स्तब्धपणाथी निश्चल थयेलो हतो, अने में तो तेने पत्थरनां पुतळां सरखो मूर्खज जाण्यो. ॥ २९ ॥

इति ताभिः समं राजलोकमालोकमानया । प्रथयन्त्या यथावस्थं मिथस्तत्कीर्तिकीर्तनम् ॥ ३० ॥

श्रूयते यद्यशः शीलकुलरूपकलामयम्। सौधं सनत्कुमारस्य तस्य सोत्कण्ठमागतम् ॥ ३१ ॥ युग्मम् ॥

अन्वयः—इति ताभिः समं राजलोकं आलोकमानया, यथावस्थं तत्कीर्ति कीर्तनं प्रथयंत्या, ॥ ३० ॥ शील कुल रूप कला मयं यद्यशः श्रूयते, तस्य सनत्कुमारस्य सौधं सोत्कंठं आगतं ॥ ३१ ॥ युग्मं ॥

अर्थः—ए रीते ते स्त्रीओनी साथे राजकुमारोने जोती, तथा योग्यता मुजब तेओनी कीर्तिनी प्रशंसा करती, ॥ ३० ॥ शील, कुल, रूप, तथा कलाथी युक्त थयेलो जेनो यश संभळायछे, एवा ते सनत्कुमारना मेहेलमां हुं उत्कंठासहित आवी. ॥३१॥युग्मं॥

मध्येधाम वयं यामस्तन्मुखालोकनोन्मुखाः। यावत्तावन्महेन्द्रेणाप्यनुच्छिष्टं वहन्महः ॥ ३२ ॥

स कुमारः कलावद्भिर्भूरिभिर्भूषितान्तिकः। न्यभाल्यत सभावर्ती चक्रवर्ती शुभात्मनाम् ॥ ३३ ॥ युग्मं.

अन्वयः—तत् मुख आलोकन उन्मुखाः वयं यावत् मध्ये धाम यामः, तावत् महेन्द्रेण अपि अनुच्छिष्टं महः वहन्, ॥ ३२ ॥ भूरिभिः कलावद्भिः भूषित अंतिकः, शुभ आत्मनां चक्रवर्ती सः कुमारः न्यभाल्यत ॥ ३३ ॥ युग्मं ॥

अर्थः—ते राजकुमारनुं मुख जोवाने उत्कंठित थयेली एवी अमो ज्यारे तेना मेहेलमां पहोंची, त्यारे इन्द्रे पण नही भोगवेलां तेजने धारण करतो, ॥ ३२ ॥ अने घणा कलावान मनुष्योवडे शोभायुक्त थयेला नजीकना भागवाळो, तथा सज्जनोमां चक्रवर्ति सरखो ते सनत्कुमार अमारा जोवामां आव्यो. ॥ ३३ ॥ युग्मं ॥

लोलमौलितया चञ्चच्चूडामणिमरीचिभिः । आरात्रिकमिवातन्वन्कवीनां काव्यसंपदः ॥ ३४ ॥

चालयन्नङ्गुलीं रङ्गन्नखांशुविततांशुकाम् । वाग्गेयकारिणां गीतेः पताकामिव कल्पयन् ॥ ३५ ॥

चमत्कारकरानेवं स गृह्णन्गुणिनां गुणान् । चमत्कारकरं दानं ददानोऽनृणतां ययौ ॥३६॥ त्रिभिर्विशेषकम्

अन्वयः-लोल मौलितया चंचत् चूडामणि मरीचिभिः कवीनां काव्य संपदः आरात्रिकं आतन्वन् इव, ॥ ३४ ॥ वाग् गेयकारिणां गीतेः रंगत् नख अंशु वितत अंशुकां पताकां कल्पयन् इव, अंगुलीं चालयन् ॥ ३५ ॥ एवं गुणिनां चमत्कार करान् गुणान् गृह्णन् सः चमत्कारकरं दानं ददानः अनृणतां ययौ ॥ ३६ ॥ त्रिभिर्विशेषकं ॥

अर्थः—मस्तक धुणाववाथी चळकता मुकुटना किरणोवडे कविओनी काव्यचमत्कृतिनी जाणे आरती उतारतो, ॥ ३४ ॥ गवैयाओना संगीतनी चळकता नखोना किरणोरूपी विस्तीर्ण कपडांवाळी जाणे पताका उडाडतो होय नही! तेम आंगळी हलावतो, ॥ ३५ ॥ तथा ए रीते गुणवानोना चमत्कारी गुणोने ग्रहण करतो एवो ते सनत्कुमार ( तेओने ) आश्चर्य कारक दान आपतो थको करजमुक्त थतो हतो. ॥ ३६ ॥ त्रिभिर्विशेषकं ॥

मुधाकृतसुधावृष्ट्या दृष्ट्या प्रीतिप्रसन्नया । तदा सेवकतातापं सेवकानां लुलोप सः ॥ ३७ ॥

अन्वयः-सः तदा मुधाकृत सुधा वृष्ट्या, प्रीति प्रसन्नया दृष्ट्या सेवकानां सेवकता तापं लुलोप. ॥ ३७ ॥

अर्थः—ते कुमार ते वखते चंद्रमांथी झरती अमृतवृष्टिसरखी, तथा प्रेमथी प्रसन्न थयेली दृष्टिवडे नोकरोनी नोकरीना खेदने दूर करतो हतो. ॥ ३७ ॥

**तदा कुमारः कुतुकी यत्र यत्र दृशं ददौ । विज्ञानं दर्शयामास स्वं स्वं वैज्ञानिकः स सः ॥ ३८ ॥**

अन्वयः-तदा कुतुकी कुमारः यत्र यत्र दृशं ददौ, सः सः वैज्ञानिकः स्वं स्वं विज्ञानं दर्शयामास. ॥ ३८ ॥

अर्थः—( वळी ) ते वखते ते कुतुहली कुमार जेनापर ( पोतानी ) दृष्टि करतो हतो, ते ते विज्ञानी पोतपोतानुं विज्ञान देखाडतो हतो. ॥ ३८ ॥

**नृपपुत्रि क्षणे तत्र चित्रविद्याविशारदः । कोऽपि चित्रपटं पाणौ कुमारस्य समार्पयत् ॥ ३९ ॥**

अन्वयः—(हे) नृपपुत्रि ! तत्र क्षणे चित्र विद्या विशारदः कः अपि कुमारस्य पाणौ चित्रपटं समार्पयत्. ॥ ३९ ॥

अर्थः—हे राजपुत्रि ! ते समये चित्रकलामां कुशळ एवा कोइक (चित्रकारे) ते राजकुमारना हाथमां (एक) चित्रपट आप्युं. ॥३९॥

**तं वीक्ष्य विस्मितोऽपृच्छन्नृपभूर्लिपिकारिणम् । चित्रसंवादिनी तस्या रूपश्रीरस्ति वा न वा ॥ ४० ॥**

अन्वयः-तं वीक्ष्य विस्मितः नृपभूः लिपि कारिणं अपृच्छत्, तस्याः रूप श्रीः चित्र संवादिनी अस्ति वा न वा. ॥ ४० ॥

अर्थः—ते चित्र जोइने आश्चर्य पामेला ते राजकुमारे ते चिताराने पूछयुं के, ते कन्याना रूपनी शोभा आ चित्रमां चितर्या मुजब छे, के नही ? ॥ ४० ॥

स जगाद क्व संवादस्तस्याश्चित्रेण वर्तताम् । शक्या रचयितुं केन चित्रे चन्द्रस्य चन्द्रिका ॥ ४१ ॥

अन्वयः—सः जगाद, चित्रेण तस्याः संवादः क्व वर्ततां ? चंद्रस्य चंद्रिका चित्रे केन रचयितुं शक्या ? ॥ ४१ ॥

अर्थः--( त्यारे ) ते चित्रकार बोल्यो के, चित्रमां तेणीनी तुलना क्यांथी आवी शके ? ( कारण के) चंद्रनी चांदनीने चित्रमां कोण चीतरी शके ? ॥ ४१ ॥

दृग्लीलाद्युज्झितं क्वास्तु चित्रकर्म तया समम् । यस्या दृश्यार्धदेहत्वात्प्रतिबिम्बेऽपि नोपमा ॥ ४२ ॥

अन्वयः–दृग् लीला आदि उज्झितं चित्र कर्म तया समं क्व अस्तु ? यस्याः दृश्य अर्ध देहत्वात् प्रतिबिंबे उपमा अपि न

अर्थः–आंखोना विलासआदिक विनानुं चित्रकार्य तेणीनी बरोबरी क्यांथी करी शके ? वळी जेणीनुं फक्त अर्धुं शरीरज जोवामां आववाथी चित्रमां तेणीनी उपमा पण न आवी शके. ॥ ४२ ॥

नेदृशी क्वापि कान्तास्ति कुमार त्रिजगत्यपि । विश्वरूपाणि नः पाणिवर्तीनि लिपिशास्त्रतः ॥ ४३ ॥

अन्वयः—(हे) कुमार ! इदृशी कांता त्रिजगति अपि क्व अपि न अस्ति, लिपि शास्त्रतः विश्वरूपाणि नः पाणि वर्तीनि. ॥ ४३ ॥

अर्थः—(वळी) हे कुमार ! आवी स्त्री त्रणे जगतमां क्यांयें पण नथी, चित्रशास्त्रना ज्ञानथी जगतनां सर्व स्वरूपो अमारी तो हथेळीमांज रम्या करे छे. ॥ ४३ ॥

इत्याकर्ण्य चिरं चित्रे पश्यन् कामपि तामयम् । कुमारः कामबाणार्त इव मौलिमकम्पयत् ॥ ४४ ॥

अन्वयः-इति आकर्ण्य अयं कुमारः चित्रे तां कां अपि चिरं पश्यन् काम बाण आर्तः इव मौलिं अकंपयत्. ॥ ४४ ॥

अर्थः—एम सांभळीने ते सनत्कुमार चित्रमां चित्रेली ते कोइक स्त्रीने घणा काळसुधी जोइ रह्यो, अने जाणे कामदेवना बाणथी पीडित थयो होय नही ! तेम (पोतानुं) मस्तक कंपाववा लाग्यो. ॥ ४४ ॥

क्षणं क्षुभितमात्मानमथ संयम्य धीरधीः । चित्रं संवृत्य चित्रज्ञं कुमारः सच्चकार तम् ॥ ४५ ॥

अन्वयः—अथ क्षुभितं आत्मानं क्षणं संयम्य धीरधीः कुमारः चित्रं संवृत्य तं चित्रज्ञं सच्चकार. ॥ ४५ ॥

अर्थः—पछी (कामथी) व्याकुल थयेला पोताना आत्माने क्षणवारसुधी काबुमां राखीने धैर्ययुक्त बुद्धिवाळा ते सनत्कुमारे (ते) चित्रने वींटी मेलीने ते चित्रकारनो सत्कार कर्यो. ॥ ४५ ॥

अस्मासु प्रतिहारोक्तिविदितासु ततः कृती । स न्ययुंक्त सितं हर्षस्मितसंहर्षिलोचनम् ॥ ४६ ॥

अन्वयः-ततः सः कृती प्रतिहार उक्ति विदितासु अस्मासु सितं हर्ष स्मित संहर्षि लोचनं न्ययुंक्त. ॥ ४६ ॥

अर्थः—पछी ते चतुर कुमारे छडीदारना वचनथी जणायेली एवी जे अमो, तेनातरफ निर्मळ तथा हर्ष अने हास्यथी प्रफुल्लित थयेली (पोतानी) दृष्टि जोडी. ॥ ४६ ॥

सोऽस्माभिर्माल्यकर्पूरचन्दनाद्युपढौकितम् । जग्राह बहुमानेन गौरं स्वगुणवृन्दवत् ॥ ४७ ॥

अन्वयः-सः अस्माभिः उपढौकितं गौरं माल्य कर्पूर चंदन आदि स्व गुण वृंदवत् बहु मानेन जग्राह. ॥ ४७ ॥

अर्थः—( पछी ) ते राजकुमारे अमोए भेट धरेलां निर्मल पुष्पो, बरास, तथा चंदनआदिकने पोताना गुणोना समूहनीपेठे घणा मानपूर्वक स्वीकार्यां. ॥ ४७ ॥

दापितेषु निविष्टाभिर्विष्टरेषूचितं ततः । चकार चिरमालापं सहास्माभिर्महाशयः ॥ ४८ ॥

अन्वयः—ततः महाशयः दापितेषु विष्टरेषु निविष्टाभिः अस्माभिः सह चिरं उचितं आलापं चकार. ॥ ४८ ॥

अर्थः-पछी ते महाशये अपावेलां आसनोपर बेठेली एवी जे अमो, तेओनी साथे घणा वखतसुधी योग्य वातचित करी. ॥४८॥

अस्ति शृङ्गारसुन्दर्याः क्रीडाकीरो विशारदः । त्वत्सभोचित्त एवेति विज्ञप्तोऽसौ मया तदा ॥ ४९ ॥

अन्वयः—शृंगारसुंदर्याः विशारदः क्रीडा कीरः अस्ति, त्वत्सभा उचितः एव, इति तदा मया असौ विज्ञप्तः ॥ ४९ ॥

अर्थः—शृंगारसुंदरी पासे ( एक ) क्रीडा करवानो विद्वान् शुक छे, अने (ते) आपनी सभानेज लायक छे, एम ते वखते में ते राजकुमारने जणाव्युं. ॥ ४९ ॥

पश्चान्मुक्तो मयाप्यस्ति दत्तहृत्कौतुकः शुकः । इत्युक्तेऽथ कुमारेण कश्चित्तस्य चरो चगौ ॥ ५० ॥

अन्वयः-अथ मया अपि दत्त हृत् कौतुकः शुकः पश्चात् मुक्तः अस्ति, इति कुमारेण उक्ते, तस्य कश्चित् चरः जगौ. ॥ ५० ॥

अर्थः— वळी हुं पण मनमां आश्चर्य उपजावनारा एवा शुकने (मारा मेहेलमां) पाछळ मुकी आव्यो छुं, एम ते कुमारे कहेवाथी तेना कोइक बातमीदारे कह्युं के, ॥ ५० ॥

**कीरश्चौरैः स माणिक्यपंजरेण समं हृतः । इति श्रुतिवशात्किंचिच्चिन्तार्त इव स स्थितः ॥ ५१ ॥**

अन्वयः—स कीरः चौरैः माणिक्य पिंजरेण समं हृतः, इति श्रुति वशात् सः किंचित् चिंतार्तः इव स्थितः. ॥ ५१ ॥

अर्थः-ते शुकने तो चोरो (तेना) माणिक्यना पींजरांसहित चोरी गया छे, एम सांभळवाथी ते राजकुमार कंइक चिंतातुर थइ रह्यो.

**कलशीभवति व्योममण्डपस्येन्दुमण्डले । अस्मान्सत्कृत्य कर्तव्यप्रवीणः प्राहिणोत्ततः ॥ ५२ ॥**

अन्वयः—ततः इन्दु मंडले व्योम मंडपस्य कलशीभवति, कर्तव्य प्रवीणः अस्मान् सत्कृत्य प्राहिणोत्. ॥ ५२ ॥

अर्थः-पछी चंद्रनुं मंडल आकाशरूपी मंडपना कलशरूप होते छते ( अर्थात् मध्यरात्रिए ) कार्यमां तत्पर थयेला ते सनत्कुमारे अमारो सत्कार करीने अमोने रजा आपी. ॥ ५२ ॥

**ईदृक्सनत्कुमारः श्रीकेलिशैलो जयत्ययम् । जगत्त्रयचमत्कारिहारिचारित्रभाजनम् ॥ ५३ ॥**

अन्वयः—श्री केलि शैलः, जगत् त्रय चमत्कारि हारि चारित्रभाजनं, ईदृक् अयं सनत्कुमारः जयति. ॥ ५३ ॥

अर्थः—लक्ष्मीने क्रीडा करवाना पर्वतसरखो, तथा त्रणे जगतने आश्चर्य करनारां मनोहर आचरणना भाजन सरखो, एवो आ

सनत्कुमार जयवंतो वर्ते छे. ॥ ५३ ॥

क्वास्ते सनत्कुमारः किं मामद्यापि न भाषते । न पाठयति सूक्तानि न फलानि प्रयच्छति ॥ ५४ ॥

अन्वयः—सनत्कुमारः क्व आस्ते ? अद्य अपि मां किं न भाषते ? सूक्तानि न पाठयति ? फलानि न प्रयच्छति ? ॥ ५४ ॥

अर्थः—( ते ) सनत्कुमार क्यां छे ? हजु पण मने केम (ते) बोलावता नथी ? उत्तम काव्यो केम भणावता नथी ? तथा फलो केम आपता नथी ? ॥ ५४ ॥

तां श्रुत्वा चम्पिकावाचं तदित्थं भाषके शुके । आचचक्षे विलक्षेदं वचः शृङ्गारसुन्दरी ॥ ५५ ॥

अन्वयः—तां चंपिका वाचं श्रुत्वा, तत् इत्थं शुके भाषके, विलक्षा शृंगार सुंदरी इदं वचः आचचक्षे. ॥ ५५ ॥

अर्थः—तेवी रीतनी चंपिकानी वाणी सांभळीने, तथा आवी रीतनां ते शुकनां वचनथी, विलखी पडेली ते शृंगारसुंदरी आवुं वचन बोलवा लागी के, ॥ ५५ ॥

सखि यत्रानुरक्तं मे मनस्तावत्स एव सः । इत्यधीरस्य कीरस्य वाचा निश्चीयते मया ॥ ५६ ॥

अन्वयः–(हे) सखि ! यत्र मे मनः अनुरक्तं, सः तावत् सः एव, इति अधीरस्य कीरस्य वाचा मया निश्चीयते. ॥ ५६ ॥

अर्थः—हे सखि ! जेनामां मारुं मन अनुरक्त थयेलुं छे, ते तो तेज सनत्कुमार छे, एम आ उत्सुक थयेला शुकनी वाणीथी में निश्चय कर्यो छे. ॥ ५६ ॥

किं तु कान्तामसौ कांचिच्चित्रे यद्वीक्ष्य चुक्षुभे । मनः सपत्नीभीतं मे तेन संप्रति कम्पते ॥ ५७ ॥

अन्वयः—किंतु चित्रे कांचित् कांतां वीक्ष्य यत् असौ चुक्षुभे, तेन सपत्नी भीतं मे मनः संप्रति कंपते. ॥ ५७ ॥

अर्थः-परंतु चित्रमां कोइक स्त्रीने जोइने जे ते क्षोभ पाम्या, तेथी शोकथी डरेलुं मारुं हृदय हालमां कंपी उठ्युं छे ॥ ५७ ॥

असावपीदृशश्चेत्तत्कमन्यं मन्यसे वरम् । स्वयंवरोत्सवादर्वाग्मृत्युरित्युचितो मम ॥ ५८ ॥

अन्वयः-असौ अपि चेत् ईदृशः, तत् अन्यं कं वरं मन्यसे ? इति स्वयंवर उत्सवात् अर्वाक् मम मृत्युः उचितः. ॥ ५८ ॥

अर्थः—(हे हृदय!) आ सनत्कुमार पण जो आवा होय, तो बीजा कया वरनो तुं स्वीकार करीश ? माटे (आ) स्वयंबरनी पेहेलांज मारे मरण पामवुं उचित छे. ॥ ५८ ॥

इत्थमुक्त्वा सनिःश्वासं शयनीये लुलोठ सा । चम्पिकापि चिरं भ्रान्तिश्रान्ताशेत समीपतः ॥ ५९ ॥

अन्वयः-इत्थं सनिःश्वासं उक्त्वा सा शयनीये लुलोठ, चंपिका अपि चिरं भ्रांति श्रांता समीपतः अशेत. ॥ ५९ ॥

अर्थः—एम निःश्वाससहित बोलीने ते शृंगारसुंदरी बीछानापर लोटवा लागी. अने चंपिका पण घणो वखत फरवाथी थाकीने तेणीनी पासेज सूइ गइ. ॥ ५९. ॥

चित्रस्त्रीवृत्तदुःखौघसंघट्टाकुलमानसा । तदा बहुफलं मृत्युं जानती जीवितव्यतः ॥ ६० ॥

निद्रापरं परीवारं मत्वा सत्त्वावलम्बिनी । शनैः शनैः समुत्थाय कायव्ययमनोरथा ॥ ६१ ॥
तत्रैव केलिदोलायाः कटके नृपबालिका ॥ पाशवत्कण्ठबन्धाय स्वं बबन्धोत्तरीयकम् ॥ ६२ ॥

अन्वयः—चित्र स्त्री वृत्त दुःख ओघ संघट्ट आकुल मानसा, तदा जीवितव्यतः मृत्युं बहु फलं जानती, ॥ ६० ॥ परीवारं निद्रा परं मत्वा, सत्त्व अवलंबिनी, काय व्यय मनोरथा शनैः शनैः समुत्थाय, ॥ ६१ ॥ नृप बालिका तत्र एव केलि दोलायाः कटके कंठ बंधाय पाशवत् स्वं उत्तरीयकं बबंध. ॥ ६२ ॥ त्रिभिर्विशेषकं ॥

अर्थः—चित्रमां रहेली स्त्रीना वृत्तांतथी (थयेला) दुःखना समूहना स्पर्शथी व्याकुल मनवाळी, तथा ते वखते जीववा करतां मृत्युने वधारे लाभदायक जाणती, ॥ ६० ॥ अने परीवारने निद्रावश थयेलो जाणीने, हिम्मत धारण करती, तथा शरीरनो विनाश करवानी इच्छावाळी, धीमे धीमे उठीने, ॥ ६१ ॥ ते राजकुमारीए त्यांज क्रीडा करवानां हींडोळाना कडांमां गळे फांसो खावामाटे पासलानीपेठे पोतानी साडीने बांधी. ॥ ६२ ॥ त्रिभिर्विशेषकं ॥

नैवेहाभूद्भवे चेन्मे कान्तो जन्मान्तरेऽपि तत् । मदेकासक्तचित्तोऽस्तु तदेकासक्तचेतसः ॥ ६३ ॥

अन्वयः-चेत् इह भवे मे कांतः न अभूत्, तत् जन्म अंतरे अपि तत् एक आसक्त चेतसः मत् एक आसक्त चित्तः अस्तु.

अर्थः—जो आ भवमां मारा ते स्वामी न थया तो जन्मांतरमां पण तेमांज एक आसक्त मनवाळी एवी जे हुं, तेना, मारामांज एक आसक्त मनवाळा ते स्वामी थजो ! ॥ ३३ ॥

इदं निगद्य सद्योऽथ कण्ठं पाशेऽक्षिपच्च सा । बाले मा मेति चासीद्गीच्छिन्नः पाशः पपात च ॥६४॥

अन्वयः-इदं निगद्य अथ सा सद्यः कंठं पाशे अक्षिपत्, च (हे) बाले ! मा मा, इति गीः आसीत्, च छिन्नः पाशः पपात.

अर्थः—एम कहीने पछी तेणीए तुरत (पोतानो) कंठ पासलामां नाख्यो, (एवामां) हे बाले! "मा मा" एवी वाणी थइ, तथा कपाइ गयेलो पासलो (नीचे) पडी गयो. ॥ ६४ ॥

चम्पिका तु तदा मुक्तनिद्रा तद्रभसाद् भृशम् । कर्षन्तीं पाशतः कण्ठमालोकत कुमारिकाम् ॥ ६५ ॥

अन्वयः—तदा भृशं तद् रभसात् चंपिका तु मुक्तनिद्रा, पाशतः कंठं कर्षंतीं कुमारिकां आलोकत. ॥ ६५ ॥

अर्थः-ते समये (थयेला) घणा खळभळाटथी चंपिका तो जागी गइ, अने पासमांथी (पोताना) कंठने खेंची कहाडती राजकुमारीने तेणीए दीठी. ॥ ६५ ॥

ततः किमिदमित्यस्यै पृच्छन्त्यै संभ्रमस्पृशे । आचक्षत चमत्कारि कुमारी चरितं निजम् ॥ ६६ ॥

अन्वयः—ततः इदं किं ? इति पृच्छंत्यै संभ्रमस्पृशे अस्यै कुमारी निजं चमत्कारि चरितं आचक्षत. ॥ ६६ ॥

अर्थः-पछी आ शुं ? एम पूछती, तथा शंकामां पडेली एवी ते चंपिकाने शृंगारसुंदरीए पोतानुं आश्चर्यजनक आचरण कही संभळाव्युं.

किमेतत्पतितं क्ष्मायामित्युत्थायाथ चम्पिका । करेणादाय पश्यन्ती हृष्यन्तीदमुवाच सा ॥ ६७ ॥

अन्वयः—अथ एतत् क्ष्मायां किं पतितं ? इति उत्थाय सा चंपिका करेण आदाय पश्यंती हृष्यंती इदं उवाच. ॥ ६७ ॥

अर्थः–पछी आ जमीनपर शुं पडयुं छे? एम कही उठीने ते चंपिकाए हाथमां लेइ जोतांथकां, तथा आनंद पामतांथकां एम कह्युं के,

**देवि देवि स एवायं वामाचित्रपटः स्फुटः। दिष्टया च वर्धसे देवि यत्त्वमेवात्र चित्रगा ॥ ६८ ॥**

अन्वयः–(हे) देवि! देवि! स एव वामा चित्र पटः अयं स्फुटः, च (हे) देवि! दिष्ट्या वर्धसे, यत् अत्र त्वं एव चित्रगा.

अर्थः—हे देवि! देवि! तेज स्त्रीना चित्रनी छबी आ खुल्ली (अहीं) पडी छे, वळी हे देवि! हुं तने उत्तम वधामणी आपुं छुं के, आ चित्रमां तारीज छबी चित्रेली छे. ॥ ६८ ॥

**सनत्कुमारं त्वय्येवासक्तं कथयितुं पुनः। चित्रस्थिता त्वमेवात्र कथमार्तासि कथ्यताम् ॥ ६९ ॥**

अन्वयः—पुनः सनत्कुमारं त्वयि एव आसक्तं कथयितुं त्वं एव अत्र चित्र स्थिता, कथ्यतां? कथं आर्ता असि? ॥ ६९ ॥

अर्थः—वळी (ते) सनत्कुमार तारामांज रक्त छे, एम कहेवामाटे तुं पोतेज अहीं चित्रमां बेठेली छो, तो कहे के, (हवे) तुं शामाटे खेद पाम्या करे छे? ॥ ६९ ॥

**इति वागमृतं तस्याः स्फीतं पीत्वा पतिंवरा। तमादाय करे चित्रपटमित्याददे वचः ॥ ७० ॥**

अन्वयः—इति तस्याः स्फीतं वाग् अमृतं पीत्वा पतिंवरा तं चित्रपटं करे आदाय इति वचः आददे. ॥ ७० ॥

अर्थः—एवीरीतना तेणीना वचनरूपी विस्तीर्ण अमृतने पीने (ते) स्वयंवरा राजकुमारी ते चित्रपटने हाथमां लेइ आवीरीतनुं

वचन बोलवा लागी. ॥ ७० ॥

श्लाघ्यासि लब्धतत्सङ्गा चित्रशृंगारसुन्दरि । शोचनीयासि च रुचं धत्से तद्विरहेऽपि यत् ॥ ७१ ॥

अन्वयः-(हे) चित्र शृंगारसुंदरी! लब्ध तत्संगा श्लाघ्या असि, च तद् विरहे अपि रुचं धत्से, शोचनीया असि. ॥ ७१ ॥

अर्थः—आ चित्रमां रहेली एवी (हे) शृंगारसुंदरी! ते सनत्कुमारनो संग मेळववाथी तुं प्रशंसाने पात्र छो, अने तेमना (आ) विरहसमये पण तुं जे कांतिने धारण करे छे, (तेथी) दिलगिरिने लायक छो. ॥ ७१ ॥

धन्यास्मि तत्करस्पर्शं प्राप चित्रगतापि यत् । इतीयमुद्यत्पुलकं मुमुदे कुमुदेक्षणा ॥ ७२ ॥

अन्वयः-धन्या अस्मि, यत् चित्र गता अपि तत् कर स्पर्शं प्राप, इति कुमुद ईक्षणा इयं उद्यत्पुलकं मुमुदे. ॥ ७२ ॥

अर्थः—(वळी) हुं भाग्यशाली छुं, केमके चित्रमां रहीने पण में ते सनत्कुमारना हाथनो स्पर्श मेळवेलो छे, एरीते कमल सरखां लोचनोवाळी ते राजकुमारी रोमांचित थइ आनंद पामवा लागी. ॥ ७२ ॥

प्रियं परिरभे किं न पटान्तरितमप्यहम् । सेत्यदात्तं परीरम्भमित्रं चित्रपटं हृदि ॥ ७३ ॥

अन्वयः-पटांतरितं प्रियं अहं अपि किं न परिरंभे? इति सा परीरंभमित्रं तं चित्रपटं हृदि अदात्. ॥ ७३ ॥

अर्थः—पटना अंतरवाळा (ते) प्रीतमने हुं पण केम आलिंगन न करुं? एम विचारी तेणीए आलिंगनना मित्रसरखा ते चित्रपटने (पोतानी) छातीपर राख्यो. ॥ ७३ ॥

करगोचरमप्येनामनयश्चित्रसुन्दरीम् । कुमारवर नायासि किं चक्षुर्गोचरेऽपि मे ॥ ७४ ॥

अन्वयः-(हे) कुमारवर ! एनां चित्र सुंदरीं अपि कर गोचरं अनयः, मे चक्षुः गोचरे अपि किं न आयासि ? ॥ ७४ ॥

अर्थः—हे उत्तम कुमार ! आ चित्रमां रहेली रमणीने पण (आपे) (ज्यारे) हाथमां धारण करी छे, (तो पछी) मारी दृष्टिए पण (आप) केम आवता नथी ? ॥ ७४ ॥

एवं तयोक्ते शून्येऽपि सत्यः प्रत्यक्षतामगात् । सनत्कुमारो धामौघधौतधामान्तरः पुरः ॥ ७५ ॥

अन्वयः—एवं तया शून्ये अपि उक्ते धाम ओघ धौत धाम आंतरः सनत्कुमारः सत्यः पुरः प्रत्यक्षतां अगात्. ॥ ७५ ॥

अर्थः—एरीते तेणीए तो प्रेमना (आवेशथी) असत्य कह्या छतां पण (पोताना) तेजना समूहथी प्रकाशित करेल छे ते मकाननो अंदरनो विभाग जेणे, एवो ते सनत्कुमार सत्यरूपे (तेणीनी) पासे प्रगट थयो. ॥ ७५ ॥

गृह्णीत करकं दत्ताचमनं मुंचातासनम् । कुमारः सोऽयमायातीत्यूचे कीरो निरूप्य ताम् ॥ ७६ ॥

अन्वयः-सः अयं कुमारः आयाति, करकं गृह्णीत ? आचमनं दत्त ? आसनं मुंच ? इति कीरः निरूप्य तां ऊचे. ॥ ७६ ॥

अर्थः—ते आ सनत्कुमार आवे छे, माटे (जलनी) झारी लीओ ? आचमन आपो ? आसन मूको ? एरीते ते शुके (कुमारने) जोइ तेणीने कह्युं. ॥ ७६ ॥

अथाभ्युत्थाय हर्षोर्मिप्रणुन्नेवाशु चम्पिका । ददावासनमासीने कुमारे चेदमब्रवीत् ॥ ७७ ॥

अन्वयः–अथ हर्ष ऊर्मि प्रणुन्ना इव चंपिका आशु अभ्युत्थाय आसनं ददौ, च कुमारे आसीने इदं अब्रवीत्. ॥ ७७ ॥

अर्थः–पछी हर्षना मोजांओवडे जाणे प्रेराइ होय नही ! तेम ते चंपिकाए तुरत उठीने आसन आप्युं, अने सनत्कुमार तेपर बेठा-बाद तेणीए एम कह्युं के, ॥ ७७ ॥

अद्य नः सफलं जन्म सुमुहूर्ताद्य यामिनी । यदस्मद्धाम्नि देवेन स्वयं पादोऽवधारितः ७८ ॥

अन्वयः—अद्य नः जन्म सफलं, अद्य यामिनी सुमुहूर्ता, यत् देवेन स्वयं अस्मद् धाम्नि पादः अवधारितः. ॥ ७८ ॥

अर्थः—आजे अमारो जन्म सफल (थयो,) आजनी रात्रि उत्तम मुहूर्तवाळी थइ, केमके आपे पोतेज अमारा मकानमां पगलां कर्यां छे. ॥ ७८ ॥

अयं ते देवि स प्राणदयितो यस्त्वदिच्छया । तूर्णमाज्ञाविधायीव जज्ञे लोचनगोचरः ॥७९॥

अन्वयः—( हे ) देवि! अयं सः ते प्राण दयितः, यः त्वत् इच्छया आज्ञा विधायी इव तूर्णं लोचन गोचरः जज्ञे. ॥ ७९ ॥

अर्थः–(वळी) हे देवि! आ ते तारा प्राणनाथ, के जे तारी इच्छा मुजब आज्ञा पाळनारनी पेठे तुरतज तारी नजर आगळ हाजर थया छे. ॥ ७९ ॥

एतदालोकपीयूषपानविघ्नां त्यज त्रपाम् । अस्याननेन्दौ हृद्याङ्गि कुरङ्गीकुरु लोचनम् ॥ ८० ॥

अन्वयः-( हे ) हृद्यांगि! एतत् आलोक पीयूषपान विघ्नां त्रपां त्यज ? अस्य आनन इंदौ लोचनं कुरंगी कुरु? ॥ ८० ॥

अर्थः—हे मनोहर अंगवाळी! तेमनां दर्शनरूपी अमृतपानमां विघ्न करनारी लज्जानो (तुं) त्याग कर ? (अने) तेमना मुखरूपी चंद्रमते (तारां) चक्षुओने हरिणरूप कर? ॥ ८० ॥

इत्युक्त्या सकृदुल्लास्य दृशं भूपालबालया । दृष्टास्यं हृष्टमनसं कुमारं स्माह चम्पिका ॥८१॥

अन्वयः—इति उक्त्या सकृत् दृशं उल्लास्य भूपाल बालया दृष्ट आस्यं, हृष्ट मनसं कुमारं चम्पिका स्माह. ॥ ८१ ॥

अर्थः-एम कहेवाथी एक वखत आंखो उंची करीने ते राजकन्यावडे जोवायेला मुखवाळा, तथा आनंदित हृदयवाळा एवा ते सनत्कुमारने चम्पिकाए कह्युं के, ॥ ८१ ॥

हर्षाश्रुवारिहारिण्या स्फारतारांशुदूर्वया । इयं ते वीर दत्तेऽर्घं दृशा प्रसृतिदीर्घया ॥ ८२ ॥

अन्वयः-( हे ) वीर! इयं हर्ष अश्रु वारि हारिण्या, स्फार तारा अंशु दूर्वया, प्रसृति दीर्घया दृशा ते अर्घं दत्ते. ॥ ८२ ॥

अर्थः-हे शूरवीर सनत्कुमार! आ शृंगारसुंदरी हर्षना आंसुओरूपी जळथी मनोहर, प्रफुल्लित कीकीना किरणोरूपी दूर्वावाळी, अने विस्तारथी लांबी एवी दृष्टिवडे तमोने अर्घ आपे छे, ( अर्थात् सन्मानपूर्वक आपनुं पूजन करे छे ) ॥ ८२ ॥

अस्ति त्वदुचितं नान्यदातिथ्यं त्रिजगत्यपि । त्रिजगन्महनीयेयमेवातिथ्यं तवास्तु तत् ॥ ८३ ॥

अन्वयः-त्वत् उचितं अन्यत् आतिथ्यं त्रिजगति अपि न अस्ति, तत् त्रिजगत् महनीया इयं एव तव आतिथ्यं अस्तु ? ॥८३॥
अर्थः—आपनुं स्वागत करवालायक बीजी तो ( कोइ वस्तु ) त्रणे जगतमां पण नथी, माटे त्रणे जगतमां प्रशंसापात्र आ राजकुमारी (पोतेज) आपना स्वागतरूप थाओ ! ॥ ८३ ॥

स्वागतं वीरकोटीर तवास्मिन्नस्मदोकसि । विशतः स्खलितं नासीत्कथमुद्दामयामिके ॥ ८४ ॥

अन्वयः—(हे) वीर कोटीर ! स्वागतं, उद्दाम यामिके अस्मिन् अस्मद् ओकसि विशतः तव स्खलितं कथं न आसीत् ? ॥८४॥
अर्थः—-( वळी ) हे वीरशिरोमणि ! आप अहीं भले पधार्यां, परंतु मजबूत चोकीपहेरावाळा आ अमारां मंदिरमां आवतां आपने ( कंइ ) अटकाव केम न थयो ? ॥ ८४ ॥

अथोदितस्मितव्याजराजद्द्युतिततीरिति । कुमारस्तोषदुग्धाब्धिमुक्तालीरुज्जगार गाः ॥ ८५ ॥

अन्वयः-अथ उदित स्मित व्याज राजत् द्युति ततीः, तोष दुग्ध अब्धि मुक्तालीः इति गाः कुमारः उज्जगार. ॥ ८५ ॥
अर्थः-पछी उदय पामेला मंदहास्यना मिषथी शोभिती छे कांतिनी श्रेणि जेमां, एवी हर्षरूपी क्षीरसमुद्रना मोतीओनी माळा सरखी आवी रीतनी वाणी ते सनत्कुमार बोल्या. ॥ ८५ ॥

सखीं श्रृंगारसुन्दर्यास्त्वां मत्वा कीरकीर्तनात् । सहैवाहमिहागच्छमदृशीभूय विद्यया ॥ ८६ ॥

अन्वयः-कीर कीर्तनात् त्वां शृंगारसुंदर्याः सखीं मत्वा, अहं विद्यया अदृशीभूय सह एव इह आगच्छं ॥ ८६ ॥

अर्थः-शुकना वृत्तांतथी तने शृंगारसुंदरीनी सखी जाणीने हुं विद्यावडे अदृश्य थइ तारीसाथेज अहीं आवेलो छुं. ॥ ८६ ॥

कण्ठपाशं कुरङ्गाक्ष्याः कृन्ततोऽत्र करान्मम । च्युतश्चित्रपटो ह्रीण इवास्यां दृक्पथस्पृशि ॥ ८७ ॥

अन्वयः-अत्र कुरंगाक्ष्याः कंठपाशं कृन्ततः मम करात्, अस्यां दृक् पथ स्पृशि ह्रीणः इव चित्रपटः च्युतः. ॥ ८७ ॥

अर्थः—अहीं आ हरिणाक्षीना कंठपाशने छेदतां मारा हाथमांथी, जाणे तेणीनी हाजरीमां लज्जातुर थयो होय नही! तेम ते चित्रपट (नीचे) पडी गयो. ॥ ८७ ॥

त्वं च धन्यममन्येऽहमिह स्नेहवशंवदाम् । इमामालोकयंल्लोकत्रयलोचनचन्द्रिकाम् ॥ ८८ ॥

अन्वयः-च स्नेह वशंवदां, लोकत्रय लोचन चंद्रिकां इमां इह आलोकयन् अहं त्वं धन्यं अमन्ये. ॥ ८८ ॥

अर्थः-वळी (मारापरना) स्नेहनेज वश थयेली, तथा त्रणे लोकनां नयणोने आनंद आपनारी चांदनीसरखी आ शृंगारसुंदरीने अहीं जोइने हुं मने पोताने धन्य मानवा लाग्यो छुं. ॥ ८८ ॥

इति वर्षति कर्णेषु कुमारे सूनृतामृतम् । नृपतिप्रतिहारेण गर्जिवद्गदितं बहिः ॥ ८९ ॥

अन्वयः—इति कर्णेषु कुमारे सूनृत अमृतं वर्षति, बहिः नृपति प्रतिहारेण गार्जिवत् गार्जितं. ॥ ८९ ॥

अर्थः-एरीते कर्णोमां ते कुमार सत्यरूपी अमृतनो वरसाद वरसावते छते, बहार राजाना छडीदारे मेघगर्जना सरखो नाद कर्यो के,

**रे किंकरा धराजानिर्युष्मानाज्ञापयत्यदः हृद्यः । संपाद्यतामद्य स्वयंवरणमण्डपः ॥ ९० ॥**

अन्वयः-रे किंकराः ! धराजानिः युष्मान् अदः आज्ञापयति, अद्य हृद्यः स्वयंवरण मंडपः संपाद्यतां ? ॥ ९० ॥

अर्थः—अरे सेवको ! राजा तमोने एवी आज्ञा करे छे के, आजे (तमो) मनोहर स्वयंवरमंडपनी रचना करो ? ॥ ९० ॥

**अयि दिक्करिकाः कार्यं कुमार्याः स्नपनादिकम् । स्वयंवरमुहूर्तो हि श्वोऽस्ति स्वस्तिप्रदः प्रगे ॥ ९१ ॥**

अन्वयः—अयि दिक्करिकाः ! कुमार्याः स्नपन आदिकं कार्यं, हि श्वः प्रगे स्वस्ति प्रदः स्वयंवर मुहूर्तः अस्ति. ॥ ९१ ॥

अर्थः—अरे युवतीओ ! ( तमारे ) राजकुमारी शृंगारसुंदरीने स्नानआदिक करावी लेवुं, केमके आवती काले प्रभातमां मंगलकारी स्वयंवरनुं मुहूर्त छे. ॥ ९१ ॥

**त्वरध्वं मरुदध्वानमधुना विधुनाशकः । आरोहति क्षपाक्षेपी पश्यतामेव वो रविः ॥ ९२ ॥**

अन्वयः-त्वरध्वं ? विधु नाशकः, क्षपाक्षेपी रविः वः पश्यतां एव अधुना मरुद् अध्वानं आरोहति. ॥ ९२ ॥

अर्थः-( तमो सर्वे ) उतावळ करो ? (केमके) चंद्रनो विनाशक, अने रात्रिने दूर करनारो सूर्य तमारी नजरेज हमणां आकाशमां उदय पामवानो छे. ॥ ९२ ॥

**इत्युक्त्वा विरते तत्र धरित्रीकमितुः सुतः । ऊचे प्रेमसुधावीचिं वाचं नृपसुतां प्रति ॥ ९३ ॥**

अन्वयः-इति उवत्वा तत्र विरते, धरित्री कमितुः सुतः नृपसुतां प्रति प्रेम सुधा वीचिं वाचं ऊचे. ॥ ९३ ॥

अर्थः-एम कही ते मौन रह्याबाद, (ते) राजपुत्रे (ते) राजकुमारीप्रते प्रीतिरूपी अमृतना मोजांसरखुं वचन कह्युं के, ॥ ९३ ॥

**त्वद्गुणासक्तचित्तोऽहमन्वहं नृपनन्दनि । मा स्म मामन्यथा स्वप्नसंकथास्वपि शङ्कथाः ॥ ९४ ॥**

अन्वयः-(हे) नृपनंदनि ! अहं अन्वहं त्वद् गुण आसक्त चित्तः, स्वप्न संकथासु अपि मां अन्यथा मा शंकथाः स्म. ॥ ९४ ॥

अर्थः—हे राजकुमारी ! हुं हमेशां तमारा गुणोमांज रक्त हृदयवाळो छुं, (ते संबंधमां) स्वप्नमां पण मारेमाटे तमारे विपरीत शंका करवी नहीं. ॥ ९४ ॥

**यामि संप्रति वामाक्षि स्थातुमत्रोचितं न मे । मयात्मनो मनो मुक्तमस्ति सेवामयं त्वयि ॥ ९५ ॥**

अन्वयः-(हे) वामाक्षि ! य[illegible]संप्रति मे अत्र स्थातुं उचितं न, मया आत्मनः मनः त्वयि सेवामयं मुक्तं अस्ति. ॥ ९५ ॥

अर्थः—हे सुंदर नयनोवाळी [illegible]मारी ! हुं जाउं छुं, केमके आ वखते हवे मारे अहीं रहेवुं योग्य नथी, हुं मारुं हृदय तो तमारी सेवामाटे (अहींज) मेली जाउं छुं. ॥ ९५ ॥

**इत्युक्त्वा स तिरोऽभूच्च तामीयुश्च समुत्सुकाः । प्रतिकर्मविनिर्माणचारिकाः प्रतिचारिकाः ॥ ९६ ॥**

अन्वयः–इति उक्त्वा च सः तिरोऽभूत्, च प्रतिकर्म विनिर्माण चारिकाः प्रतिचारिकाः समुत्सुकाः तां ईयुः. ॥ ९६ ॥

अर्थः—एम कहीने ते राजकुमार तो अदृश्य थयो, पछी दरेक कार्यो करवामाटे निर्माण करेली दासीओ उतावळथी ते राजकुमारीपासे ( त्यां ) आवी. ॥ ९६ ॥

**किंकराश्च त्वराचण्डगतयो मण्डपं ययुः । तं च मण्डनमण्डल्या मण्डयामासुराशु ते ॥ ९७ ॥**

अन्वयः—च त्वरा चंड गतयः किंकराः मंडपं ययुः, च तं ते आशु मंडन मंडल्या मंडयामासुः ॥ ९७ ॥

अर्थः—वळी उतावळथी वेगयुक्त गतिवाळा नोकरो स्वयंवर मंडपमां गया, अने ते मंडपने तेओ तुरत शणगारना समूहथी शणगारवा लाग्या. ॥ ९७ ॥

**स्वयंवरोत्सवे तस्मिन्पताकापाणिभिश्चलैः । शुशुभे ककुभामीशानाह्वयन्निव मण्डपः ॥ ९८ ॥**

अन्वयः—तस्मिन् स्वयंवर उत्सवे मंडपः चलैः पताका पाणिभिः ककुभां ईशान् आह्वयन् इव शुशुभे. ॥ ९८ ॥

अर्थः—ते स्वयंवर महोत्सवमां (ते) मंडप चपळ पताकाओरूपी ( पोताना ) हाथोवडे दिशाओना स्वामीओने जाणे बोलावतो होय नही ! तेम शोभतो हतो. ॥ ९८ ॥

**तस्मिन्विश्वमनोमोहदिवसोदयभास्कराः । निशातकान्तयः शातकुम्भकुम्भा विरेजिरे ॥ ९९ ॥**

अन्वयः—तस्मिन् विश्व मनः मोह दिवस उदय भास्कराः, निशात कांतयः शातकुंभ कुंभाः विरेजिरे. ॥ ९९ ॥

अर्थः—ते मंडपमां जगतना मनमां मोहरूपी दिवसना उदयमाटे सूर्यसरखा, अने चकचकीत तेजवाळा सुवर्णना बनावेला कळशो शोभता हता. ॥ ९९ ॥

तत्रोरुतोरणस्तम्भभाजो वन्दनमालिकाः । लक्ष्म्याः स्वभावलोलायाः केलिदोलाकलां ललुः ॥ ३०० ॥

अन्वयः-तत्र उरु तोरण स्तंभभाजः वंदनमालिकाः स्वभाव लोलायाः लक्ष्म्याः केलि दोला कलां ललुः. ॥ ३०० ॥

अर्थः—(वळी) ते मंडपमां मनोहर तोरण स्तंभोमां लटकावेली तोरणमालाओ, स्वभावथीज चपल एवी लक्ष्मीने क्रीडा करवाना हींडोळानी शोभाने धारण करती हती. ॥ ३०० ॥

मुक्ताप्रालम्बनक्षत्रहृद्या विद्योतितद्युतः । स्मरप्रसरनिस्तन्द्रास्तत्र चन्द्रोदया बभुः ॥ १ ॥

अन्वयः-तत्र मुक्ता प्रालंब नक्षत्र हृद्याः, विद्योतित द्युतः, स्मर प्रसर निस्तंद्राः चंद्रोदयाः बभुः. ॥ १ ॥

अर्थः—(वळी) ते मंडपमां मोतीओना झूमखाओरूपी नक्षत्रोवडे मनोहर थयेला, तथा तेजस्वी कांतिवाळा, अने कामदेवनो विस्तार करवामां समर्थ एवा चंद्रोदयो (चंदरवा) शोभता हता. ॥ १ ॥

चञ्चदुच्चप्रपञ्चेषु तत्र मञ्चेषु दिद्युते । स्फारैः पुष्पगृहैः पुष्पायुधयन्त्रायुधैरिव ॥ २ ॥

अन्वयः-तत्र चंचत् उच्च प्रपंचेषु मंचेषु पुष्प आयुध यंत्र आयुधैः इव स्फारैः पुष्पगृहैः दिद्युते ॥ २ ॥

अर्थः—(वळी) ते मंडपमां ऊंचा भागोमां सारीरीते गोठवेली खुरशीओपर, जाणे कामदेवना यंत्रशस्त्रोसरखा विस्तीर्ण पुष्पमं-

डपो दीपता हतो. ॥ २ ॥

मुक्तास्वस्तिकरोचिष्णुकस्तूरीमण्डलच्छलात् ईयुस्तत्र सनक्षत्राः स्मरमित्राणि रात्रयः ॥ ३ ॥

अन्वयः—तत्र मुक्ता स्वस्तिक रोचिष्णु कस्तूरी मंडल च्छलात् स्मर मित्राणि रात्रयः सनक्षत्राः ईयुः. ॥ ३ ॥

अर्थः—(वळी) त्यां मोतीओना साथीआओथी शोभता कस्तूरीना मंडलोना मिषथी, कामदेवना मित्र सरखी रात्रीओ नक्षत्रो सहित आवी हती. ॥ ३ ॥

मङ्गल्यकलशास्तत्र विश्वानन्दाब्धिनन्दिनः अभजञ्शशभृल्लीलां नीलाम्भोजभृतः सिताः ॥ ४ ॥

अन्वयः—तत्र विश्व आनंद अब्धि नंदिनः, नील अंभोज भृतः, सिताः मंगल्य कलशाः शशभृत् लीलां अभजन् ॥ ४ ॥

अर्थः—(वळी) त्यां जगतना आनंदरूपी महासागरनी वृद्धि करनारा, अने श्याम कमलोथी भरेला श्वेत रंगना मंगल कलशो चंद्रोनी शोभाने धारण करता हता. ॥ ४ ॥

श्यामशोणसितैः सैष रत्नस्तम्भांशुभिर्बभौ । स्फुरत्तमोरजःसत्त्वैश्चित्तैरिव हृतैर्नृणाम् ॥ ५ ॥

अन्वयः—नृणां हृतैः स्फुरत् तमः रजः सत्त्वैः चित्तैः इव, स एषः श्याम शोण सितैः रत्न स्तंभ अंशुभिः बभौ. ॥ ५ ॥

अर्थः—माणसोनां हरी लीधेलां एवां, स्फुरायमान तमोगुण, रजोगुण अने सत्त्वगुणोवाळां हृदयोवडे करीने जाणे होय नहीं! तेम ते मंडप श्याम, लाल तथा श्वेत रत्नोना स्तंभोना किरणोवडे शोभतो हतो. ॥ ५ ॥

समाकृष्ट इवोत्कृष्टः पुण्यैः पुंसां स्थिरायुषाम् । स पुरीमण्डनो जज्ञे स्वःखण्ड इव मण्डपः ॥ ६ ॥

अन्वयः-स्थिर आयुषां पुंसां पुण्यैः समाकृष्टः इव, उत्कृष्टः सः मंडपः स्वः खंडः इव पुरी मंडनः जज्ञे. ॥ ६ ॥

अर्थः—स्थिर आयुवाळा पुरुषोना पुण्योवडे जाणे खेंचाइ आवेलो होय नही! एवो ते उमदो मंडप स्वर्गना प्रदेशनीपेठे (ते) नगरीने शोभावनारो थयो. ॥ ६ ॥

ध्वनिस्तूर्यस्य पुस्फूर्जे दूरमूर्जस्वलोदयः । मण्डपान्तःसमुद्भ्रान्तस्मरार्णवरवच्छविः ॥ ७ ॥

अन्वयः-ऊर्जस्वल उदयः, समुद्भ्रांत स्मर अर्णव रव च्छविः तूर्यस्य ध्वनिः मंडपांतः दूरं पुस्फूर्जे. ॥ ७ ॥

अर्थः-अति उछळतो तथा कामरूपी महासागरनी गर्जना सरखी भ्रांति करावनारो, वाजित्रोनो नाद ते मंडपनी अंदर दूरसुधी विस्तार पामवा लाग्यो. ॥ ७ ॥

तं मण्डपमखण्डश्रीमालमालोकितुं तदा । पूर्वशैलशिरोभूषा पूषाभूत्कुतुकादिव ॥ ८ ॥

अन्वयः—तदा अखंड श्री माल तं मंडपं आलोकितुं कुतुकात् इव पूर्व शैल शिरः भूषा पूषा अभूत्. ॥ ८ ॥

अर्थः—ते वखते अविच्छिन्न शोभानी श्रेणिवाला ते मंडपने जोवाना कुतूहलथी जाणे होय नही! तेम पूर्वाचलना शिखरने शोभावनारो (सूर्योदय) प्रभात थयो. ॥ ८ ॥

दूतालिभिः समाहूताः पुरुहूतास्ततः क्षितेः । सशृङ्गाराः कुमाराश्च मञ्चसंचयमाश्रयन् ॥ ९ ॥

अन्वयः—ततः दूत आलिभिः समाहूताः क्षितेः पुरुहूताः, च सशृंगाराः कुमाराः मंच संचयं आश्रयन्. ॥ ९ ॥

अर्थः—पछी दूतोनी श्रेणिओथी बोलावायेला राजाओ, अने ( अलंकारोवडे ) शणगारेला राजकुमारो खुरशीओना समूहपर आवी बेठा. ॥ ९ ॥

निशाचरितरोचिष्णुप्रगुणद्विगुणद्युतिः । मञ्चसिंहासनं सिंहभूपभूरप्यभूषयत् ॥ १० ॥

अन्वयः—निशा चरित रोचिष्णु प्रगुण द्विगुण द्युतिः, सिंह भूप भूः अपि मंच सिंहासनं अभूषयत्. ॥ १० ॥

अर्थः—रात्रिना वृत्तांतथी तेजस्वी थयेली, तथा वधीने बेवडी थयेली छे कांति जेनी एवो सिंहराजानो पुत्र सनत्कुमार पण खुरशीरूपी सिंहासनने शोभाववा लाग्यो. ॥ १० ॥

पतिंवरानिराशैस्तैर्म्लानं वीरैरिहागते । विमुक्तश्रीस्पृहैरब्जैरिव कैरवबान्धवे ॥ ११ ॥

अन्वयः—कैरव बांधवे विमुक्त श्री स्पृहैः अब्जैः इव, इह आगते पतिंवरा निराशैः तैः वीरैः म्लानं. ॥ ११ ॥

अर्थः—चंद्रनो ( उदय होते छते ) तजेली छे शोभानी आशा जेओए, एवां कमलो जेम ( म्लानि पामे ), तेम आ सनत्कुमारना ( त्यां ) आववाथी, ते राजकुमारीमाटे निराश थयेला ते शूरवीरो म्लानी पाम्या. ॥ ११ ॥

पृष्ठतो ललितं गीतं गायन्तीभिस्तदालिभिः । अग्रतो बन्दिनीवृन्दैर्वदद्भिर्विशदाः स्तुतीः ॥ १२ ॥
वंशवीणादि तद्विद्यै(द्भि)र्वादयद्भिरितस्ततः । आनन्द्यमानहृदया हृदयालुभिरुन्मदैः ॥ १३ ॥
यूनामयोगदग्धानि श्यामरूपाणि पाणिना । धुन्वाना धावमानानि मनांसि स्त्रगलिच्छलात् ॥ १४ ॥
अमान्तमन्तरुद्भ्रान्तं कश्मीरजरजश्छलात् । सनत्कुमाररूपश्रीरागमङ्गेषु बिभ्रती ॥ १५ ॥
विभूषणझणत्कारैर्नर्तयन्तीव मन्मथम् । स्मितया ह्रासयन्तीव रतिं लोचनलीलया ॥ १६ ॥
पीयमानमुखेन्दुश्रीर्लोकचक्षुश्चकोरकैः । जीवादिशेति जल्पद्भिः सेव्यमाना सखीजनैः ॥ १७ ॥
चम्पिकाहस्तविन्यस्तस्वयंवरणमालिका । विवेश नृविमानस्था मण्डपं नृपनन्दिनी ॥ १८ ॥

अन्वयः—तदा पृष्ठतः ललितं गीतं गायंतीभिः आलिभिः, अग्रतः विशदाः स्तुतीः वदद्भिः बंदिनीवृंदैः, ॥ १२ ॥ इतः ततः वंश वीणा आदि वादयद्भिः तद्विद्यैः, उन्मदैः हृदयालुभिः आनंद्यमान हृदया, ॥ १३ ॥ अयोग दग्धानि, श्याम रूपाणि, धावमानानि यूनां मनांसि, स्त्रग् अलि च्छलात् पाणिना धुन्वाना, ॥ १४ ॥ कश्मीरज रजः छलात् अंतः अमांतं, उद्भ्रांतं, सनत्कुमार रूप श्री रागं अंगेषु बीभ्रती, ॥ १५ ॥ विभूषण झणत्कारैः मन्मथं नर्तयंती इव, स्मितया लोचन लीलया रतिं ह्रासयंती इव, ॥ १६ ॥ लोक चक्षुः चकोरकैः पीयमान मुख इंदु श्रीः, जीव! आदिश! इति जल्पद्भिः सखीजनैः सेव्यमाना, ॥ १७ ॥ चंपिका

हस्त विन्यस्त स्वयंवरण मालिका, नृ विमान स्था नृप नंदिनी मंडपं विवेश. ॥ १८ ॥ सप्तभिः कुलकं ॥

अर्थः—ते वखते पाछळ मनोहर गीत गाती सखीओवडे, आगळ निर्मल स्तुतिओ भणती भाटणोना समूहोवडे, ॥ १२ ॥ बाजुमां वांसली, तथा वीणा आदिक वगाडनारा तेना जाणकारोवडे, तथा हर्षित थयेला स्नेहीओवडे खुशी करातां हृदयवाळी, ॥ १३ ॥ (ते कन्याना) अस्वीकारथी बळीने श्याम थयेलां, अने दोडतां, एवां युवानोनां हृदयोने पुष्पमालापर उडता भमराओना मिषथी हाथवडे तिरस्कारती, ॥ १४ ॥ केसरनी कणीओना मिषथी, हृदयमां नही मावाथी उछळी निकळेला, एवा सनत्कुमारना रूपनी शोभाना रागने शरीरपर धारण करती, ॥ १५ ॥ आभूषणोना झणकारथी जाणे कामदेवने नचावती, विकस्वर थयेली नयनोनी क्रीडाथी जाणे रतिने हलकी पाडती, ॥ १६ ॥ लोकोनां चक्षुओरूपी चकोरोवडे पीवाती मुखचंद्रनी शोभावाळी, तुं जीव ? फरमाव ? एम बोलती सखीओवडे सेवाती, ॥ १७ ॥ अने चंपिकाना हाथमां सोंपेली वरमालावाळी, तथा मनुष्योए उंचकेली पालखीमां बेठेली ते राजकुमारी (त्यां) मंडपमां दाखल थइ. ॥ १८ ॥ सप्तभिः कुलकं ॥

अभूवन्नुद्भवद्भावविसंस्थुलहृदां तदा । तद्विलोकादधीराणां वीराणां विविधाः क्रियाः ॥ १९ ॥

अन्वयः-तदा तद्विलोकात् अधीराणां, उद्भवद् भाव विसंस्थुल हृदां वीराणां विविधाः क्रियाः अभूवन्. ॥ १९ ॥

अर्थः—ते वखने तेणीने जोवाथी धैर्यरहित थयेला, तथा उत्पन्न थता ( काम ) विकारथी व्याकुल चित्तवाळा एवा ते शूरवीर राजकुमारोनी नानाप्रकारनी चेष्टाओ थवा लागी. ॥ १९ ॥

तथाहि–प्रसन्नीकर्तुमिव तां कश्चित्तत्पादसोदरम् । आरोपयन्नृपो मूर्ध्नि लीलातामरसं रसी ॥ २० ॥

अन्वयः–तथाहि–कश्चित् रसी नृपः तां प्रसन्नीकर्तुं इव, तत्पाद सोदरं लीला तामरसं मूर्ध्नि आरोपयत्. ॥ २० ॥

अर्थः—ते आवी रीते—कोइक रसीओ राजा तेणीने जाणे खुशी करवामाटे होय नही ! तेम तेणीना चरणोसरखा क्रीडामाटेना लालकमलने ( पोताना ) मस्तकपर धारण करवा लाग्यो. ॥ २० ॥

अस्य धाम्नि निधास्ये त्वामित्यस्यै कथयन्निव । कश्चित्करेण निःसीमं सीमन्तमणिमस्पृशत् ॥ २१ ॥

अन्वयः–अस्य धाम्नि त्वां निधास्ये, इति अस्यै कथयन् इव, कश्चित् निःसीमं सीमंतमणिं अस्पृशत्. ॥ २१ ॥

अर्थः—आनी जगोए तने स्थापन करीश, एम जाणे तेणीने कहेतो होय नही ! तेम कोइक कुमार ( पोताना ) अनुपम मुकुटने स्पर्श करतो हतो. ॥ २१ ॥

कङ्कणे पाणिपुष्पाणि कोऽपि न्यधित लीलया । ग्रहान्नवापि तां लब्धुं तज्जुषः पूजयन्निव ॥ २२ ॥

अन्वयः–कः अपि लीलया कंकणे पाणिपुष्पाणि न्यधित, तां लब्धुं तज्जुषः नव अपि ग्रहान् पूजयन् इव. ॥ २२ ॥

अर्थः—कोइक कुमार तो क्रीडाथी ( पोताना ) कंकणपर हाथमांना पुष्पो मूकतो हतो, ते जाणे के तेणीने मेळववामाटे तेमां रहेला नवे ग्रहोने पूजतो होय नही ! एम देखातो हतो. ॥ २२ ॥

रेजे सख्युः पुरःस्थस्य वेणिं पाणौ धरन्परः । स्वं तस्यै वशगं वक्तुं कुर्वन्दिव्यमिवौरगम् ॥ २३ ॥

अन्वयः–परः पुरःस्थस्य सख्युः वेणिं पाणौ धरन्, तस्यै स्वं वशगं वक्तुं औरगं दिव्यं कुर्वन् इव रेजे. ॥ २३ ॥

अर्थः—( वळी कोइ ) बीजो राजकुमार आगळ बेठेला मित्रनो चोटलो हाथमां लेतोथको, तेणीने पोते वश थयेल छे, एम कहेवामाटे जाणे सर्पसंबंधि दिव्य करतो होय नही! तेम शोभतो हतो. ॥ २३ ॥

कश्चिज्जगाद पादान्तजुषो नीचैर्मुखः सखीन् । नमन्मौलितया तस्याः सामनि प्रविशन्निव ॥ २४ ॥

अन्वयः–कश्चित् नमन्मौलितया तस्याः सामनि प्रविशन् इव नीचैर्मुखः पादांत जुषः सखीन् जगाद. ॥ २४ ॥

अर्थः—-कोइक राजकुमार ( पोताना ) नमतां मस्तकवडे जाणे तेणीनी आजीजी करतो होय नही! एम नीचुं मुख करीने (पोताना ) पग आगळ बेठेला मित्रोसाथे वातो करवा लाग्यो. ॥ २४ ॥

अपरः कम्पयामास मौलिमालोकयन्निमाम् । पुष्पबाणेन बाणेन बाढं हत इवोरसि ॥ २५ ॥

अन्वयः–अपरः पुष्पबाणेन बाणेन उरसि बाढं हतः इव इमां आलोकयन् मौलिं कंपयामास. ॥ २५ ॥

अर्थः—( वळी ) कोइक बीजो राजकुमार कामदेवना बाणथी जाणे हृदयमां अत्यंत घायल थयो होय नही! तेम ते राजकुमारीने जोतो थको मस्तक कंपाववा लाग्यो ॥ २५ ॥

हृदि स्त्रग्रजसाकीर्णे चिक्षेपान्यो मुखानिलम् । तामनात्मोचितां मत्वा न्यग्मुखो निःश्वसन्निव ॥२६॥

अन्वयः-अन्यः तां अनात्म उचितां मत्वा न्यग्मुखः निःश्वसन् इव, स्रग् रजसा आकीर्णे हृदि मुखानिलं चिक्षेप. ॥ २६ ॥

अर्थः—(वळी) बीजो कोइक राजकुमार ते कन्याने पोताने लायक नही मानीने नीचुं मुख करी, जाणे निःश्वास मूकतो होय नहिं! तेम पुष्पमालानी रजथी खरडायेला हृदयपर मुखथी पवन नाखवा लाग्यो. ॥ २६ ॥

तवेन्दुसुन्दरं वक्त्रमिति तां ज्ञापयन्निव । मुष्ट्या न्यमीलयल्लीलापद्मपत्रावलीं परः ॥ २७ ॥

अन्वयः-तव वक्त्रं इन्दु सुंदरं, इति तां ज्ञापयन् इव, परः लीला पद्म पत्र आवलीं मुष्ट्या न्यमीलयत्. ॥ २७ ॥

अर्थः—तारुं मुख चंद्रसरखुं सुंदर छे, एम ते कुमारीने जाणे जणावतो होय नही! तेम बीजो (कोइक) राजकुमार क्रीडामाटे राखेलां कमलना पत्रोनी श्रेणिने मुठीवडे दाबी देवा लाग्यो. ॥ २७ ॥

सुवर्णकेतकीपर्णमपरः करजांकुरैः । विलिलेख तदङ्गेषु दत्तदृक्पुलकाङ्कितः ॥ २८ ॥

अन्वयः—तदंगेषु दत्त दृग्, पुलक अंकितः अपरः करज अंकुरैः सुवर्ण केतकी पर्णं विलिलेख. ॥ २८ ॥

अर्थः—तेणीना शरीरपर राखेली छे दृष्टि जेणे एवो, अने रोमांचित थयेलो ( कोइक ) बीजो राजकुमार नखोनी अणीओवडे सोनेरी रंगनी केतकीनी पांखडीओने कोतरवा लाग्यो. ॥ २८ ॥

कश्चित्तद्दर्शनोद्भिन्नस्वेदबिन्दुचयाञ्चितः । अहो संघट्टघर्मोऽयमित्यूचेऽन्तःस्मितान्सखीन् ॥ २९ ॥

अन्वयः—तत् दर्शन उद्भिन्न स्वेद बिंदु चय अंचितः कश्चित् , अहो! अयं संघट्ट घर्मः, इति अंतः स्मितान् सखीन् ऊचे.
अर्थः-तेणीने जोवाथी उत्पन्न थयेला पसीनाना बिंदुओना समूहथी भरेलो कोइक राजकुमार, अहो! आ गडदीथी बफारो (थाय छे) एम हृदयमां हांसी करता (पोताना) मित्रोने कहेवा लाग्यो. ॥ २९ ॥

**तां निरीक्ष्य कुरङ्गाक्षीं दृशं कोऽपि हृदि न्यधात् । तत्कालमिह कामेन क्षिप्तं काण्डमिवेक्षितुम् ॥३०॥**

अन्वयः—कः अपि इह तत्कालं कामेन क्षिप्तं कांडं ईक्षितुं इव, तां कुरंगाक्षीं निरीक्ष्य हृदि दृशं न्यधात्. ॥ ३० ॥
अर्थः-कोइक तो अहीं एकदम कामदेवे घोंची दीधेला बाणने जाणे जोवामाटे होय नही! तेम ते हरिणाक्षीने जोइने (पोतानी) छातीपर दृष्टि करवा लाग्यो. ॥ ३० ॥

**एवं विकुर्वतामुर्वीपतीनामग्रवर्त्मनि । आनिनाय जया नाम प्रतिहारी पतिंवराम् ॥ ३१ ॥**

अन्वयः—एवं विकुर्वतां उर्वीपतीनां अग्र वर्त्मनि जयानाम प्रतिहारी पतिंवरां आनिनाय. ॥ ३१ ॥
अर्थः-एरीते चेष्टा करता एवा ते राजाओना अग्रभागमां जयानामनी प्रतिहारी ते स्वयंवरा कुमारिकाने लावी. ॥ ३१ ॥

**अथो निवार्य तूर्यादि दर्शयन्ती धरापतीन् । इयमूचे विलोलभ्रूशृङ्गा शृङ्गारसुन्दरीम् ॥ ३२ ॥**

अन्वयः—अथो तूर्यादि निवार्य धरापतीन् दर्शयंती, विलोल भ्रू शृंगा इयं शृंगारसुंदरीं ऊचे. ॥ ३२ ॥
अर्थः-पछी वाजित्रआदिकने बंध करीने राजाओने ओळखावती, तथा चपल भ्रकुटिना अग्रभागवाळी ते शृंगारसुंदरीने कहेवा

लागी के, ॥ ३२ ॥

अमी समीयुस्त्वद्वश्या विश्वे विश्वम्भराधराः । चन्द्रीकुरु कमप्येषु चक्षुःकुमुदकौमुदि ॥ ३३ ॥

अन्वयः-(हे) चक्षुः कुमुद कौमुदि ! त्वद्वश्याः इमे विश्वे विश्वंभराः समीयुः, एषु कं अपि चंद्रीकुरु ? ॥ ३३ ॥

अर्थः—चक्षुरूपी कुमुदने चांदनीसरखी, एवी हे राजकुमारी ! तने वश थइने आ सघळा राजाओ आवेला छे, माटे तेओमांथी कोइकने पण तुं चंद्ररूप कर ? ॥ ३३ ॥

अयं स हंससंज्ञः श्रीनाभिसूनुकुलाङ्कुरः । राशीकृतयशा देवि काशीपुरपुरन्दरः ॥ ३४ ॥

अन्वयः-(हे) देवि ! श्रीनाभि सूनु कुल अंकुरः, राशीकृत यशाः, सः अयं हंससंज्ञः काशीपुर पुरंदरः ॥ ३४ ॥

अर्थः-हे देवि ! श्रीनाभिराजाना पुत्रना कुलमां उत्पन्न थयेलो तथा यशना समूहवाळो ते आ हंसनामनो काशीनगरनो राजा छे.

दिवा विश्वसमक्षाणि निशि स्वप्नमयानि च । न विश्राम्यति देवार्चादानानि जनयन्नयम् ॥ ३५ ॥

अन्वयः-अयं दिवा विश्व समक्षाणि, च निशि स्वप्नमयानि देव अर्चा दानानि जनयन् न विश्राम्यति. ॥ ३५ ॥

अर्थः—आ राजा दिवसे जगतनी समक्ष, अने रात्रिए स्वप्नरूपे, देवपूजा तथा दान करतो थको थाकतो नथी. ॥ ३५ ॥

एष धर्मैकनिर्माणव्यसनी शक्तिमानपि । अन्यैरपि नृपैर्भुज्यमानामूर्वीमुपेक्षते ॥ ३६ ॥

अन्वयः—धर्म एक निर्माण व्यसनी एषः शक्तिमान् अपि अन्यैः नृपैः भुज्यमानां ऊर्वीं अपि उपेक्षते. ॥ ३६ ॥

अर्थः—फक्त एक धर्म करवामांज आसक्त थयेलो आ राजा शक्तिवान होवा छतां पण, बीजा राजाओथी भोगवाती पृथ्वीनी पण उपेक्षा करे छे. ॥ ३६ ॥

**अमुं गमनलालित्यवरले तरले वृणु । रङ्गद्गङ्गातरङ्गेषु हंसैकसहचारिणी ॥ ३७ ॥**

अन्वयः—(हे) गमन लालित्य वरले! तरले! अमुं वृणु? रंगद् गंगा तरंगेषु हंस एक सहचारिणी ( भव? ) ॥ ३७ ॥

अर्थः—गतिनी लीलाथी हे हंसी सरखी चपल राजकुमारी! आ काशीपतिने वर? अने उछळता गंगाना मोजाओमां (क्रीडा करवा माटे) आ हंसराजानी सहचारिणी था? ॥ ३७ ॥

**याति पूज्यस्य कुल्योऽपि पूज्यतुल्यो नमस्यताम् । कुमार्यां मन्दमित्युक्तेऽभिसृत्याग्रे जगौ जया ॥३८॥**

अन्वयः—पूज्यस्य कुल्यः अपि पूज्यतुल्यः, नमस्यतां याति, इति मंदं कुमार्यां उक्ते जया अग्रे अभिसृत्य जगौ. ॥ ३८ ॥

अर्थः—पूजनीकना कुलमां उत्पन्न थयेलो मनुष्य पण पूजवा लायक होवाथी नमस्कार करवा योग्य होय छे, एम धीमेथी ते राजकुमारीए कहेवाबाद ते जया आगळ चालीने कहेवा लागी के ॥ ३८ ॥

**अयं जयन्त इत्यूर्वीजानिर्विजयते युवा । जेता द्विषामयोध्यानामयोध्यानायको बली ॥ ३९ ॥**

अन्वयः—अयं युवा जयंत इति ऊर्वीजानिः विजयते, अयोध्यानां द्विषां जेता, बली अयोध्या नायकः ॥ ३९ ॥

अर्थः—आ युवान जयंत नामनो राजा जयवंतो वर्ते छे, ते शूरवीर शत्रुओने जीतनारो बलवान अयोध्यानो राजा छे. ॥३९॥

कान्दिशीकाऽरिदुःकीर्तिकस्तूरीपूरितश्रियाम् । अयं यात्राविहारी स्वं हारीचक्रे दिशां यशः ॥ ४० ॥

अन्वयः—यात्राविहारी अयं स्वं यशः कांदिशीक अरि दुःकीर्ति कस्तूरी पूरित श्रियां दिशां हारीचक्रे. ॥ ४० ॥

अर्थः—विजयमाटे चालता एवा आ राजाए पोताना यशने, गभरायेला शत्रुओनी अपकीर्तिरूपी कस्तूरीथी भरेली शोभावाळी दिशाओमां हाररूपे गोठवेल छे. ॥ ४० ॥

अमुं वृणु विलासेषु देवि सेविष्यसे यदि । सरयूतीरवानीरसमीरसरसा निशाः ॥ ४१ ॥

अन्वयः—(हे) देवि ! विलासेषु यदि सरयू तीर वानीर समीर सरसाः निशाः सेविष्यसे, अमुं वृणु ? ॥ ४१ ॥

अर्थः—हे देवि ! विलासवखते जो सरयूनदीपरना नेतरना वायुथी रसयुक्त थयेली रात्रिओ वीताडवी होय तो आ राजाने वर ?

स्मरश्रीभासुरेऽप्युद्यदहर्पतिमहस्यपि । कन्यास्मिन्नाभजद् भावं वसन्ते मालतीव सा ॥ ४२ ॥

अन्वयः—मालती वसंते इव, स्मर श्री भासुरे अपि, उद्यत् अहर्पति महसि अपि अस्मिन् सा कन्या भावं न अभजत्. ॥४२॥

अर्थः—मालती वसंतऋतुमां जेम स्नेह न करे, तेम कामदेवनी शोभाथी देदीप्यमान, अने उगता सूर्यसरखा तेजवाळा, एवा पण आ राजाप्रते ते कन्या स्नेहभावने पामी नही. ॥ ४२ ॥

दत्तद्वित्रिपदावादीत्तामुद्दिश्य जया ततः । प्रथितोऽयं पृथुर्नाम पृथुश्रीर्मथुरापतिः ॥ ४३ ॥

अन्वयः-ततः दत्त द्वित्रिपदा जया तां उद्दिश्य अवादीत्, अयं प्रथितः पृथुश्रीः पृथुर्नाम मथुरापतिः ॥ ४३ ॥
अर्थः-पछी बे त्रण पगलां आगळ चालीने जयाए ते राजकन्याने उद्देशीने कह्युं के, आ प्रख्याति पामेलो, अने विस्तीर्ण लक्ष्मीवाळो पृथुनामे मथुरानो राजा छे. ॥४३ ॥

**शक्यते लेखितुं नैष चित्रे चित्रकरैरपि । स्रष्टुं चित्तेऽपि चिद्रूपैरेतद्रूपं न पार्यते ॥ ४४ ॥**

अन्वयः-एषः चित्रकरैः अपि चित्रे लेखितुं न शक्यते, चिद्रूपैः एतद् रूपं चित्ते अपि स्रष्टुं न पार्यते. ॥ ४४ ॥
अर्थः-आ राजाने चिताराओ पण चित्रमां चीतरी शकता नथी, तथा ज्ञानीओ आ राजानुं रूप हृदयमां पण आरखी शकता नथी.

**अयं स्वतेजःसप्ताश्वसंतप्तामन्वहं महीम् । अमन्दैश्चन्दनस्यन्दैरिव सिञ्चति कीर्तिभिः ॥ ४५ ॥**

अन्वयः-अयं स्व तेजः सप्ताश्व संतप्तां महीं अन्वहं अमंदैः चंदनस्यंदैः इव कीर्तिभिः सिंचति. ॥ ४५ ॥
अर्थः-आ राजा पोताना तेजरूपी सूर्यथी तपेली पृथ्वीने हमेशां जाणे उत्तम चंदनना रसथी होय नही! तेम कीर्तिवडे सींचेछे.

**अमुं वृणीष्व रन्तुं चेदुचिता रुचिता तव । उद्यत्कलिन्दजाबिन्दुवृन्दा वृन्दावनावनिः ॥ ४६ ॥**

अन्वयः-उद्यत् कलिंदजा बिंदु वृंदा वृंदावन अवनिः तव रंतुं चेत् उचिता रुचिता, अमुं वृणीष्व ? ॥ ४६ ॥
अर्थः-उछळता छे यमुनानदीना जलबिंदुओना समूहो जेमां, एवी वृंदावननी भूमि तने विलास करवामटे योग्य लागती होय, तथा रुचती होय, तो (तुं) आ राजाने वर ? ॥ ४६ ॥

राज्ञोऽस्य मुखमश्रीकमालोक्य शिबिकावहाः ॥ इहाबद्धस्पृहां कन्यां मन्वाना जग्मुरग्रतः ॥ ४७ ॥

अन्वयः—अस्य राज्ञः अश्रीकं मुखं आलोक्य, इह कन्यां अबद्ध स्पृहां मन्वानाः शिबिका वहाः अग्रतः जग्मुः. ॥ ४७ ॥

अर्थः–ते राजानुं शोभारहित मुख जोइने, ते प्रते ते राजकन्याने इच्छा नही राखती जाणीने पालखी उंचकनाराओ आगळ चाल्या.

जगादाथ जया देवि जयनामा जयत्ययम् । उज्जयिन्या विभुर्विश्वजयिन्याः संपदां पदम् ॥ ४८ ॥

अन्वयः–अथ जया जगाद, (हे) देवि ! विश्व जयिन्याः उज्जयिन्याः विभुः, संपदां पदं अयं जयनामा जयति. ॥ ४८ ॥

अर्थः—पछी ते जया बोली के, हे देवि ! जगतमां जय पामती एवी उज्जयिनी नगरीनो स्वामी, तथा संपदाना स्थानसरखो, एवो आ जयनामनो राजा जयवंतो वर्ते छे. ॥ ४८ ॥

अयं दिग्विजयोदारबलप्राग्भारभारिणीम् । मृणालनाललीलेऽपि महीं बाहौ वहत्यहो ॥ ४९ ॥

अन्वयः—अहो ! अयं दिग् विजय उदार बल प्राग्भार भारिणीं महीं मृणाल नाल लीले अपि बाहौ वहति. ॥ ४९ ॥

अर्थः—अहो ! आ राजाए दिग्विजय करवामां समर्थ एवां सैन्यना अति भारथी बोजावाळी थयेली पृथ्वीने (पोताना) कमल-नालसरखा कोमल हाथमां पण उंचकी लीधेली छे. ॥ ४९ ॥

अमुं तृणीकृताराातिं वृणीष्व वरवर्णिनि । सपत्नी रत्नगर्भा ते भातु रत्नाकराम्बरा ॥ ५० ॥

अन्वयः—(हे) वर वर्णिनि! तृणीकृत अराति अमुं वृणीष्व? रत्नाकर अंबरा रत्नगर्भा ते सपत्नी भातु. ॥ ५० ॥

अर्थः—हे उत्तम स्वरूपवाळी राजकुमारी! तृणसमान करेल छे शत्रुओने जेणे, एवा आ राजाने तुं वर? अने तेथी महासागररूपी वस्त्रवाळी पृथ्वी भले तारी सपत्नी थाओ? ॥ ५० ॥

रत्नदण्डप्रतिमितां भूपेऽस्मिन्नस्मितेक्षणाम्। तां वीक्ष्य कन्यकां निन्युर्विमानं तेऽन्यतो नराः ॥ ५१ ॥

अन्वयः—अस्मिन् भूपे रत्न दंड प्रतिमितां, अस्मित ईक्षणां तां कन्यकां वीक्ष्य ते नराः विमानं अन्यतः निन्युः. ॥ ५१ ॥

अर्थः—आ राजाप्रते रत्नना दंडसरखी अविकस्वर चक्षुवाळी ते कन्याने जोइने ते पुरुषो पालखीने बीजीतरफ लेइ गया. ॥५१॥

अथावदज्जया देवि पश्यामुं दर्पकाभिधम्। पाण्ड्यं कोदण्डपाण्डित्यचण्डमाखण्डलं भुवः ॥ ५२ ॥

अन्वयः—अथ जया अवदत्, (हे) देवि! कोदंड पांडित्य चंड, पांड्यं अमुं दर्पकाभिधं भुवः आखंडलं पश्य? ॥ ५२ ॥

अर्थः—पछी ते जयाए कह्युं के, हे देवि! धनुर्विद्यामां महापराक्रमी, तथा पांड्यवंशमां जन्मेला, एवा आ दर्पकनामना राजाने तुं जो? ॥ ५२ ॥

द्विषः स्वप्नेषु वीक्ष्यामुमुदस्त्रं जातजागराः। नमन्त्यस्य भ्रमाच्चित्रमन्मथं चित्रवेश्मसु ॥ ५३ ॥

अन्वयः—स्वप्नेषु अमुं उदस्त्रं वीक्ष्य जात जागराः द्विषः अस्य भ्रमात् चित्र वेश्मसु चित्र मन्मथं नमंति. ॥ ५३ ॥

अर्थः—स्वप्नमां आ राजाने उगामेलां हथीयारवाळो जोइने जागी उठता शत्रुओ, आ राजाना भ्रमथी चित्रशालामां रहेलां का-

मदेवना चिंतने नमे छे. ॥ ५३ ॥

एलावनसहेलासु वेलासु पयसां निधेः । ताम्रपर्णीसरिन्मुक्तासिकतासु रतिर्यदि ॥ ५४ ॥

तदेनं वृणु वामाक्षि मदयन्तु मनस्तव । कर्पूरचन्दनामोदकलया मलयानिलाः ॥ ५५ ॥ युग्मं ॥

अन्वयः-एला वन सहेलासु पयसां निधेः वेलासु, ताम्रपर्णी सरित् मुक्ता सिकतासु यदि रतिः, ॥ ५४ ॥ तत् हे वामाक्षि ! एनं वृणु ? कर्पूर चंदन आमोद कलया (कलिताः) मलय अनिलाः तव मनः मदयंतु. ॥ ५५ ॥ युग्मं ॥

अर्थः-एलायचीना वनोनी शोभावाळा महासागरना किनारापर, तथा ताम्रपर्णी नदीनी मोतीसरखी वेळुमां जो तने आनंद थतो होय, ॥५४॥ तो हे मनोहर चक्षुवाळी कुमारी ! तुं आ राजाने वर ? के जेथी कपूर अने चंदननी सुगंधीवाळा मलयाचलना वायु तारां मनने भले आनंद पमाडो ? ॥ ५५ ॥ युग्मं ॥

इतोऽस्याः सरलं वीक्ष्य तरलाक्ष्या निरीक्षणम् । चलित्वा किंचिदित्यूचे वचः सुविनया जया ॥५६॥

अन्वयः—इतः अस्याः तरलाक्ष्याः सरलं निरीक्षणं वीक्ष्य सुविनया जया किंचित् चलित्वा इति ऊचे. ॥ ५६ ॥

अर्थः--ते राजातरफ ते चपलाक्षीनुं सरल निरीक्षण जोइने उत्तम विनयवाळी जया कंइक (आगळ) चालीने कहेवा लागी के,

देवि चित्राङ्गदो नाम विचित्रगुणगौरवः । असौ ददाति नानन्दं कस्मै कश्मीरभूपतिः ॥ ५७ ॥

अन्वयः—(हे) देवि ! विचित्र गुण गौरवः असौ चित्रांगदः नाम कश्मीर भूपतिः कस्मै आनंदं न ददाति ? ॥ ५७ ॥
अर्थः—हे देवि ! नाना प्रकारना गुणोना गौरववाळो आ चित्रांगदनामनो काश्मीरदेशनो राजा कोने आनंद आपतो नथी ?

**शुद्धान्तमस्य किं श्लाघे श्लाघ्यास्ता अपि योषितः । स्वप्ने प्रतिमितौ चित्रेऽप्येनं कान्तं स्पृशन्ति याः ५८**

अन्वयः–अस्य शुद्धांतं किं श्लाघे ? याः स्वप्ने प्रतिमितौ चित्रे अपि एनं कांतं स्पृशंति ताः योषितः अपि श्लाघ्याः. ॥ ५८ ॥
अर्थः—आ राजाना अंतःपुरनी हुं शुं प्रशंसा करुं ? जे स्त्रीओ स्वप्नमां प्रतिबिंबरूप चित्रमां पण आ स्वामीने स्पर्श करे छे, ते स्त्रीओ पण प्रशंसाने पात्र छे. ॥ ५८ ॥

**अमुं कलय लोलाक्षि त्वत्कपोले लिखत्वयम् । पत्रं शुद्धान्तकान्तासु चित्रमभ्यस्तमन्वहम् ॥ ५९ ॥**

अन्वयः-(हे) लोलाक्षि ! अमुं कलय ? अयं शुद्धांत कांतासु अन्वहं अभ्यस्तं चित्रं पत्रं त्वत्कपोले लिखतु. ॥ ५९ ॥
अर्थः—( माटे ) हे चपलाक्षी ! तुं आ राजाने वर ? के जेथी ते ( पोताना ) शुद्ध अंतेउरनी स्त्रीओमां हमेशां शीखेली चित्रवल्लरी तारा कपोलपर (पण) चितरे. ॥ ५९ ॥

**रागोचिताः स्तुतीरस्य शारदार्चनसत्कवेः । नित्यं निधेहि काश्मोरकलिका इव कर्णयोः ॥ ६० ॥**

अन्वयः–शारदा अर्चन सत्कवेः अस्य रागोचिताः स्तुतीः काश्मीर कलिकाः इव नित्यं कर्णयोः निधेहि ? ॥ ६० ॥
अर्थः–सरस्वतीना पूजनथी उत्तम कविए (रचेली) आ राजानी रागने लायक एवी स्तुतीओने केसरनी कळीओनीपेठे तारां कर्णोमां धारण कर ? ॥ ६० ॥

स मे परः पुमानेव यः पुराप्तपरिग्रहः । इत्यथाह प्रतीहारीं कुमारीयं मृदुस्वरा ॥ ६१ ॥

अन्वयः—अथ यः पुरा आप्त परिग्रहः, सः मे परः पुमान् एव, इति मृदु स्वरा इयं कुमारी प्रतीहारीं आह. ॥ ६१ ॥

अर्थः-हवे जे प्रथमथी (बीजी) स्त्रीओने परणेलो छे, ते मारे मन परपुरुषज छे, एम धीमे स्वरे ते राजकुमारीए प्रतीहारीनेकह्युं.

नुत्वा नुत्वा ततो भूपमन्यमन्यं ययौ जया । आलोक्यालोक्य कुसुमं वनभृङ्गीव सुस्वरा ॥ ६२ ॥

अन्वयः—ततः सुस्वरा वन भृंगी कुसुमं आलोक्य आलोक्य इव अन्यं अन्यं भूपं नुत्वा नुत्वा जया ययौ. ॥ ६२ ॥

अर्थः-पछी उत्तम नादवाळी वननी भमरी पुष्पोने जोती जोती जेम ( आगळ आगळ ) चाली जाय छे, तेम बीजा बीजा राजाओनी प्रशंसा करी करीने ते जया (पण आगळ आगळ) चालवा लागी. ॥ ६२ ॥

सनत्कुमाररक्ता सा तेषु तस्थौ न कन्यका । जलाशयेषु हंसीव सिद्धसिन्धुनदोन्मुखी ॥ ६३ ॥

अन्वयः—सिद्धसिंधुनद उन्मुखी हंसी जलाशयेषु इव, सनत्कुमार रक्ता सा कन्यका तेषु न तस्थौ. ॥ ६३ ॥

अर्थः—गंगानदीनी सन्मुख जनारी हंसी ( बीजा ) जलाशयोमां जेम न थोभे, तेम सनत्कुमारमां आसक्त थयेलो ते राजकन्या ते ते राजाओपासे थोभी नही. ॥ ६३ ॥

सा ययौ यस्य यस्याग्रं स स भूपोऽभजत्प्रभाम् । यं यं लक्ष्मीरिवामुञ्चज्जज्ञे स स मलीमसः ॥ ६४ ॥

अन्वयः-लक्ष्मीः इव सा यस्य यस्य अग्रं ययौ, सः सः भूपः प्रभां अभजत्, यं यं अमुंचत्, सः सः मलीमसः जज्ञे. ॥ ६४ ॥
अर्थः-लक्ष्मीनीपेठे ते कन्या जेनी जेनी नजीक गइ, ते ते राजा तेजस्वी थतो हतो, अने जेने जेने ते छोडी देती हती, ते ते झांखो थतो हतो. ॥ ६४ ॥

**वृतं प्रागेव दृष्टयैव बालया वरमालया । सनत्कुमारमासाद्य निजगाद् जया ततः ॥ ६५ ॥**

अन्वयः-ततः बालया प्राक् एव दृष्टया एव वरमालया वृतं सनत्कुमारं आसाद्य जया निजगाद. ॥ ६५ ॥
अर्थः-पछी ते कन्याए प्रथमथीज दृष्टिरूपीवरमालाथी वरेला सनत्कुमारनी पासे आवीने जया कहेवा लागी के, ॥ ६५ ॥

**जम्बूद्वीपश्रियो भाल इव खण्डेऽत्र भारते । पुरी किरोटसादृश्यं श्रीकान्ता परिगच्छति ॥ ६६ ॥**

अन्वयः-जंबूद्वीप श्रियः भाले इव अत्र भारते खंडे श्रीकांता पुरी किरीट सादृश्यं परिगच्छति. ॥ ६६ ॥
अर्थः-जंबूद्वीपनी लक्ष्मीना ललाटसरखा आ भरतक्षेत्रमां श्रीकांतानामनी नगरी (तेना) मुकुटसरखी शोभे छे. ॥ ६६ ॥

**सिंहनामा गतत्रासः कलाभिर्मुकुरीकृतः । तत्र नायकमाणिक्यनिभतां लभते नृपः ॥ ६७ ॥**

अन्वयः-तत्र गतत्रासः कलाभिः मुकुरीकृतः सिंहनामा नृपः नायक माणिक्य निभतां लभते. ॥ ६७ ॥
अर्थः—ते मुकुटमां, भयविनानो ( पक्षे-लीसोटारूपी दूषणविनानो ) तथा कलाओए दर्पणरूप करेलो सिंहनामे राजा, वचमां रहेला मुख्य माणिक्यनी बरोबरी करे छे. ॥ ६७ ॥

अयं तस्याङ्गभूरंशुप्रकाश इव काशते । सनत्कुमारस्तारुण्यरूपयोरुचितस्तव ॥ ६८ ॥

अन्वयः-तस्य अंगभूः अंशु प्रकाशः इव, तारुण्य रूपयोः तव उचितः अयं सनत्कुमारः काशते. ॥ ६८ ॥

अर्थः—ते राजाना शरीरथी उत्पन्न थयेला किरणोना प्रकाशसरखो, अने युवानी तथा रूपमां तने लायक, एवो आ सनत्कुमार शोभे छे. ॥ ६८ ॥

अमान्तः काममस्यान्तः सुवृत्ता विशदा गुणाः । एतच्चित्त इव व्यूढे व्योम्नि तस्थुरुडुच्छलात् ॥ ६९ ॥

अन्वयः-अस्य अंतः कामं अमांतः सुवृत्ताः विशदाः गुणाः एतत् चित्ते इव व्यूढे व्योम्नि उडु च्छलात् तस्थुः. ॥ ६९ ॥

अर्थः—तेना अंतःकरणमां सारीरीते नही माता, उत्तम आचरणोवाळा, ( पक्षे-गोळआकारवाळा ) निर्मळ गुणो, तेना हृदयसरखा गंभीर आकाशमां ताराओना मिषथी रहेला छे. ॥ ६९ ॥

अनन्यशोभमम्भोजमिवास्योद्भासुरं करम् । समेति पद्मवासेति युधि लक्ष्मीर्विपक्षतः ॥ ७० ॥

अन्वयः-पद्म वासा इति विपक्षतः लक्ष्मीः युधि, अनन्य शोभं, अंभोजं इव उद्भासुरं अस्य करं समेति. ॥ ७० ॥

अर्थः—( हुं ) कमलमां निवास करनारी छुं, एम विचारीने शत्रुनी लक्ष्मी, युद्धमां अनुपम शोभावाळा, अने कमलसरखा तेजस्वी एवा आ सनत्कुमारनां हाथमां आवीने ( वसे छे. ) ॥ ७० ॥

कलानां ग्रहणे रक्तः सक्तश्चायं गुणार्जने । तद्भङ्गपातभीत्येव न पुराभूत्परिग्रही ॥ ७१ ॥

अन्वयः—अयं कलानां ग्रहणे रक्तः, च गुण अर्जने सक्तः, तद्‌भंग पात भीत्या इव पुरा परिग्रही न अभूत्. ॥ ७१ ॥

अर्थः—आ राजकुमार कलाओना अभ्यासमां लीन थयो छे, अने गुणो उपार्जन करवामां आसक्त थयेलो छे, ते कार्यमां जाणे भंगाण पडवाना डरथी होय नही ! तेम (तेणे) पूर्वे पाणिग्रहण कर्युं नथी. ॥ ७१ ॥

**वरमाला वेरण्याङ्गि तत्कण्ठेऽस्य निवेश्यताम् ॥ अनुरूपस्य वरणात्त्वां नुवन्तु दिवौकसः ॥ ७२ ॥**

अन्वयः-तत् (हे) वरेण्यांगि ! अस्य कंठे वरमाला निवेश्यतां ? अनुरूपस्य वरणात् त्वां दिवौकसः नुवंतु. ॥ ७२ ॥

अर्थः—माटे हे सुंदर शरीरवाळी शृंगारसुंदरी ! (तुं) आ सनत्कुमारना कंठमां वरमाला नाख ? अने योग्य वर वरवाथी तारी देवो (पण) भले प्रशंसा करे. ॥ ७२ ॥

**अथोद्यत्पुलकं स्वेदलवार्द्रं दधती वपुः । माल्ये न्यस्य कराम्भोजं कम्पि चम्पिकयार्पिते ॥ ७३ ॥**

**बद्धबाष्पां दृशं कन्या वरे च शनकैर्ददौ । सनत्कुमारयुग्मं च मञ्चस्थमियमैक्षत ॥ ७४ ॥ युग्मम् ॥**

अन्वयः—अथ उद्यत्पुलकं, स्वेद लव आर्द्रं वपुः दधती कन्या, चंपिकया अर्पिते माल्ये कंपि कर अंभोजं न्यस्य, च वरे बद्ध बाष्पां दृशं शनकैः ददौ, च इयं सनत्कुमारयुग्मं मंचस्थं अैक्षत्. ॥ ७३ ॥ ७४ ॥ युग्मं ॥

अर्थः—पछी रोमांचित थयेलां अने पसीनाना बिंदुओवडे भींजायेलां शरीरने धारण करती ते राजकन्याए चंपिकाए आपेली वरमालापर (पोतानो) कंपतो हस्तकमल राखीने, ते वरप्रते आंसुओवाळी (पोतानी) दृष्टि धीमेथी स्थिर करी, परंतु (ते समये)

तेणीए बे सनत्कुमारने खुरशीपर बेठेला जोया. ॥ ७३ ॥ ७४ ॥ युग्मं ॥

अथ सद्यस्तदाश्चर्यव्याकुले क्षितिभृत्कुले । कन्यायां कं वृणोमीति ध्यायन्त्यां वीक्ष्य तौ मुहुः ॥ ७५ ॥

मत्पार्श्ववर्ती धूर्तोऽयं कोऽपि कन्ये वृणीष्व माम् । इति तुल्यं तयोरास्यादुल्लास तदा वचः ॥ ७६ ॥

अन्वयः—अथ तौ वीक्ष्य सद्यः क्षिति भृत् कुले तत् आश्चर्य व्याकुले, कं वृणोमि ? इति मुहुः कन्यायां ध्यायंत्यां, ॥ ७५ ॥ हे कन्ये ! अयं मत्पार्श्व वर्ती कः अपि धूर्तः, मां वृणीष्व ? इति तयोः आस्यात् तदा तुल्यं वचः उल्लास. ॥ ७६ ॥ युग्मं ॥

अर्थः—हवे तेओ बन्नेने जोइने एकदम ते राजाओनो समूह तो आश्चर्यमां पडी गयो, तथा ( आ बेमांथी ) कोने वरुं ? एम वारंवार ते कन्या विचारमां पडवा लागी, ॥ ७५ ॥ ( त्यारे ) हे कुमारी ! आ मारीपासे बेठेलो कोइक ठगारो छे, माटे ( तेने तजी ) मने वरजे, एम तेओ बन्नेना मुखमांथी ते वखते सरखुं वचन निकळवा लाग्युं. ॥ ७६ ॥ युग्मं ॥

ततः सनत्कुमारो यः स मदीयहृदि स्थितः । स्वकण्ठन्यस्तयैवाहं मालया तद् वृणोमि तम् ॥ ७७ ॥

अन्वयः—ततः यः सनत्कुमारः सः मदीय हृदि स्थितः, तत् अहं स्वकंठ न्यस्तया मालया एव तं वृणोमि. ॥ ७७ ॥

अर्थः—पछी जे ( सत्य ) सनत्कुमार छे, ते मारा हृदयमां बेठेला छे, माटे हुं माराज कंठमां नाखेली माळावडे तेने वरुं छुं,

एवं वचो दृढारावं श्रावयन्ती सभासदः । स्वकण्ठकन्दले बाला वरमालामलालयत् ॥ ७८ ॥

अन्वयः—एवं दृढ आरावं वचः सभासदः श्रावयंती बाला स्वकंठ कंदले वरमालां अलालयत्. ॥ ७८ ॥

अर्थः-एवी रीते म्होटेथी बोलेलां वचनो सभासदोने संभळावती एवी ते शृंगारसुंदरीए पोताना कंठमां वरमाला आरोपी.

इति तन्मतिलीलाभिर्वैलक्ष्याद्विलयं गते । मायासनत्कुमारेऽभूदद्वितीयः स भूपभूः ॥ ७९ ॥

अन्वयः-इति तन्मति लीलाभिः वैलक्ष्यात् माया सनत्कुमारे विलयं गते सः भूपभूः अद्वितीयः अभूत्. ॥ ७९ ॥

अर्थः-एरीते तेणीनी अकलहुशीयारीथी वीलखो पडेलो ते कपटी सनत्कुमार अदृश्य थयाबाद ते ( सत्य ) सनत्कुमार अनुपम रीते ( एकलो शोभवा ) लाग्यो. ॥ ७९ ॥

गुणिनो वरणादस्यां गुणज्ञायाममत्सरैः । चक्रे नृपकुलैर्मायाजयाज्जयजयारवः ॥ ८० ॥

अन्वयः—माया जयात् गुणिनः वरणात् अस्यां गुणज्ञायां अमत्सरैः नृपकुलैः जय जय आरवः चक्रे. ॥ ८० ॥

अर्थः—कपटजाळने जीती गुणवानने वरवाथी ते गुणोने जाणनारी राजकुमारीप्रते ईर्षा नही करनारा, एवा ( ते ) राजाओना समूहोए जयजय शब्द कर्यो. ॥ ८० ॥

तादृक्षदक्षताहृष्टैः स्वयंवरणदर्शिभिः । तस्या मूर्ध्नि मरुच्चक्रैश्चक्रिरे पुष्पवृष्टयः ॥ ८१ ॥

अन्वयः—स्वयंवरण दर्शिभिः मरुत् चक्रैः तादृक्ष दक्षता हृष्टैः तस्याः मूर्ध्नि पुष्प वृष्टयः चक्रिरे. ॥ ८१ ॥

अर्थः-(ते) स्वयंवर जोवाने आवेला देवोना समूहोए (तेणीनी) तेवीरीतनी चतुराइथी खुशी थइने तेना मस्तकपर पुष्प वृष्टिओ करी.

अथानन्दपथामन्दपान्थो नाभाकभूविभुः । सन्मानावर्जितैः सर्वैर्जगतीजानिभिर्युतः ॥ ८२ ॥

तयोः स्मेरस्मरोत्साहं तं विवाहोत्सवं व्यधात् । यद्विलोकादिवेन्द्रोऽपि सहस्रनयनोऽजनि ॥८३॥युग्मम्॥

अन्वयः—अथ आनंद पथ अमंद पांथः नाभाक भूविभुः सन्मान आवर्जितैः सर्वैः जगती जानिभिः युतः, ॥ ८२ ॥ तयोः स्मेर स्मर उत्साहं तं विवाह उत्सवं व्यधात्, यत् विलोकात् इव इंद्रः अपि सहस्र नयनः अजनि. ॥ ८३ ॥ युग्मं. ॥

अर्थः—पछी आनंदना मार्गमां उतावळी चालवाळा ( अर्थात् अति आनंद पामेला ) ते नाभाक राजाए, सन्मानथी खुशी क-रेला ते सर्व राजाओनी साथे मळीने, ॥ ८२ ॥ ते बन्नेनो कामदेवना विकस्वर उत्साहवाळो एवो तो विवाहमहोत्सव कर्यो के, तेने जोवामाटे जाणे इंद्र पण हजार आंखोवाळो थयो ! ॥ ८३ ॥ युग्मं ॥

बभौ शृङ्गारसुन्दर्या करम्बिकरपल्लवः । कुमारः कल्पवल्ल्येव पारिजातमहीरुहः ॥ ८४ ॥

अन्वयः—शृंगारसुंदर्या करंबित कर पल्लवः कुमारः, कल्पवल्ल्या पारिजात महीरुहः इव बभौ. ॥ ८४ ॥

अर्थः—शृंगारसुंदरीए पकडेलो छे हस्तपल्लव जेनो, एवो ते सनत्कुमार, कल्पवल्लीए (आलिंगेला) पारिजात वृक्षनीपेठे शोभवा लाग्यो.

वासन्तीवासवेनाथ सत्कृताः कृतिना नृपाः । तदुत्सवोच्छ्वसच्चित्ताः पुरं जग्मुर्निजं निजम् ॥ ८५ ॥

अन्वयः—अथ कृतिना वासंती वासवेन सत्कृताः नृपाः तत् उत्सव उच्छ्वसत् चित्ताः निजं निजं पुरं जग्मुः ॥ ८५ ॥

अर्थः-पछी कृतार्थ थयेला एवा, ते वासंती नगरीना राजाए सत्कार करेला ( सर्वे ) राजाओ, ते स्वयंवर महोत्सवथी मनमां आनंद पामता थका पोतपोताने नगरे गया. ॥ ८५ ॥

**दिनानि कानिचित्प्रीयमाणो नवनवोत्सवैः । तस्थौ कुमारः शृङ्गारसागरे श्वशुरौकसि ॥ ८६ ॥**

अन्वयः—नव नव उत्सवैः प्रीयमाणः कुमारः कानिचित् दिनानि शृंगार सागरे श्वशुर ओकसि तस्थौ. ॥ ८६ ॥

अर्थः—नवनवा महोत्सवोवडे खुशी करातो ते सनत्कुमार केटलाक दिवसोसुधी शृंगाररसना महासागर सरखा एवा ससराने घेर रह्यो. ॥ ८६ ॥

**कथं ज्ञेयः स मायाकृदिति चिन्तैकलाञ्छनः । तस्येन्दुवदिहानन्दः प्रावर्धत दिने दिने ॥ ८७ ॥**

अन्वयः—सः मायाकृत् कथं ज्ञेयः? इति चिंता एक लांछनः तस्य आनंदः इन्दुवत् इह दिने दिने प्रावर्धत. ॥ ८७ ॥

अर्थः—ते कपटीने केम जाणवो? एटलीज चितारूपी फक्त एक लांछनवाळो तेनो आनंद चंद्रनी पेठे त्यां दिवसे दिवसे वृद्धि पामवा लाग्यो. ॥ ८७ ॥

**अथो कथंचिदापृच्छ्य वासन्तीशं प्रियान्वितः । तत्कृतोदारसत्कारः सैंहिः स्वस्यै पुरेऽचलत् ॥ ८८ ॥**

अन्वयः—अथो कथंचित् वासंतीशं आपृच्छय तत्कृत उदार सत्कारः सैंहिः प्रिया अन्वितः स्वस्यै पुरे अचलत्. ॥ ८८ ॥

अर्थः—पछी बहु आग्रहपूर्वक ते वासंतीनगरीना स्वामीनी रजा लेइने, तेणे करेलां अति सन्मानवाळो सिंहराजानो पुत्र ते स-

नत्कुमार ( ते ) प्राणप्रियासहित पोताना नगरप्रते चालवा लाग्यो. ॥ ८८ ॥

**मार्गं क्रमादतिक्रामन्कतिभिश्चित्प्रयाणकैः । स्वर्गाभिरामे ग्रामेऽगात्स नन्दिग्रामनामनि ॥ ८९ ॥**

अन्वयः—क्रमात् मार्गं अतिक्रामन् सः कतिभिश्चित् प्रयाणकैः स्वर्ग अभिरामे नंदिग्राम नामनि ग्रामे अगात्. ॥ ८९ ॥

अर्थः-अनुक्रमे मार्गने ओळंगतोथको ते सनत्कुमार केटलेक प्रयाणे स्वर्गसरखा सुंदर नंदिग्राम नामना गाममां गयो. ॥ ८९ ॥

**इहाधिग्राममुद्दामस्वाद्याम्बुतटिनीतटे । भूवल्लभभुवोऽभूवन्नावासाः सान्द्रशाद्वले ॥ ९० ॥**

अन्वयः—इह अधिग्रामं सांद्र शाद्वले उद्दाम स्वाद्य अंबु तटिनी तटे भूवल्लभ भुवः आवासाः अभूवन्. ॥ ९० ॥

अर्थः-अहीं ते गामनी नजीक घाटी झाडीवाळा, तथा अति स्वादिष्ट जलवाळी नदीने किनारे ते राजपुत्रनो मुकाम थयो. ९०

**तत्र कल्लोलिनीलोलकल्लोलकृतमज्जनः । समं शृङ्गारसुन्दर्या सुन्दराम्भोजभूषणः ॥ ९१ ॥**

**यावद्भोक्तुमुपाविक्षत्कुमारः सपरिच्छदः । कुतोऽपि तावद्विरसं वाद्यं शुश्राव दुःश्रवम् ॥ ९२ ॥युग्मम् ॥**

अन्वयः-तत्र शृंगारसुंदर्या समं कल्लोलिनी लोल कल्लोल कृत मज्जनः, सुंदर अंभोज भूषणः, ॥ ९१ ॥ कुमारः सपरिच्छदः यावत् भोक्तुं उपाविक्षत्, तावत् कुतः अपि दुःश्रवं विरसं वाद्यं शुश्राव. ॥ ९२ ॥ युग्मं ॥

अर्थः-त्यां (ते) शृंगारसुंदरीनो साथे नदीना चपल मोजांओमां करेलुं छे स्नान जेणे, तथा सुंदर कमलोना अलंकारवाळो, ॥९१॥ ते सनत्कुमार परिवारसहित जेवामां भोजन करवामाटे बेठो, तेवामां (तेणे) क्यांकथी सांभळवो न गमे एवो नीरस (शोकसंबंधी)

वाजित्रनो नाद सांभळ्यो. ॥ ९२ ॥ युग्मं ॥

किमेतदिति दुःखार्तैस्त्यक्तभोजनभाजनैः । परिवारजनैरूर्ध्वीकृते जवनिकाञ्चले ॥ ९३ ॥

हा स्वगोत्रगृहस्तम्भ नेत्रनन्दन नन्दन । क्व गतोऽसीति तातेन शोच्यमानं मुहुर्मुहुः ॥ ९४ ॥

अन्वयः-एतत्! किं! इति त्यक्त भोजन भाजनैः परिवार जनैः जवनिका अंचले ऊर्ध्वीकृते, ॥ ९३ ॥ हा! स्व गोत्र गृह स्तंभ! नेत्रनंदन! (हे) नंदन! क्व? गतः असि? इति तातेन मुहुः मुहुः शोच्यमानं, ॥ ९४ ॥

अर्थः—आ ते शुं छे! एम (विचारी) तजेल छे, भोजनमाटेनां वासणो जेओए, एवा परिवारना लोकोए कनातनो छेडो उंचो कर्याबाद, ॥ ९३ ॥ हा! आपणा गोत्ररूपी घरना स्तंभसरखा, अने नेत्रोने आनंद आपनारा, एवा हे पुत्र! तुं क्यां गयो? एम पितावडे वारंवार शोच कराता, ॥ ९४ ॥

हा भ्रातः स्वगुणख्यात बन्धुव्रातममुं किमु । त्यक्त्वा यासीति साक्रन्दैर्भ्रातृवृन्दैः कृतावृतिम् ॥ ९५ ॥

अन्वयः-स्व गुण ख्यात! हा भ्रातः? अमुं बंधुव्रातं त्यक्त्वा किमु यासि? इति स आक्रंदैः भ्रातृवृंदैः कृत आवृतिं ॥ ९५ ॥

अर्थः-पोताना गुणोथी प्रख्यात थयेला एवा हे भाइ! आ भाइओना समूहने तजीने तुं केम जाय छे? एम विलाप करता भाइओना समूहोवडे घेरायेला, ॥ ९५ ॥

रे दैव किमकाण्डेऽपि सममस्मन्मनोरथैः । अमुं संहरसीत्युच्चैः पूत्कारैः स्वजनैर्वृतम् ॥ ९६ ॥

अन्वयः-रे ! दैव ! अस्मद् मनोरथैः समं अमुं अकांडे अपि किं संहरसि ? इति उच्चैः पूत्कारैः स्वजनैः वृतं ॥ ९६ ॥

अर्थः-अरे दैव ! अमारामनोरथोसहित आने अकाळेज तुं केम हरी जाय छे ? एम म्होटेथी पोकार करता स्वजनोवडे घेरायेला,

करिष्ये कस्य मङ्गल्यं हा हतास्मि हतास्मि हा । एवं विलापान्कुर्वन्त्या स्वस्रा साश्रुदृशान्वितम् ॥९७॥

अन्वयः—हा ! हा ! हता अस्मि ! हता अस्मि ! कस्य मंगल्यं करिष्ये ? एवं विलापान् कुर्वत्या, साश्रु दृशा, स्वस्रा अन्वितं.

अर्थः-अरे ! अरे ! ( हुं तो ) मरी गई ! मरी गइ ! (हवे) कोनुं मंगल करीश ? एम विलापो करती, तथा आंसुयुक्त आंखोवाळी बेहेनवाळा. ॥ ९७ ॥

रे कठोर न किं यासि हृदय त्वं सहस्रधा । इत्युरस्ताडयन्तीभिर्बन्धुस्त्रीभिर्गुरूकृतम् ॥ ९८ ॥

अन्वयः-रे ! कठोर हृदय ! त्वं सहस्रधा किं न यासि ? इति उरः ताडयंतीभिः बंधु स्त्रीभिः गुरूकृतं. ॥ ९८ ॥

अर्थः-अरे कठोर हृदय ! तुं हजारोगमे टुकडारूप केम नथी थइ जतुं ? एम छाती कूटती भाइनी स्त्रीओ वडे म्होटाइ अपाता, ॥

हा वत्स देहि मे वाचं मुखं हा वत्स दर्शय । एवं लपन्त्या मुर्छन्त्या मुहुर्मात्रानुधावितम् ॥ ९९ ॥

अन्वयः—हा ! वत्स ! मे वाचं देहि ? हा ! वत्स ! मुखं दर्शय ? एवं लपंत्या, मुहुः मूर्छंत्या मात्रा अनुधावितं. ॥ ९९ ॥

अर्थः—अरे ! पुत्र ! मने वचन आप ? अरे ! वत्स ! (तारुं) मुख देखाड ? एम विलाप करती, तथा वारंवार मूर्छित थती, एवी

माता जेनी पाछळ दोडी रही छे, एवा, ॥ ९९ ॥

रूपं त्रपा सुवाक् शीलं सत्त्वं दानमिमानि षट् । अस्मिन्गते गतान्यस्माद्ग्रामादिति जनैः स्तुतम् ४००

अन्वयः—अस्मिन् गते अस्मात् ग्रामात् रूपं, त्रपा, सुवाक् शीलं, सत्त्वं, दानं, इमानि षट् गतानि, इति जनैः स्तुतं. ॥४००॥

अर्थः—आना जवाथी ( मरणथी ) आ गाममांथी रूप, लज्जा, उत्तम वाणी, शील, पराक्रम, अने दान, ए छए पदार्थो (पण) चाल्या गया ! एम लोकोवडे स्तुति कराता, ॥ ४०० ॥

कृतशृङ्गारया दानं तन्वत्या तुरगस्थया । कान्तयानुगतं गन्तुं सार्धं वैधव्यभीतया ॥ १ ॥

अन्वयः—सार्धं गंतुं कृत शृंगारया, दानं तन्वत्या, तुरगस्थया, वैधव्य भीतया कांतया अनुगतं. ॥ १ ॥

अर्थः—साथे जवामाटे ( अर्थात् स्वामीसाथे चितामां बळी मरी सती थवामाटे ) करेला शणगारवाळी, दान देती, घोडापर बेठेली, अने विधवापणाथी डरेली, एवी स्त्री जेनी पाछळ चाले छे, एवा, ॥ १ ॥

उत्पाटितं स्वजातीयैश्छन्नं कौसुम्भवाससा । कुमारः सप्रियोऽपश्यत्पुमांसं मृतमार्चितम् ॥ २ ॥

अन्वयः—स्व जातीयैः उत्पाटितं, कौसुंभ वाससा छन्नं, मृतं, आर्चितं पुमांसं सप्रियः कुमारः अपश्यत्. ॥ २ ॥ दशभिः कुलकं ॥

अर्थः—पोताना ज्ञातिजनोए उपाडेला, अने कसुंबी वस्त्रवडे आच्छादित करेला, मरण पामेला, तथा पूजेला एवा ( एक ) पुरुषने प्रियासहित ते सनत्कुमारे जोयो. ॥ २ ॥ दशभिः कुलकं ॥

तस्मिंकिंचिदतिक्रान्ते शोकानुत्पत्तिसत्तमम् । मृत्युयोगोऽस्य नास्त्येवेति ब्रुवन्तं सहानुगैः ॥ ३ ॥
शान्ताकृतिगतिस्वान्तं प्रत्यासत्तिचरं नरम् । स्वयमेव कृताव्हानं पप्रच्छेति नृपाङ्गभूः ॥ ४ ॥ युग्मम् ॥

अन्वयः—तस्मिन् किंचित् अतिक्रांते, शोक अनुत्पत्ति सत्तमं, अस्य मृत्यु योगः न अस्ति एव, इति अनुगैः सह ब्रुवंतं, ॥ ३ ॥ शांत आकृति गति स्वांतं, प्रत्यासत्ति चरं नरं स्वयं एव कृत आह्वानं नृपांगभूः इति पप्रच्छ. ॥ ४ ॥ युग्मं ॥

अर्थः–ते मृतक कंइक आगळ निकळी गयाबाद, शोकनी उत्पत्तिविनाना, तथा "आ माणसने मृत्युनो योगज न्होतो" एम पाछळ आवता मनुष्योसाथे वातो करता, ॥ ३ ॥ शांत आकार, गमन तथा हृदयवाळा, एवा नजीकमां चालता (कोइ एक) माणसने पोतेज बोलावीने ते सनत्कुमारे नीचे मुजब पूछ्युं के, ॥ ४ ॥ युग्मं ॥

ग्रामवास्यपि किं पश्चात्त्वमागाः किं शुचोज्झितः । मृत्युयोगोऽस्य नास्तीति किमेभिर्भाष्यतेऽनुगैः ॥५॥

अन्वयः—त्वं ग्राम वासी अपि पश्चात् किं आगाः? शुचा उज्झितः किं? "अस्य मृत्यु योगः नास्ति" इति एभिः अनुगैः किं भाष्यते? ॥ ५ ॥

अर्थः—तुं (आ) गामनो रहीश छतां पाछळथी केम आव्यो? (वळी) तुं शोकथी रहित केम छो? (तेमज) "आने मृत्युनो योग न्होतो" एम आ पाछळ चालनाराओसाथे केम वातो करे छे? ॥ ५ ॥

अथ ध्रुवं धराधीशसुतः कोऽपि गुणैः स्तुतः । अर्होऽयमर्हद्भक्तानां वार्तानामिति सोऽवदत् ॥ ६ ॥

अन्वयः-अथ अयं गुणैः स्तुतः कः अपि ध्रुवं धरा अधीश सुतः, अर्हद्भक्तानां वार्तानां अर्हः, इति सः अवदत्. ॥ ६ ॥

अर्थः—पछी आ गुणोवडे प्रशंसनीय कोइक पण खरेखर राजानो पुत्र संभवे छे, माटे जिनभक्तोनी वार्ता (सांभळवाने) योग्य छे, एम विचारी तेणे कह्युं के, ॥ ६ ॥

**भवतः कुलमाकारादेव देव विभाव्यते ॥ दक्षत्वं लक्ष्यते साक्षात्प्रवृत्तिप्रश्नतः पुनः ॥ ७ ॥**

अन्वयः-(हे) देव ! भवतः आकारात् एव कुलं विभाव्यते, पुनः प्रवृत्ति प्रश्नतः साक्षात् दक्षत्वं लक्ष्यते. ॥ ७ ॥

अर्थः—( हे ) देव ! आपनुं आकृतिथीज (उत्तम) कुल जणाइ आवे छे, तेमज आ वृत्तांतना प्रश्नथी साक्षात् डहापण पण देखाइ आवे छे. ॥ ७ ॥

**तद्वार्ताकथनस्थानमसमानमसि प्रभो । सकर्णाकर्णय त्वं मे विचारकवचं वचः ॥ ८ ॥**

अन्वयः-तत् (हे) सकर्ण ! असमानं वार्ता कथन स्थानं असि, त्वं मे विचार कवचं वचः आकर्णय ? ॥ ८ ॥

अर्थः-माटे (हे) चतुर पुरुष ! तमो आ वृत्तांत संभळाववामाटे (उत्तम) स्थान समान छो, ( अने तेथी ) तमो मारुं विचाररूपी बखतरवाळुं (ध्यान आपवा लायक) वचन सांभळो ? ॥ ८ ॥

**धर्मेऽहं विहितानन्द आनन्द इति नामतः । नन्दिग्रामेऽत्र वास्तव्यो वस्तुव्यवहृतिस्थितिः ॥ ९ ॥**

अन्वयः-आनंदः इति नामतः अहं धर्मे विहित आनंदः, अत्र नंदिग्रामे वास्तव्यः, वस्तु व्यवहृति स्थितिः. ॥ ९ ॥

अर्थः-" आनंद " एवा नामनो हुं (जैन) धर्ममांज आनंद माननारो आ नंदिग्रामनो रहेवासी छुं, तथा वस्तुओनो व्यापारी छुं.

**गृहिव्रतानि सम्यक्त्वमूलानि प्रतिपालयन् । वहिष्ये प्रतिमास्तास्तु भवन्त्येकादशेत्यमूः ॥ १० ॥**

अन्वयः—सम्यक्त्व मूलानि गृहि व्रतानि पालयन् प्रतिमाः वहिष्ये, तु ताः अमूः एकादश भवंति. ॥ १० ॥

अर्थः-समकीत छे मूल जेओनुं एवां गृहस्थसंबंधी (बार) व्रतोने पालुं छुं, तथा प्रतिमाओ वहन करवानो छुं, अने ते प्रतिमाओ नीचे जणाव्या मुजब अग्यार प्रकारनी छे. ॥ १० ॥

**सम्यक्त्वे निरतीचारस्त्रिकालं पूजयेज्जिनम् । मासं यावद्गृही सा स्याद्दर्शनप्रतिमादिमा ॥ ११ ॥**

अन्वयः—सम्यक्त्वे निरतीचार. गृही त्रिकालं मासं यावत् जिनं पूजयेत्, सा आदिमा दर्शन प्रतिमा स्यात्. ॥ ११ ॥

अर्थः-समकीतमां अतीचार लगाड्या विना गृहस्थी त्रणे काल एक माससुधी जिनपूजा करे, ते पेहेली "दर्शनप्रतिमा" कहेवाय.

**स्याद् व्रतप्रतिमा शुद्धाणुव्रतानि वितन्वतः । मासद्वयेन प्राच्योक्तक्रियायुक्तस्य गेहिनः ॥ १२ ॥**

अन्वयः-मास द्वयेन प्राच्य उक्तस्य क्रिया युक्तस्य गेहिनः शुद्ध अणुव्रतानि वितन्वतः व्रतप्रतिमा स्यात्. ॥ १२ ॥

अर्थः—बे माससुधी पूर्वे कहेली क्रियावडे युक्त थयेला गृहस्थीने शुद्ध अणुव्रतो पालतांथकां बीजी "व्रत प्रतिमा" थाय छे.

**सामायिकप्रतिमा सा यत्र सामायिकं गृही । द्विसंध्यं सेवते मासत्रयं पूर्वक्रियान्वितः ॥ १३ ॥**

अन्वयः—पूर्व क्रिया अन्वितः गृही मासत्रयं द्विसंध्यं यत्र सामायिकं सेवते, सा सामायिक प्रतिमा. ॥ १३ ॥

अर्थः-पूर्वनी क्रिया सहित गृहस्थी त्रणमाससुधी बन्ने संध्याकाळे जेमां सामायिक करे, ते (त्रीजी) "सामायिकप्रतिमा" कहेवाय.

**पौषधप्रतिमा यत्र श्राद्धो मासचतुष्टयम् । सत्क्रियः पौषधं धत्ते चतुष्पर्व्यां चतुर्विधम् ॥ १४ ॥**

अन्वयः—यत्र श्राद्धः मास चतुष्टयं सत्क्रियः चतुष्पर्व्यां चतुर्विधं पौषधं धत्ते, पौषध प्रतिमा. ॥ १४ ॥

अर्थः—जेनी अंदर श्रावक चार माससुधी (उपर वर्णवेली) सर्व क्रियाओसहित ( अष्टमी आदिक ) चारे पर्वोमां चतुर्विध पौषधने धारण करे, तेने (चोथी) "पौषध प्रतिमा" जाणवी. ॥ १४ ॥

**श्राद्धः शुद्धाशयस्त्यक्तस्नानः प्राशुकभोजनः । ब्रह्मवानह्नि रात्रौ च कृतमानः स्वयोषिति ॥ १५ ॥**

**पौषधस्थश्चतुष्पर्व्यां प्रतिमामेकरात्रिकीम् । प्रपन्नः पञ्चभिर्मासैः प्रतिमा पञ्चमी भवेत् ॥१६॥ युग्मम्॥**

अन्वयः—शुद्ध आशयः, त्यक्त स्नानः, प्राशुक भोजनः, अह्नि ब्रह्मवान्, च रात्रौ स्वयोषिति कृतमानः श्राद्धः, ॥ १५ ॥ चतुष्पर्व्यां पौषधस्थः, एक रात्रिकीं प्रतिमां प्रपन्नः, पंचभिः मासैः पंचमी प्रतिमा भवेत्. ॥ १६ ॥ युग्मं ॥

अर्थः—निर्मल अभिप्रायवाळो, स्नानरहित अचित्त भोजन करनारो, दिवसे ब्रह्मचर्य पाळनारो, तथा रात्रिए पोतानी स्त्रीनेविषे प्रमाणसहित ( संतोष राखनारो ) श्रावक, ॥ १५ ॥ चारे पर्वतिथिए पौषधव्रतमां रहेनारो, एक रात्रिनी प्रतिमा वहेनारो थयो थको पांच माससुधी तेवी क्रिया करे, अने एरीते पांचमी प्रतिमा थाय छे. ॥ १६ ॥ युग्मं ॥

पूर्वोदितविधेः षष्ठी षण्मासैर्ब्रह्मचारिणः । सप्तमी सप्तभिर्मासैः सचित्तं त्यजतोऽखिलम् ॥ १७ ॥

अन्वयः—पूर्व उदित विधेः षट् मासैः ब्रह्मचारिणः षष्ठी, अखिलं सचित्तं त्यजतः सप्तभिः मासैः सप्तमी. ॥ १७ ॥

अर्थः—पूर्वे कहेली ( सर्व ) विधि सहित छ माससुधी ब्रह्मचारी रहेवाथी छट्ठी प्रतिमा थाय छे. तथा सघळुं सचित्त तजवाथी सात मासे सातमी प्रतिमा थाय छे. ॥ १७ ॥

त्यक्ते स्वयं समारम्भे मासैरष्टभिरष्टमो । नवमी नवभिर्मासैरनारम्भे परैरपि ॥ १८ ॥

अन्वयः—स्वयं समारंभे त्यक्ते अष्टभिः मासैः अष्टमी, परैः अपि अनारंभे नवभिः मासैः नवमी. ॥ १८ ॥

अर्थः-पोते आरंभ तजवाथी आठ मासे आठमी, अने बीजा मारफते पण आरंभ न कराववाथी नव मासे नवमी प्रतिमा थायछे.

यत्रोद्दिष्टकृताहारत्यागी मुक्तधनः शिखी । मुण्डीव जायते श्राद्धो दश मासान्दशम्यसौ ॥ १९ ॥

अन्वयः-यत्र उद्दिष्ट कृत आहार त्यागी, मुक्त धनः, शिखी, मुंडी इव श्राद्धः दश मासान् जायते, असौ दशमी. ॥ १९ ॥

अर्थः—जेनी अंदर पोतामाटे करेलां भोजननो त्याग करे, द्रव्यने तजी दे, तथा ( मस्तकपर ) फक्त शिखा राखीने मुंडित थइ श्रावक दश माससुधी ए मुजब रहे, तेने दशमी प्रतिमा जाणवी. ॥ १९ ॥

यत्रैकादश मासांस्तु लुञ्चितो मुण्डितोऽथवा । रजोहरणसंयुक्तः पतद्ग्रहपरिग्रहः ॥ २० ॥

किं चैकादशप्रतिमाभृते भिक्षां हि देहि मे । इत्युक्त्या विचरत्यात्मजातौ सैकादशी भवेत् ॥ २१ ॥

अन्वयः—तु यत्र एकादश मासान् लुंचितः अथवा मुंडितः, रजोहरण संयुक्तः, पतद् ग्रह परिग्रहः, ॥ २० ॥ किं च एकादश प्रतिमाभृते मे भिक्षां देहि ? इति उक्त्वा आत्मजातौ विचरति, सा एकादशी भवेत्. ॥ २१ ॥ युग्मं ॥

अर्थः—वळी जेमां अग्यार माससुधी लोच करेलो अथवा मुंडित थयेलो, रजोहरण तथा पात्रयुक्त थइने, ॥ २० ॥ अग्यारमी प्रतिमा धरनारा, एवा मने भिक्षा आपो ? एम कही पोतानी ज्ञातिमां जे विचरे, तेवी क्रियावाळी अग्यारमी प्रतिमा थाय. ।२१।

तदेतासु ससम्यक्त्वाणुव्रताति प्रपालयन् । अधुना वहमानोऽस्मि दर्शनप्रतिमामहम् ॥ २२ ॥

अन्वयः—तत् ससम्यक्त्व अणुव्रतानि प्रपालयन् अहं अधुना एतासु दर्शन प्रतिमां वहमानः अस्मि. ॥ २२ ॥

अर्थः-माटे समकीत सहित अणुव्रतो पालतो एवो हुं, हालमां तेओमानी (पहेली) दर्शनप्रतिमाने वहन करुं छुं. ॥ २२ ॥

तत्र प्रभातमध्याह्ने सायं कालत्रये जिनः । पूज्यते त्रिजगत्पूज्यो यावन्मासं यथाविधि ॥ २३ ॥

अन्वयः—तत्र प्रभात मध्याह्ने सायं कालत्रये त्रिजगत् पूज्यः जिनः मासं यावत् यथाविधि पूज्यते. ॥ २३ ॥

अर्थः—तेनी अंदर प्रभाते, मध्याह्नकाळे तथा संध्याकाळे, एम त्रण वखत, त्रणे जगतने पूजनीक एवा जिनेश्वरप्रभुने एक माससुधी विधिपूर्वक पूजवामां आवे छे. ॥ २३ ॥

ततोऽहमद्य मध्याह्ने पूजां कृत्वा जिनेशितुः । आगां ग्रामजनाचारे पश्चाद्गतिरतोऽभवम् ॥ २४ ॥

अन्वयः-ततः अद्य अहं मध्याह्ने जिनेशितुः पूजां कृत्वा आगां, अतः ग्राम जन आचारे पश्चाद् गतिः अभवं. ॥ २४ ॥

अर्थः—तेथी आजे हुं मध्याह्नकाळे जिनेश्वर प्रभुनी पूजा करीने आव्यो, अने तेथी गामना (आ) लोकाचारमां हुं पाछळ रही गयो. ॥ २४ ॥

कोऽपि कुत्रापि केनापि संबन्धेन स्वकर्मतः । अभूद्भवाननंतान्मे भ्रमतः शमतस्करान् ॥ २५ ॥

अतः कस्य विपन्नस्य शोकं कुर्वे कृतेऽत्र वा । किं भवेत्तन्न शोकोऽयमस्तोकोऽपि दुनोति माम् ॥२६॥

अन्वयः-स्व कर्मतः शम तस्करान् अनंतान् भवान् भ्रमतः कः अपि, कुत्र अपि, केन अपि संबंधेन मे अभूत्, ॥ २५ ॥ अतः कस्य विपन्नस्य शोकं कुर्वे ? वा अत्र कृते किं भवेत्, तत् अयं अस्तोकः अपि शोकः मां न दुनोति. ॥ २६ ॥ युग्मं ॥

अर्थः—पोताना कर्मथी शांतिने लुंटनारा एवा अनंता भवोमां भमतांथकां कोइक, क्यांक, कोइ पण संबंधी मारो (कुटुंबी) थयेलो छे, ॥ २५ ॥ माटे कया मृत्यु पामेलानो (हुं) शोक करुं ? अथवा ते शोक करवाथी (पण) शुं थाय ? माटे आ घणा शोकनो बनाव पण मने खेद पमाडतो नथी. ॥ २६ ॥ युग्मं ॥

मृत्युयोगोऽस्य नास्तीति यदुक्तं प्रस्तुतं मया । तत्र धात्रीपतेः पुत्र समाकर्णय कारणम् ॥ २७ ॥

अन्वयः—अस्य मृत्यु योगः न अस्ति, इति यत् मया प्रस्तुतं उक्तं, तत्र (हे) धात्रीपतेः पुत्र! कारणं समाकर्णय ? ॥ २७ ॥

अर्थः—" आ माणसने मृत्युनो योग नथी " एम जे में चालु प्रसंगमाटे कह्युं, तेना संबंधमां हे राजपुत्र ! (तुं) कारण सांभळ ?

**नन्दिग्रामेऽस्ति सारङ्गनामा ग्रामाग्रणीरिह । कौटुम्बिकोऽम्बिकासंज्ञभार्यावर्यगृहस्थितिः ॥ २८ ॥**

अन्वयः–इह नंदिग्रामे अंबिका संज्ञ भार्या वर्य गृह स्थितिः, ग्राम अग्रणीः सारंगनामा कौटुंबिकः अस्ति. ॥ २८ ॥

अर्थः—आ नंदिगाममां अंबिकानामनी स्त्रीवडे उत्तम प्रकारनी घरनी स्थितिवाळो, तथा गाममां अग्रेसर सारंगनामे (एक) कौटुंबिक ( कणबी ) वसे छे. ॥ २८ ॥

**तज्जन्मा नागनामासीत्संध्यायां ह्यस्तने दिने । अयं पुष्पोच्चयं तन्वन्दष्टो दुष्टाहिना वने ॥ २९ ॥**

अन्वयः–नागनामा तज्जन्मा आसीत्, ह्यस्तने दिने संध्यायां वने पुष्पोच्चयं तन्वन् अयं दुष्ट अहिना दष्टः. ॥ २९ ॥

अर्थः–नागनामे तेनो पुत्र हतो, गइ काले संध्या समये वनमां पुष्पो एकठां करतां थकां तेने दुष्ट सर्पे दंश मार्यो. ॥ २९ ॥

**ततो विषभिषग्वृन्दैरमन्दैर्मन्त्रसंमदैः । पाल्यमानोऽप्ययं प्राप दीर्घस्वापवशां दशाम् ॥ ३० ॥**

अन्वयः–ततः अमंदैः, मन्त्र संमदैः, विष भिषग् वृन्दैः पाल्यमानः अपि अयं दीर्घ स्वाप वशां दशां प्राप. ॥ ३० ॥

अर्थः—पछी हुशीयार मंत्रवादीओए, तथा विषनो उपाय जाणनारा वैद्योना समूहोए ( तेनी ) सारवार कर्या छतां पण ते दीर्घनिद्रारूप मृत्युनी दशाने प्राप्त थयो. ॥ ३० ॥

मया पुनरमायेभ्यस्तत्त्वज्ञेभ्यः कथान्तरे । गुरुभ्य इति सर्वज्ञशासने विश्रुतं श्रुतम् ॥ ३१ ॥

अन्वयः—पुनः अमायेभ्यः तत्वज्ञेभ्यः गुरुभ्यः कथांतरे मया इति श्रुतं, सर्वज्ञ शासने विश्रुतं. ॥ ३१ ॥

अर्थः—वळी कपटरहित, अने तत्वोने जाणनारा, एवा गुरुमहाराजपासेथी व्याख्याननी अंदर में नीचे जणाव्यामुजब सांभळ्युं छे, ( तथा ते वृत्तांत ) जैनशासनमां प्रख्यात छे. ॥ ३१ ॥

तिथयः पञ्चमी षष्ठ्यष्टमी नवमिका तथा । चतुर्दश्यप्यमावास्याहिना दष्टस्य मृत्युदा ॥ ३२ ॥

अन्वयः—अहिना दष्टस्य पंचमी, षष्ठी, अष्टमी, नवमिका, तथा चतुर्दशी, अमावास्या अपि तिथयः मृत्युदा. ॥ ३२ ॥

अर्थः-सर्पे दंशेला माणसमाटे पांचम, छठ, आठम, नोम, तथा चौदस अने अमास, एटली तिथिओ मृत्यु आपनारी छे. ॥३२॥

दष्टस्य मृतये वारा भानुभौमशनैश्चराः । प्रातःसंध्यास्तसंध्या च संक्रान्तिसमयस्तथा ॥ ३३ ॥

अन्वयः-दष्टस्य भानु भौम शनैश्चराः वाराः, प्रातःसंध्या च अस्तसंध्या, तथा संक्रांति समयः मृतये ॥ ३३ ॥

अर्थः—(वळी) सर्पे दंशेला माणसने रवि, मंगल अने शनिवार, प्रभातकाळनी संध्या, तथा सूर्यास्तकाळनी संध्या, अने संक्रांतिनो काळ, मृत्यु करनारां छे. ॥ ३३ ॥

भरणी कृत्तिकाश्लेषा विशाखा मूलमश्विनी । रोहिण्यार्द्रा मघा पूर्वात्रयं दष्टस्य मृत्यवे ॥ ३४ ॥

अन्वयः-भरणी, कृत्तिका, अश्लेषा, विशाखा, मूलं, अश्विनी, रोहिणी, आर्द्रा, मघा, पूर्वात्रयं,दष्टस्य मृत्यवे. ॥ ३४ ॥

अर्थः—( वळी ) भरणी, कृत्तिका, अश्लेषा, विशाखा, मूल, अश्विनी, रोहिणी, आर्द्रा, मघा, अने पूर्वाषाढाआदिक त्रण. एटलां नक्षत्रो सर्पथी दंशेलाने मृत्यु आपनारां छे. ॥ ३४ ॥

वारि स्रवन्तश्चत्वारो दंशा यदि सशोणिताः । वीक्ष्यन्ते यस्य दष्टस्य स प्रयाति भवान्तरम् ॥ ३५ ॥

अन्वयः–दष्टस्य यस्य वारि स्रवंतः चत्वारः दंशाः यदि सशोणिताः वीक्ष्यंते, सः भवांतरं प्रयाति. ॥ ३५ ॥

अर्थः—सर्पे दंशेला एवा जे माणसना, पाणीने झरता चार दंशो जो रुधिर सहित जोवामां आवे, तो ते माणस मरण पामे छे.

रक्तवान्दंश एको वा छिद्री काकपदाकृतिः । शुष्कः श्यामस्त्रिरेखो वा दष्टे स्पष्टयति व्ययम् ॥ ३६ ॥

अन्वयः—वा दष्टे एकः दंशः रक्तवान्, छिद्री, काकपद आकृतिः, शुष्कः, श्यामः, वा त्रिरेखः, व्ययं स्पष्टयति. ॥ ३६ ॥

अर्थः–अथवा सर्पे दंशेला मनुष्यनो एक दंश रुधिरवाळो, छिद्रवाळो, कागडाना पगजेवी आकृतिवाळो, सुकायेलो, श्यामरंगनो अथवा त्रण रेखाओवाळो जो होय, तो ते मनुष्यनुं मृत्यु सूचवे छे. ॥ ३६ ॥

सावर्तः सर्वतः शोफावृतः संकुचिताननः । दंशः शंसति दष्टस्य विनष्टमिह जीवितम् ॥ ३७ ॥

अन्वयः–स आवर्तः, सर्वतः शोफावृतः, संकुचित आननः, दंशः, इह दष्टस्य जीवितं विनष्टं सूचयति. ॥ ३७ ॥

अर्थः-फरतां चक्रवाळो, सर्व बाजुथी सूजी गयेलो, अने संकोच पामेला मुखवाळो दंश, अहिं ते दंशेलानुं जीवित नष्ट थयेलुं सूचवेछे

केशान्ते मस्तके भाले भ्रूमध्ये नयने श्रुतौ । नासाग्र ओष्ठे चिबुके कण्ठे स्कन्धे हृदि स्तने ॥ ३८ ॥

कक्षायां नाभिपद्मे च लिङ्गे संधौ गुदे तथा । पाणिपादतले दष्टः स्पृष्टोऽसौ यमजिह्वया ॥ ३९ ॥युग्मम्॥

अन्वयः—केशांते, मस्तके, भाले, भ्रूमध्ये, नयने, श्रुतौ, नासा अग्रे ओष्ठे, चिबुके, कंठे, स्कंधे हृदि, स्तने, ॥ ३८ ॥ कक्षायां, नाभिपद्म, च लिंगे, संधौ, तथा गुदे, पाणि पाद तले दष्टः, असौ यमजिह्वया स्पृष्टः. ॥ ३९ ॥ युग्मं ॥

अर्थः—केशोने छेडे, मस्तकपर, कपाळमां भमरोनी वच्चे, आंखमां, कानमां, नासिकाना अग्र भागमां, होठपर, दाढीपर, गळापर, खभापर, छातीए, स्तनपर, ॥ ३८ ॥ कांखमां, नाभिपर, लिंगपर, सांधापर, गुदाउपर, तथा हाथपगना तळीयामां (जे) सर्पथी डंखायो होय, तेने यमनी जीभे स्पर्शेलो जाणवो, (अर्थात् ते माणस मरण पामे छे.) ॥ ३९ ॥ युग्मं ॥

एषां मध्याद्विरुद्धं न जातमस्यास्ति किंचन । येनासौ नाशमभ्येति नागः पुंनाग नागतः ॥ ४० ॥

अन्वयः-(हे) पुंनाग ! एषां मध्यात् अस्य किंचन विरुद्धं न जातं अस्ति, येन असौ नागः नागतः नाशं अभ्येति ॥४०॥

अर्थः—(हे) उत्तम पुरुष ! उपर वर्णवेलमांथी आ पुरुषने कंइ पण विरुद्ध थयुं नहोतुं, के जेथी आ नागनामनो पुरुष सर्पना दंशथी मृत्यु पामे. ॥ ४० ॥

ग्रामेऽत्र मान्त्रिकः कोऽपि नास्ति लोकोत्तरः परम् । किं कर्पूरश्रियः पूरं पूरयेल्लवणाकरः ॥ ४१ ॥

अन्वयः-परं अत्र ग्रामे कः अपि लोकोत्तरः मांत्रिकः न अस्ति, लवण आकरः किं कर्पूर श्रियः पूरं पूरयेत् ? ॥ ४१ ॥

अर्थः-परंतु आ गाममां कोइ पण लोकोत्तर मंत्रवादी नथी, केमके लवणनी खाण शुं कर्पूरनी लक्ष्मीनो समूह पूरे ? ॥ ४१ ॥

**वदन्तमिति दिग्दन्तिदन्तद्युतिमतिः स तम् । उवाच रचितानन्दमानन्दं नृपनंदनः ॥ ४२ ॥**

अन्वयः—इति वदंतं, रचित आनंदं तं आनंदं, दिग् दंति दंत द्युति मतिः सः नृप नंदनः उवाच. ॥ ४२ ॥

अर्थः-एरीते बोलता, तथा उपजावेल छे आनंद जेणे, एवा ते आनंद श्रावकने दिग्हस्तिना दांतोनी कांतिसरखी ( उज्ज्वल ) बुद्धिवाळा ते राजकुमारे कह्युं के, ॥ ४२ ॥

**त्वया लोकोत्तरः कोऽयं कलाकुशल कीर्त्यते । मान्त्रिकोऽत्रेति धात्रीशपुत्रप्रश्नेऽभ्यधादसौ ॥ ४३ ॥**

अन्वयः—(हे) कला कुशल ! त्वया अत्र लोकोत्तरः मांत्रिकः कीर्त्यते, अयं कः ? इति धात्री ईश पुत्र प्रश्ने असौ अभ्यधात्.

अर्थः-(हे) कला प्रवीण आनंद ! तें अहीं (जे) लोकोत्तर मंत्रवादीनी सूचना करी, ते कोण (कहेवाय ?) एम ते राजपुत्र सनत्कुमारे प्रश्न पूछवाथी ते आनंद कहेवा लाग्यो के, ॥ ४३ ॥

**मान्त्रिको लोकसामान्यः सतां मान्यः स मन्यते । विषाणामौषधैर्मन्त्रैर्यश्चिकित्सां चिकीर्षति ॥ ४४ ॥**

अन्वयः—-यः विषाणां औषधैः मंत्रैः चिकित्सां चिकिर्षति, सः सतां मान्यः लोक सामान्यः मांत्रिकः मन्यते. ॥ ४४ ॥

अर्थः—जे कोइ विषोना संबंधमां औषधो तथा मंत्रोवडे उपाय करवाने इच्छे छे ते सज्जनोने माननीक " लोकसामान्य " मंत्रवादी कहेवाय छे. ॥ ४४ ॥

यस्य शुद्धतपोध्यानैः सिद्धलब्धेः प्रभावतः । विषदोषा विलीयन्ते सैष लोकोत्तरः परम् ॥ ४५ ॥

अन्वयः—परं शुद्ध तपः ध्यानैः सिद्ध लब्धेः यस्य प्रभावतः विषदोषाः विलीयंते, स एषः लोकोत्तरः ॥ ४५ ॥

अर्थः-परंतु शुद्ध तप अने ध्यानवडे जेने लब्धिओ मळी छे, अने तेना प्रभावथी विषना दोषो जे नष्ट थाय छे, ते "लोकोत्तर" मांत्रिक कहेवाय छे. ॥ ४५ ॥

किमीदृशोऽपि दृश्योऽस्ति स्वस्तिदः क्वापि कोऽप्यहो । इति जल्पति भूपालभवे साश्चर्यचेतसि ॥ ४६ ॥

हर्षकोलाहलः कोऽपि शोककोकनिशाकरः । तूर्यवर्यरवोद्दामो दूरादाविरभून्महान् ॥ ४७ ॥ युग्मम् ॥

अहो ! किं ईदृशः अपि स्वस्तिदः कः अपि क्व अपि दृश्यः अस्ति ? इति स आश्चर्य चेतसि भूपाल भवे जल्पति, ॥४६॥ शोक कोक निशा करः, तूर्य वर्य रव उद्दामः कः अपि महान् हर्ष कोलाहलः दूरात् आविरभूत्. ॥ ४७ ॥ युग्मं ॥

अर्थः—अहो ! शुं एवो पण कल्याणकारी कोइ मंत्रवादी क्यांयें जोवामां आवे छे ? एम मनमां आश्चर्य पामेलो ते राजकुमार (जेवामां) बोले छे, ॥ ४६ ॥ तेवामां शोकरूपी कोकपक्षीने चंद्रसरखो, वाजित्रोना मनोहर शब्दोथी विस्तार पामेलो कोइक महान् आनंदनो कोलाहल दूरथी प्रगट थयो. ॥ ४७ ॥ युग्मं ॥

किमेतदिति भूभर्तृभुवा पृष्टः पुरः पथि । त्वरां त्यक्त्वा जगौ कश्चित्पुरुषोऽपरुषाक्षरैः ॥ ४८ ॥

अन्वयः—एतत् किं ? इति भूभर्तृ भुवा पृष्टः पुरः पथि कश्चित् पुरुषः त्वरां त्यक्त्वा अपरुष अक्षरैः जगौ. ॥ ४८ ॥

अर्थः—आ ते शुं छे ? एम ते राजकुमारे पूछवाथी आगळ मार्गे ( चालता ) कोइक पुरुषे उतावळ तजीने कोमल वचनोवडे ( तेने ) कह्युं के, ॥ ४८ ॥

**ग्रामेऽत्र नागनामा मे बन्धुर्विषधरान्मृतः । विशञ्श्मशानमुत्तस्थौ तरसा शिबिकान्तरात् ॥ ४९ ॥**

अन्वयः–अत्र ग्रामे मे नागनामा बंधुः विषधरात् मृतः, श्मशानं विशन् तरसा शिबिकांतरात् उत्तस्थौ. ॥ ४९ ॥

अर्थः—आ गाममां मारो नागनामनो भाइ सर्पना दंशथी मृत्यु पाम्यो हतो, ( परंतु ) श्मशानमां जतां ते तुरत ठांठडीमांथी उभो थयो. ॥ ४९ ॥

**तदैव दैवतो मर्त्यलोकासंभवसौरभः । उल्ललास कृतोच्छ्वासनासास्वाद्यः सदागतिः ॥ ५० ॥**

अन्वयः—दैवतः तदैव मर्त्य लोक असंभव सौरभः, कृत उच्छ्वास नासा आस्वाद्यः सदागतिः उल्ललास. ॥ ५० ॥

अर्थः—( वळी ) दैवयोगे तेज समये ( आ ) मनुष्यलोकमां असंभवित सुगंधिवाळो, तथा श्वासोश्वासथी नासीकाने गमे एवो वायु वावा लाग्यो. ॥ ५० ॥

**किमेष निर्विषः कौतस्कुतो वायुरसाविति । संलापः समभूत्तत्राशोके लोके तदा मुदा ॥ ५१ ॥**

अन्वयः—एषः निर्विषः किं ? असौ वायुः कौतस्कुतः ? इति तत्र अशोके लोके तदा मुदा संलापः समभूत्. ॥ ५१ ॥

अर्थः—आ विषरहित केम थयो? आवो (सुगंधी) वायु क्यांथी आव्यो? एम त्यां शोकरहित थयेला लोकोमां ते वखते हर्षथी वार्तालाप थवा लाग्यो. ॥ ५१ ॥

**यावद्विक्षिप्यते दक्षैर्दिक्षु चक्षुरितस्ततः । तावद्भावभरोद्भासिसभागर्भविभूषणः ॥ ५२ ॥**

**देवनिर्मितनिष्काब्जरत्नसिंहासनासनः । दृष्टो धर्मं दिशन्दूरादवनीपावनो मुनिः ॥ ५३ ॥ युग्मम् ॥**

अन्वयः—यावत् दक्षैः दिक्षु इतस्ततः चक्षुः विक्षिप्यते, तावत् भाव भर उद्भासि सभा गर्भ विभूषणः, ॥ ५२ ॥ देव निर्मित निष्क अब्ज रत्न सिंहासन आसनः, अवनी पावनः मुनिः दूरात् धर्मं दिशन् दृष्टः. ॥ ५३ ॥ युग्मं ॥

अर्थः—(पछी) जेवामां चतुरलोकोए दिशाओतरफ आमतेम नजर करी, तेवामां शुभ भावना समूहथी तेजस्वी थयेली सभानी अंदर अलंकारसरखा, ॥ ५२ ॥ तथा देवोए रचेला सुवर्णकमलपर रत्नना सिंहासनपर बेठेला, अने पृथ्वीने पवित्र करनारा (कोइक) मुनिने दूरथी धर्मनो उपदेश देता जोया. ॥ ५३ ॥ युग्मं ॥

**अहो महामुनिस्पर्शमाहात्म्यामोदमेदुरः । नागस्यास्य बभूवैष विषदोषहरो मरुत् ॥ ५४ ॥**

**इत्याकाशगिरं वारंवारं श्रुत्वा जनो मुदा । अगान्नागं पुरस्कृत्य कृत्यविद्वन्दितुं मुनिम् ॥ युग्मम् ॥**

अन्वयः—अहो! महामुनि स्पर्श माहात्म्य आमोद मेदुरः एषः मरुत् अस्य नागस्य विष दोष हरः बभूव. ॥ ५४ ॥ इति

वारंवारं आकाश गिरं श्रुत्वा कृत्यविद् जनः मुदा नागं पुरस्कृत्य मुनिं वंदितुं अगात्. ॥ ५५ ॥ युग्मं ॥

अर्थः—अहो ! (आ) महान् मुनीश्वरना स्पर्शना महिमाथी अति सुगंधी थयेलो आ वायु आ नागना विषना दोषनो नाश करनारो थयो छे, ॥ ५४ ॥ एम वारंवार थती आकाशवाणीने सांभळीने कृतज्ञ लोको हर्षथी (ते) नागने आगळ करीने मुनिने वांदवा गया. ॥ ५५ ॥ युग्मं ॥

**सुरासुरनरस्तूयमानातिशयवैभवम् । मुनिं नत्वात्तधर्मो मे भ्राताभ्येति महोत्सवैः ॥ ५६ ॥**

अन्वयः—सुर असुर नर स्तूयमान अतिशय वैभवं मुनिं नत्वा अत्त धर्मः मे भ्राता महोत्सवैः अभ्येति. ॥ ५६ ॥

अर्थः–देवो, दानवो अने मनुष्योवडे स्तुति करातो छे, अतिशयोनो वैभव जेनो, एवा (ते) मुनिने वांदीने, तथा जैनधर्म स्वीकारीने मारो (ते) भाइ महोत्सवपूर्वक आवे छे, ॥ ५६ ॥

**रयान्मया नयाधीश गत्वौकः प्रति संप्रति । वस्तु विस्तार्यमेवास्ति तोरणस्वस्तिकादिकम् ॥ ५७ ॥**

अन्वयः–(हे) नयाधीश ! संप्रति मया रयात् ओकःप्रति गत्वा तोरण स्वस्तिक आदिकं वस्तु विस्तार्यं एव अस्ति. ॥ ५७ ॥

अर्थः–हे न्यायी राजकुमार ! हवे मारे तुरत घेर जइने तोरण तथा स्वस्तिक आदिक पदार्थो त्यां गोठववाना छे. ॥ ५७ ॥

**एवमुक्त्वा गते तस्मिन्नानन्दं सुन्दराननः । भूपभूर्भूतसद्भावः प्रागल्भी गर्भमभ्यधात् ॥ ५८ ॥**

अन्वयः-एवं उक्त्वा तस्मिन् गते सुंदर आननः भूत सद्भावः भूपभूः आनंद प्रागल्मीगर्मं अभ्यधात्. ॥ ५८ ॥

अर्थः—एम कहीने ते माणसना गयाबाद सुंदर मुखवाळा, तथा उत्तम भावनी उत्पत्तिवाळा (ते) सनत्कुमार (ते) आनंद श्रावकप्रते उत्साहना उभरापूर्वक कहेवा लाग्या के, ॥ ५८ ॥

ईदृग्लोकोत्तरः पूर्वं न मया मान्त्रिकः श्रुतः । आगमार्थ इवोन्निद्रस्तन्द्रामुद्रितचेतसा ॥ ५९ ॥

अन्वयः-तन्द्रा मुद्रित चेतसा उन्निद्रः आगम अर्थः इव ईदृग् लोकोत्तरः मांत्रिकः मया पूर्वं श्रुतः न. ॥ ५९ ॥

अर्थः—आळसथी संकोचायेलां हृदयवडे करीने जेम आगमोनो अर्थ (न सांभळी शकाय) तेम आवा लोकोत्तर मंत्रवादीने में पूर्वे सांभळयो (पण) नथी. ॥ ५९ ॥

धन्यस्त्वं सिद्धवाक्योऽसि विवेकिन्येन वर्णितः । अलक्ष्योऽर्थः क्षणात्साक्षादेवं मे दर्शयिष्यते ॥ ६० ॥

अन्वयः-(हे) विवेकिन्! त्वं सिद्धवाक्यः धन्यः असि, येन वर्णितः अलक्ष्यः अर्थः एवं क्षणात् साक्षात् मे दर्शयिष्यते ६०.

अर्थः-हे विवेकी! (खरेखर) तुं वचनसिद्धिवाळो धन्यवादने पात्र छो, के जेणे कहेलो अगम्य अर्थ आरीते तुरतज साक्षात् मने देखाडी आप्यो. ॥ ६० ॥

तदेहि देहि पावित्र्यमस्माकं मुनिदर्शनात् । इत्युक्त्वा मार्गगं नागं सत्कृत्यानन्ददर्शितम् ॥ ६१ ॥

समं शृङ्गारसुन्दर्या शुद्धश्रद्धानुबन्धया । आनन्देन द्विधा सार्धं मुनिं नन्तुमगादसौ ॥ ६२ ॥युग्मम्॥

अन्वयः-तत् एहि ? मुनिदर्शनात् अस्माकं पावित्र्यं देहि ? इति उक्त्वा मार्गगं आनंद दर्शितं नागं सत्कृत्य, ॥ ६१ ॥ असौ शुद्ध श्रद्धा अनुबंधया शृंगारसुंदर्या समं द्विधा आनंदेन सार्धं मुनिं नंतुं अगात्. ॥ ६२ ॥ युग्मं ॥

अर्थः—माटे चाल ? अने ते मुनिराजना दर्शनथी अमोने पवित्र कर ? एम कहीने मार्गे जता, तथा ते आनंदे देखाडेला ते नागनो सत्कार करीने, ॥ ६१ ॥ ते सनत्कुमार निर्मल श्रद्धाना निश्चयवाळी शृंगारसुंदरीसहित बेरीते आनंदसाथे ते मुनिराजने वांदवा गयो. ॥ ६२ ॥ युग्मं. ॥

मुनिनाथं नमस्कृत्य लब्धाशीर्वचनस्ततः । शक्ररोचिरलंचक्रे संसदः सपरिच्छदः ॥ ६३ ॥

अन्वयः-मुनिनाथं नमस्कृत्य, ततः लब्ध आशीर्वचनः शक्ररोचिः सपरिच्छदः संसदः अलंचक्रे. ॥ ६३ ॥

अर्थः—(त्यां ते) मुनिराजने वांदीने, तथा तेमना तरफथी आशीर्वचन मेळवीने इंद्रसरखा तेजवाळो ते सनत्कुमार परिवारसहित सभाने शोभाववा लाग्यो. ॥ ६३ ॥

अन्तःप्रसत्तिपीयूषं वर्षन्पर्षदि वीक्षणैः । तत्त्वार्थं मुख्यमाचख्यौ तदा यतिपतिस्त्विति ॥ ६४ ॥

अन्वयः-वीक्षणैः पर्षदि अंतः प्रसत्ति पीयूषं वर्षन् यतिपतिः तदा इति मुख्यं तत्त्वार्थं आचख्यौ. ॥ ६४ ॥

अर्थः—दृष्टिवडे करीने सभानी अंदर (पोताना) हृदयनी कृपारूपी अमृतने वरसता एवा ते मुनिराज ते समये आवीरीतनो

मुख्य रहस्यरूप उपदेश देवा लाग्या. ॥ ६४ ॥

**अर्थेषु श्लाघ्यते धर्मो गुणेषु विनयो यथा । पुरुषस्तं विना व्यर्थः कायो जीवं विना यथा ॥ ६५ ॥**

अन्वयः-यथा गुणेषु विनयः, अर्थेषु धर्मः श्लाघ्यते, यथा जीवं विना कायः, तं विना पुरुषः व्यर्थः. ॥ ६५ ॥

अर्थः-जेम गुणोमां विनय, तेम पुरुषार्थोमां धर्म प्रशंसनीय छे, तथा जेम जीवविनानुं शरीर, तेम ते धर्मविनानो पुरुष नकामो छे.

**न वर्ण्यः सर्वरूपोऽपि विना धर्मं नृणां भवः । हृद्योऽप्यदेवः प्रासादः कोविदैर्न नमस्यते ॥ ६६ ॥**

अन्वयः-सर्व रूपः अपि नृणां भवः धर्मं विना न वर्ण्यः, हृद्यः अपि अदेवः प्रासादः कोविदैः न नमस्यते. ॥ ६६ ॥

अर्थः—सर्व सामग्रीवाळो होवा छतां पण मनुष्यभव धर्मविना प्रशंसवालायक नथी, ( केमके ) मनोहर होवा छतां पण देव-विनाना मंदिरने विद्वानो नमता नथी. ॥ ६६ ॥

**सुखं चिन्तितमल्पं यो दत्तेऽनल्पमचिन्तितम् । धर्मश्चिन्तामणिर्धत्ते सोऽस्मच्चित्ते चमत्कृतिम् ॥ ६७ ॥**

अन्वयः-यः चिंतितं अल्पं सुखं, अचिंतितं अनल्पं दत्ते, सः चिंतामणिः धर्मः अस्मत्चित्ते चमत्कृतिं धत्ते. ॥ ६७ ॥

अर्थः—जे धर्म चिंतवेलां स्वल्प सुखने, अणचिंतवेलां अत्यंत सुखरूपे आपे छे, ते चिंतामणिसरखो धर्म आपणा हृदयमां आश्चर्य उपजावे छे. ॥ ६७ ॥

**संसारग्रीष्मदुःखोर्मिधर्मसंतापिता यदि । ततो धर्मामृते सन्तु सज्जनाः सज्जमज्जनाः ॥ ६८ ॥**

अन्वयः-सज्जनाः यदि संसार ग्रीष्म दुःख ऊर्मि धर्म संतापिताः, ततः धर्म अमृते सज्ज मज्जनाः संतु. ॥ ६८ ॥

अर्थः—उत्तम मनुष्यो जो संसाररूपी उनाळाना कष्टदायी मोजांओना तापथी तप्त थयेला होय, तो तेओए धर्मरूपी अमृतनी अंदर स्नान करवुं. ॥ ६८ ॥

**क्षणेऽस्मिन्विस्मयस्मेरनयनो मुनिदर्शनात् । सनत्कुमारः सद्भक्तिरुवाच रचिताञ्जलिः ॥ ६९ ॥**

अन्वयः-अस्मिन् क्षणे मुनि दर्शनात् विस्मय स्मेर नयनः सद्भक्तिः सनत्कुमारः रचित अंजलिः उवाच. ॥ ६९ ॥

अर्थः—ते समये मुनिराजना दर्शनथी, आश्चर्यवडे विकस्वर चक्षुओवाळो, तथा उत्तम प्रकारनी भक्तिवाळो (ते) सनत्कुमार हाथ जोडीने कहेवा लाग्यो के, ॥ ६९ ॥

**एवं यः स्तूयते धर्मः प्रभो युष्माभिरद्भुतः । देहिभिर्गेहिभिः सोऽयं क्रियमाणो भवेन्न वा ॥ ७० ॥**

अन्वयः-(हे) प्रभो ! यः अद्भुतः धर्मः युष्मामिः एवं स्तूयते, सः अयं गेहिमिः देहिमिः क्रियमाणः भवेत् वा न ? ॥७०॥

अर्थः—हे स्वामी ! जे अद्भुत धर्मनी आप आवी प्रशंसा करो छो, ते आ धर्म गृहस्थ मनुष्योथी करी शकाय के नहिं ? ७०.

**भवेद्भव्यात्मनां धर्मः सर्वेषां विधिना कृतः । श्रुत्वेति श्रुतिपीयूषं मुनिवाचमुवाच सः ॥ ७१ ॥**

अन्वयः—विधिना कृतः धर्मः सर्वेषां भव्यात्मनां भवेत्, इति श्रुतिपीयूषं मुनिवाचं श्रुत्वा सः उवाच. ॥ ७१ ॥

अर्थः-विधिपूर्वक करेलो धर्म सर्व भव्यजीवोने होइ शके छे, एरीतनी कर्णोमां अमृत सरखी ते मुनिराजनी वाणी सांभळीने ते

सनत्कुमार बोल्यो के, ॥ ७१ ॥

यद्येवं तत्कथंकारमिदं सारतरं वयः । हृद्यं रूपमिदं मान्यैरवमन्य व्रतं वृतम् ॥ ७२ ॥

अन्वयः-यदि एवं, तत् मान्यैः इदं सारतरं वयः, इदं हृद्यं रूपं अवमन्य कथंकारं व्रतं वृतं ? ॥ ७२ ॥

अर्थः—जो एम छे, तो आपे आ अति उत्तम यौवनवय, तथा आ मनोहर रूपनी अवगणना करीने शामाटे चारित्र लीधुं छे ?

अथ प्रथितपाथोधिधीरध्वानकिरां गिरम् । जगाद जगदानन्ददायकः साधुनायकः ॥ ७३ ॥

अन्वयः-अथ जगत् आनंद दायकः साधु नायकः प्रथित पाथोधि धीर ध्वान किरां गिरं जगाद. ॥ ७३ ॥

अर्थः—हवे जगतने आनंद आपनारा ते मुनिमहाराज उछळेला समुद्रसरखी गंभीर ध्वनिवाळी वाणी बोल्या के, ॥ ७३ ॥

दुःकर्मबन्धवंशोत्थः संमोहोध्धुरधूमभृत् । दक्षपक्षिगणद्वेष्यः समीपस्थात्मतापकः ॥ ७४ ॥

दुर्गरोगस्फुलिङ्गोग्रः कलहत्राटकृतारवः । मिथ्याज्ञानमरुत्प्रेर्यः सर्वेषां शोषपोषकः ॥ ७५ ॥

अशक्यस्त्यक्तुमत्यन्तं मिथ्यादृष्टिजडालसैः । मृतिज्वालाभिरुत्फुल्लान्मनोरथतरून्दहन् ॥ ७६ ॥

निरातङ्कं सदानन्दं पदं गन्तुं शुभेऽध्वनि । व्रते भवदवस्तावदेको हेतुर्ममाभवत् ॥ ७७ ॥

अन्वयः—दुःकर्म बंध वंश उत्थः, संमोह उध्धुर धूमभृत्, दक्ष पक्षि गण द्वेष्यः, समीपस्थ आत्म तापकः, ॥ ७४ ॥ दुर्ग रोग

स्फुलिंग उग्रः, कलह त्राट्कृत आरवः, मिथ्याज्ञान मरुत् प्रेर्यः, सर्वेषां शोष पोषकः, ॥ ७५ ॥ मिथ्यादृष्टि जड अलसैः त्यक्तुं अत्यंतं अशक्यः, उत्फुल्लान् मनोरथतरून् मृति ज्वालाभिः दहन्, ॥ ७६ ॥ भवदवः, निरातंकं सदानंदं पदं गंतुं शुभे अध्वनि व्रते मम तावत् एकः हेतुः अभवत्. ॥ ७७ ॥ चतुर्भिः कलापकं ॥

अर्थः—दुष्कर्मोना बंधरूपी वांसथी उत्पन्न थयेलो, मोहरूपी उछळता धुमाडावाळो, चतुर मनुष्योरूपी पक्षिओना समूहने पीडनारो, नजीक रहेला प्राणीओने ताप करनारो, ॥ ७४ ॥ असाध्य रोगोरूपी तणखाओवडे भयंकर थयेलो, क्लेशरूपी तडतड अवाज करनारो, असत्य ज्ञानरूपी वायुवडे विस्तार पामतो, सर्वने सूकावी नाखनारो, ॥ ७५ ॥ मिथ्यात्वी, मूर्ख, तथा आलसुओवडे अत्यंत न तजी शकाय एवो, प्रफुल्लित थयेला मनोरथोरूपी वृक्षोने मृत्युरूपी ज्वालाओवडे बाळतो, ॥ ७६ ॥ एवो आ संसाररूपी दावानल, निर्भय तथा हमेशना आनंदरूप मोक्षमां जवाने उत्तम मार्गसरखा आ चारित्रने लेवामां मने एक हेतुरूप थयेल छे. ॥ ७७ ॥ चतुर्भिः कलापकं ॥

**द्वितीयः कः प्रभो हेतुर्भवतां भवतान्तिभित् । इति पृष्टे सतामिष्टे कुमारेण मुनिर्जगौ ॥ ७८ ॥**

अन्वयः—( हे ) प्रभो! भवतां भवतांतिभित् द्वितीयः हेतुः कः ? इति कुमारेण सतां इष्टे पृष्टे मुनिः जगौ. ॥ ७८ ॥

अर्थः—हे स्वामी! आपने ( आ ) संसार त्यागवानुं बीजुं शुं कारण छे? एम ते सनत्कुमारे सज्जनोने मनगमतो प्रश्न करवाथी मुनिराज बोल्या के, ॥ ७८ ॥

अस्तीह स्तुतविस्तारा ताराख्या रुचिरा पुरी । यार्कतापेन न क्लिष्टा कीर्णा कोटिध्वजाञ्चलैः ॥ ७९ ॥

अन्वयः—इह स्तुत विस्तारा ताराख्या रुचिरा पुरी अस्ति, या कोटिध्वज अंचलैः कीर्णा अर्क तापेन न क्लिष्टा. ॥ ७९ ॥

अर्थः—अहीं प्रशंसनीय विस्तारवाळी तारा नामनी मनोहर नगरी छे, के जे करोडपतिओना (मकानोपर उडती) धजाओना छेडाओवडे भरेली होवाथी सूर्यना तापथी खेद पामती नहोती. ॥ ७९ ॥

तत्र शास्त्रपवित्रार्थकृतार्थीकृतचेतनः । तारापीड इति क्ष्मापः स्थापको नयधर्मयोः ॥ ८० ॥

अन्वयः—तत्र शास्त्र पवित्र अर्थ कृतार्थीकृत चेतनः, नय धर्मयोः स्थापकः तारापीड इति क्ष्मापः. ॥ ८० ॥

अर्थः—ते नगरीमां शास्त्रोना पवित्र अर्थोवडे कृतार्थ करेल छे आत्मा जेणे, एवो, तथा न्याय अने धर्मनी व्यवस्था करनारो तारापीडनामे राजा हतो. ॥ ८० ॥

तन्मित्रं संपदां पात्रं पुत्रः श्रीपतिमन्त्रिणः । श्रीषेणसंज्ञः स्वप्रज्ञाज्ञातज्ञातव्यवैभवः ॥ ८१ ॥

अन्वयः—संपदां पात्रं, स्व प्रज्ञा ज्ञात ज्ञातव्य वैभवः श्रीपति मंत्रिणः श्रीषेणसंज्ञः पुत्रः तन्मित्रं ॥ ८१ ॥

अर्थः—संपदाना भाजनसरखो, तथा पोतानी बुद्धिथी जाणेल छे, जाणवालायक पदार्थोनुं ज्ञान जेणे, एवो श्रीपतिनामना मंत्रिनो श्रीषेण नामे पुत्र ते राजानो मित्र हतो. ॥ ८१ ॥

अन्यदा प्रमदालोकलोललोचनलोकितः । वसन्ते रन्तुमुद्यानं स ययौ नवयौवनः ॥ ८२ ॥

अन्वयः—प्रमदा लोक लोल लोचन लोकितः, नव यौवनः सः अन्यदा वसंते रंतुं उद्यानं ययौ. ॥ ८२ ॥

अर्थः—स्त्रीओनी चपल आंखोवडे जोवायेलो, तथा नवां यौवनवाळो ते श्रीषेण एक दिवसे वसंतऋतुमां क्रीडा करवामाटे बगीचामां गयो. ॥ ८२ ॥

**ललन्ती ललना तत्र नेत्रपत्रसुधाञ्जनम्। ददृशे पुण्यलावण्यपण्यापणमिवामुना ॥ ८३ ॥**

अन्वयः—तत्र अमुना नेत्र पत्र सुधा अंजनं, पुण्य लावण्य पण्य आपणं इव ललंती ललना ददृशे. ॥ ८३ ॥

अर्थः—त्यां तेणे चक्षुमां अमृतना अंजन सरखी, तथा मनोहर लावण्यरूपी करीयाणानी दुकान सरखी क्रीडा करती (कोइक) स्त्रीने दीठी. ॥ ८३ ॥

**एषा श्रीषेणमेणाक्षी वीक्ष्य साक्षान्मनोभवम्। दक्षं कटाक्षविक्षेपलक्षैरुत्क्षिप्य हृद्यधात् ॥ ८४ ॥**

अन्वयः-एणाक्षी सा दक्षं श्रीषेणं साक्षात् मनोभवं वीक्ष्य कटाक्ष विक्षेप लक्षैः उत्क्षिप्य हृदि अधात्. ॥ ८४ ॥

अर्थः—हरिणसरखां नेत्रोवाळी ते स्त्रीए ते चतुर श्रीषेणने साक्षात् कामदेवसरखो जोइने लाखोगमे कटाक्षोवडे उछाळीने पोताना हृदयमां धारण कर्यो. (अर्थात् तेणीए कटाक्षोरूपी बाणो मारीने तेने वश करी लीधो) ॥ ८४ ॥

**अन्योन्यं दर्शनातृप्तावन्योन्यमनुरागिणौ। स्वस्वावसथमस्वस्थौ जग्मतुस्तौ दिनात्यये ॥ ८५ ॥**

अन्वयः-अन्योन्यं दर्शन अतृप्तौ, अन्योन्यं अनुरागिणौ, अस्वस्थौ तौ दिन अत्यये स्व स्व आवसथं जग्मतुः ॥ ८५ ॥

अर्थः—परस्पर जोवामां तृप्ति नही पामेला, परस्पर प्रेममां पडेला, ( अने तेथी ) व्याकुल थयेला तेओ बन्ने सूर्य अस्त थया-बाद पोतपोताने घेर गया. ॥ ८५ ॥

**ग्रस्तस्तत्र मृगीनेत्रावियोगेन स मन्त्रिभूः । निशिनिद्रादरिद्रोऽयमित्यमुद्रमचिन्तयत् ॥ ८६ ॥**

अन्वयः-तत्र मृगीनेत्रा वियोगेन ग्रस्तः सः अयं मंत्रिभूः निशि निद्रा दरिद्रः अमुद्रं इति अचिंतयत्. ॥ ८६ ॥

अर्थः—त्यां ( ते ) स्त्रीना वियोगथी व्याकुल थयेलो ते आ मंत्रिकुमार रात्रिए निद्रा न आववाथी अस्खलितपणे एम विचारवा लाग्यो के, ॥ ८६ ॥

**अहो रूपमहो कान्तिरहो नयनविभ्रमः । अहो स्नेहानुबन्धश्च तस्याः शस्यावधेर्मयि ॥ ८७ ॥**

अन्वयः-शस्य अवधेः तस्याः अहो ! रूपं ! अहो ! कांतिः ! अहो ! नयन विभ्रमः ! च अहो ! मयि स्नेह अनुबंधः ! ॥८७॥

अर्थः—प्रशंसानी सीमासरखी एवी ते स्त्रीनुं अहो ! केवुं सुंदर रूप ! अहो ! केवी सुंदर कांति ! अहो केवो सुंदर आंखोनो विलास ! तथा अहो ! मारापर तेणीनो केटलो बधो प्रेम छे ! ॥ ८७ ॥

**कुलस्यालंकृतिः कस्य किं नाम स्तावयत्यसौ । क्व मया द्रक्ष्यते केनोपायेन श्वस्तने दिने ॥ ८८ ॥**

अन्वयः-असौ कस्य कुलस्य अलंकृतिः ? किं नाम स्तावयति ? श्वस्तने दिने केन उपायेन क्व मया द्रक्ष्यते ? ॥ ८८ ॥

अर्थः—ते स्त्री कया कुलने शोभावती हशे ? (पोतानुं) शुं नाम कहेवरावती हशे ? तथा आवती काले कया उपायथी, अने क्यां ते मने देखाशे ? (मलशे?) ॥ ८८ ॥

**पार्थिवेन वृथा मैत्री व्यर्था मे मन्त्रिपुत्रता । निरर्थकं च जन्मेदं यदि तस्या न संगमः ॥ ८९ ॥**

अन्वयः—यदि तस्याः मे संगमः न, पार्थिवेन मैत्री वृथा, मंत्रि पुत्रता व्यर्था, च इदं जन्म निरर्थकं. ॥ ८९. ॥

अर्थः—जो ते स्त्रीनो मने संगम न थाय तो, राजासाथेनी (मारी) मित्राइ नकामी छे, मंत्रीपुत्रपणुं (पण) नकामुं छे, अने आ जन्म (पण) नकामोज छे. ॥ ८९ ॥

**इत्याद्यनल्पसंकल्पसंतापितमनाः स ना । प्रतियामं युगोन्मानादक्षिपद्दुःक्षिपां क्षपाम् ॥ ९० ॥**

अन्वयः—इत्यादि अनल्प विकल्प संतापित मनाः सः ना, प्रतियामं युग उन्मानात् दुःक्षिपां क्षपां अक्षिपत्. ॥ ९० ॥

अर्थः—इत्यादि अनेक विकल्पोवडे व्याकुल हृदयवाळा ते पुरुषे, दरेक पोहोरने युगजेवडो म्होटो गणतांथकां घणे प्रयासे रात्रिने वीताडी. ॥ ९० ॥ चतुर्भिः कलापकं ॥

**द्वितीयेऽह्नि स मध्याह्ने रहस्युपवने गतः । कात्यायन्या कयाप्यूचे चिन्ताचुम्बितचेतनः ॥ ९१ ॥**

अन्वयः-द्वितीये अह्नि मध्याह्ने सः रहसि उपवने गतः, चिंता चुंबित चेतनः कया अपि कात्यायन्या ऊचे. ॥ ९१ ॥

अर्थः—(पछी) बीजे दिवसे मध्याह्नसमये ते एकांते बगीचामां गयो, तथा चिंतातुर हृदयथी (त्यां बेठो, एवामां) कोइक कु-

टणीए ( आवीने ) तेने कह्युं के, ॥ ९१ ॥

**इहास्ति पुरवास्तव्यः स्तोतव्यगुणभूषणः । तारापीडधराधीशोपाध्यायस्तारकाभिधः ॥ ९२ ॥**

अन्वयः-इह पुरवास्तव्यः स्तोतव्य गुण भूषणः, तारकाभिधः तारापीड धरा अधीश उपाध्यायः अस्ति. ॥ ९२ ॥

अर्थः-आ नगरनो रहेवासी, तथा प्रशंसापात्र गुणोना अलंकारवाळो, तारकनामनो तारापीडराजानो उपाध्याय छे. ॥ ९२ ॥

**पूर्वपत्न्यां प्रमीतायां कुलश्रीशीलशालिना । एतेनोद्वाहिता रूपमहिता रोहिताह्वया ॥ ९३ ॥**

अन्वयः-पूर्वपत्न्यां प्रमीतायां कुल श्री शील शालिना एतेन रूप महिता रोहिताह्वया उद्वाहिता. ॥ ९३ ॥

अर्थः—प्रथमनी पत्नी गुजरीजवाथी, कुल, लक्ष्मी तथा शीलथी शोभता एवा ते उपाध्याये मनोहर रूपवाळी रोहितानामनी स्त्रीने परणेली छे. ॥ ९३ ॥

**जराजर्जरगात्रोऽहमियं तु नवयौवना । चलान्यक्षाणि चेत्येष दत्ते नास्या बहिर्गतिम् ॥ ९४ ॥**

अन्वयः-अहं जरा जर्जर गात्रः, इयं तु नव यौवना, च चलानि अक्षाणि, इति एष अस्याः बहिः गतिं न दत्ते. ॥ ९४ ॥

अर्थः—-हुं तो वृद्धपणाथी शिथिल शरीरवाळो छुं, अने आ रोहिता तो खीलतां यौवनवाळी छे, वळी इंद्रियो चपल होय छे, एम विचारी ते उपाध्याय तेणीने (घरनी) बहार जवा देतो नथी. ॥ ९४ ॥

गतः शाखापुरे राज्ञादिष्टोऽसौ ह्यस्तने दिने । मया धात्र्या समं चेयमुद्यानं कथमप्यगात् ॥ ९५ ॥

अन्वयः-राज्ञा आदिष्टः असौ ह्यस्तने दिने शाखापुरे गतः, च इयं मया धात्र्या समं कथं अपि उद्यानं अगात्. ॥ ९५ ॥

अर्थः—राजाए हुकम करवाथी ते उपाध्याय गइकाले (बहार) परांमां गयो हतो, अने (तेथी) ते रोहिता (तेणीनी) धाव एवी जे हुं, तेनी साथे मुश्केलीथी बगीचामां गइ हती. ॥ ९५ ॥

सुभग त्वं तया तत्र दृष्टो दृष्टिप्रियस्तथा । स्मरज्वरभरार्ता सा रोहिता मोहिता यथा ॥ ९६ ॥

अन्वयः-(हे) सुभग ! तत्र दृष्टिप्रियः त्वं तया तथा दृष्टः, यथा स्मर ज्वर भर आर्ता सा रोहिता मोहिता. ॥ ९६ ॥

अर्थः-हे सुभग ! त्यां नेत्रप्रिय एवा तने तेणीए एरीते जोयो, के जेथी कामतापना समूहथी पीडायेली ते रोहिता मोह पामी.

तदर्तिं हर्तुमद्यास्मद्दुहितुर्देहि दर्शनम् । विधेहि वाचिकं चेदं हारयष्ट्या सहागतम् ॥ ९७ ॥

अन्वयः-अस्मद् दुहितुः तदर्तिं हर्तुं अद्य दर्शनं देहि ? च हारयष्ट्या सह आगतं इदं वाचिकं विधेहि ? ॥ ९७ ॥

अर्थः—मारी पुत्रीनी ते कामपीडा हरवाने आजे तमो दर्शन आपो ? अने (आ) हारलतासाथे आवेलो ( तेणीनो ) नीचे मुजबनो संदेशो स्वीकारो ? ॥ ९७ ॥

स्फुरत्कान्तरुचिं कान्तां कृतस्वातिरसप्रियाम् । धेहि मां हारयष्टिं च हृदये हृदयेश्वर ॥ ९८ ॥

अन्वयः-(हे, हृदय ईश्वर! स्फुरत् कांत रुचिं, कांतां, कृत स्व अति रस प्रियां मां च हारयष्टिं हृदये धेहि ? ॥ ९८ ॥

अर्थः—हे! हृदयना स्वामी! विस्तीर्ण तेजस्वी कांतिवाळी, मनोहर, तथा करेल छे (आपने) पोताना अतिरसथी प्रिय जेणीए, एवी मने तथा (आ) हारलताने (आप आपना) हृदयमां धारण करो? ॥ ९८ ॥

**ततो हारलतां कण्ठे न्यस्य सा मे प्रियेत्यहो । विशेषादेष शिश्लेष कामिनः क्व विवेकिता ॥ ९९ ॥**

अन्वयः-ततः अहो! सा मे प्रिया! इति हारलतां कंठे न्यस्य एषः विशेषात् शिश्लेष, कामिनः विवेकिता क्व? ॥ ९९ ॥

अर्थः—पछी अहो! ते मने प्यारी छे! एम (कही) ते हारलताने (पोताना) कंठमां नाखीने ते श्रीषेण (तेने) खूब आलिंगन करवा लाग्यो, (केमके) कामातुरने विवेकपणुं क्यांथी आवे? ॥ ९९ ॥

**क्षणं श्रान्तिः क्षणं भ्रान्तिः क्षणं चिन्ता क्षणं धृतिः । क्षणं त्रासः क्षणं हासस्तमव्रीडं व्यडम्बयत् ५००**

अन्वयः—तं अव्रीडं क्षणं श्रांतिः, क्षणं भ्रांतिः, क्षणं चिंता, क्षणं धृतिः, क्षणं त्रासः, क्षणं हासः व्यडंबयत् . ॥ ५०० ॥

अर्थः—(पछी) ते निर्लज्ज श्रीषेणने क्षणमां थाक, क्षणमां भ्रम, क्षणमां चिंता, क्षणमां धैर्य, क्षणमां भय, अने क्षणमां हास्य विडंबना करवा लाग्यां. ॥ ५०० ॥

**इत्यस्मिन्स्मरदोषेण श्रीषेणे विषमीकृते । दुष्टचेष्टाघटापोषः प्रदोषः समभूत्ततः ॥ १ ॥**

अन्वयः—ततः इति स्मर दोषेण अस्मिन् श्रीषेणे विषमीकृते दुष्ट चेष्टा घटा पोषः प्रदोषः समभूत् . ॥ १ ॥

अर्थः—पछी ए रीते कामविकारथी ते श्रीषेण व्याकुळ होते छत्ते दुष्टोनी चेष्टाओने वधारनारो प्रदोष (संध्याकाळ) थयो. ।१।

**एहि तद्भवनं तस्या यौवनं कुरु पावनम् । एवमुक्तस्तया नार्या सोऽनार्याशो मुदाचलत् ॥ २ ॥**

अन्वयः—तद्भवनं एहि ? तस्याः यौवनं पावनं कुरु ? एवं तया नार्या उक्तः अनार्य आशः सः मुदा अचलत् . ॥ २ ॥

अर्थः—(हवे) तेणीने घेर चाल? अने तेनुं यौवन पवित्र कर! एरीते ते स्त्रीए कहेवाथी दुष्ट आशावाळो, ते श्रीषेण हर्षथी चालवा लाग्यो. ॥ २ ॥

**असन्मार्गोज्ज्वलत्कामस्तमश्छन्नोऽपरिच्छदः । स तया दुर्धिया सार्धं तां प्रापात्मेव दुर्गतिम् ॥ ३ ॥**

अन्वयः—असत् मार्गउज्ज्वलत्कामः, तमः छन्नः, अपरिच्छदः सः आत्मा दुर्गतिं इव, तया दुर्धिया सार्धं तां प्राप. ॥ ३ ॥

अर्थः—खोटे रस्ते चालनारो, (हृदयमां) सळगी उठेला कामविकारवाळो, अंधकारथी (पक्षे—अज्ञानथी) छवायेलो, अने परिवारविनानो, एवो ते श्रीषेण, आत्मा जेम दुर्गतिमां जाय, तेम ते दुष्टबुद्धिवाळी स्त्रीनी साथे ते रोहिताने जइ मळ्यो. ॥ ३ ॥

**दुर्दैवद्रोहितां यावद्रोहितां वार्तयत्यसौ । तावद्धावत्परीवारस्तारको द्वारमागमत् ॥ ४ ॥**

अन्वयः—दुर्दैव द्रोहितां रोहितां यावत् असौ वार्तयति, तावत् धावत्परीवारः तारकः द्वारं आगमत् . ॥ ४ ॥

अर्थः—दुर्दैवना द्वेषवाळी एवी ते रोहितासाथे जेवामां ते वातचीत करे छे, तेवामां दोडता परीवारवाळो ते तारक उपाध्याय बारणे आवी पहोंच्यो. ॥ ४ ॥

कात्यायन्या स भीत्यार्तः प्रक्षिप्तः क्षालकूपके । अस्थात्प्रस्थानके गन्तुमिवायं निरयं हहा ॥ ५ ॥

अन्वयः—भीत्या आर्तः सः कात्यायन्या क्षाल कूपके प्रक्षिप्तः, हहा! निरयं गंतुं प्रस्थानके इव अयं अस्थात्. ॥ ५ ॥

अर्थः-भयथी पीडित थयेला एवा ते श्रीषेणने ( ते ) कुटणीए गटरना कुआमां फेंक्यो, (अने) अरेरे! नरकमां जवानुं जाणे प्रयाण करतो होय नही ! तेम ते तेमां रह्यो. ॥ ५ ॥

दुर्गन्धबहुले कीटसंकुले पङ्किले जले । गलदघ्ने घनं मग्नः स तटीघर्षणव्रणः ॥ ६ ॥

अन्वयः—तटी घर्षण व्रणः सः दुर्गंध बहूले, कीट संकुले, गलदघ्ने पंकिले जले घनं मग्नः ॥ ६ ॥

अर्थः-( ते कूपना ) किनारापर घसावाथी ( शरीरमां ) घारां पडेलो ते श्रीषेण, अत्यंत दुर्गंधी, कीडाओथी भरेला, अने कादववाळां पाणीमां छेक कंठसुधी बुडी गयो. ॥ ६ ॥

तत्र शूकाकृतोत्कारवान्ताहाररयाहतैः । उत्थितैः कुथितैः क्षालजलैर्विशद्भिराननें ॥ ७ ॥

लोलाभिर्वान्तलालाभिः पिच्छलाभिर्वृतोऽभितः । सशृङ्गारोऽपि बीभत्सरसोऽङ्गीव बभूव सः ॥ ८ ॥

अन्वयः—तत्र शूका कृत उत्कार वांत आहार रय आहतैः, उत्थितैः कुथितैः क्षालजलैः आनने विशद्भिः, ॥ ७॥ लोलाभिः पिच्छलाभिः वांत लालाभिः अभितः वृतः सः सशृंगारः अपि अंगी बीभत्स रसः इव बभूव. ॥ ८ ॥ युग्मं ॥

अर्थः-त्यां सूगथी करेली ओकारीवडे वमेला आहारना वेगना झपाटाथी उछळेलुं ते कोहेलुं खाळनुं पाणी मुखमां जवाथी ।७।

तथा मुखमांथी लटकती, अने चीकणी उलटीनी लाळोवडे चोतरफथी छवाइ गयेलो ते श्रीषेण ( आभूषणो विगेरेथी ) शणगारेलो होवा छतां पण जाणे देहधारी बीभत्सरस होय नही ! तेवो थइ गयो ॥ ८ ॥ युग्मं ॥

**वदने मशकैर्दंशैः कृमिभिस्तिमिभिस्तनौ । तलेऽसौ कर्परैः कीलैस्तदात्यर्थं कदर्थितः ॥ ९ ॥**

अन्वयः-तदा असौ वदने मशकैः दंशैः, तनौ कृमिभिः तिमिभिः, तले कर्परैः ( कर्करैः ) कीलैः अत्यर्थं कदर्थितः ॥ ९ ॥

अर्थः—ते वखते ते श्रीषेण मुखपर मच्छरो अने डांसोवडे, शरीरपर कीडा तथा जलचरो वडे, अने पगने तलीये काचलां (कांकरा) तथा खीलाओवडे अत्यंत कष्ट पामवा लाग्यो. ॥ ९ ॥

**विशत्यम्बुनि नासायामनाशोऽयं स्वजीविते । कूपकण्ठे क्षिपन्हस्तौ तीक्ष्णालेनालिना हतः ॥ १० ॥**

अन्वयः—नासायां अंबुनि विशति स्वजीविते अनाशः अयं कूप कंठे हस्तौ क्षिपन् तीक्ष्ण अलेन अलिना हतः. ॥ १० ॥

अर्थः-नाकमां ते पाणी जवाथी जीववानी आशा तजीने ते श्रीषेण ते कुआना कांठापर हाथ राखवा लाग्यो, त्यारे तीक्ष्ण दंशवाळा विछुए तेने डंख मार्यो. ॥ १० ॥

**इत्थं निशीथकालेऽसौ नरको नरकाधिकम् । सहमानो महादुःखमश्रौषीत्तुमुलं गृहे ॥ ११ ॥**

अन्वयः—इत्थं नरक अधिक महा दुःखं सहमानः असौ नरकः निशीथ काले गृहे तुमुलं अश्रौषीत्. ॥ ११ ॥

अर्थ-एरीते नरकथी पण अधिक अति कष्टने सहन करता एवा ते श्रीषेणे मध्यरात्रिए (ते) घरनी अंदर कोलाहल सांभळ्यो.

तदार्धवृद्धा दक्षासौ क्षालतः सज्जरज्जुना । तमाचकर्ष दुःकर्मत्रुटिर्जीवमिवाशिवात् ॥ १२ ॥

अन्वयः–तदा अर्धवृद्धा असौ दक्षा दुःकर्मत्रुटिः अशिवात् जीवं इव, सज्ज रज्जुना तं क्षालतः आचकर्ष. ॥ १२ ॥

अर्थः—ते वखते अर्धजरती एवी ते चतुर कुटणीए, दुष्कर्मोनो विनाश उपद्रवमांथी जीवनो जेम (उद्धार करे ) तेम तैयार राखेलां दोरडांवडे ते श्रीषेणने (ते) खालमांथी (बहार) खेंची कहाड्यो. ॥ १२ ॥

आगत्योपवने तत्र ज्ञापयिष्यामि भाविनम् । वृत्तान्तं तु नितान्तं त्वां व्रज द्वारेऽस्ति कोऽपि न ॥१३॥

अन्वयः–तत्र उपवने आगत्य भाविनं नितांतं वृत्तांतं तु त्वां ज्ञापयिष्यामि, व्रज ! द्वारे कः अपि न अस्ति. ॥ १३ ॥

अर्थः–ते बगीचामां आवीने हवे थनारुं सघळुं वृत्तांत (हुं) तने जणावीश, (माटे हमणा) चाल्यो जा ! दरवाजे कोइ पण नथी.

एवमुक्तस्तया क्षालजलाविलतनुस्ततः । प्रणनाश स कीनाशपाशच्युत इव द्रुतम् ॥ १४ ॥

अन्वयः–तया एवं उक्तः, क्षाल जल आविल तनुः सः कीनाश पाश च्युतः इव ततः द्रुतं प्रणनाश. ॥ १४ ॥

अर्थः—तेणीए एम कह्याथी. खालना जलथी लींपायेलां शरीरवाळो ते श्रीषेण जाणे यमना पाशमांथी छूटयो होय नही ! तेम त्यांथी एकदम नाशी छूटयो. ॥ १४ ॥

नरैरारक्षकैः कोलाहलं श्रुत्वा त्वरागतैः । नश्यन्दृष्टः स कोदण्डदण्डैर्हत्वा न्यबध्यत ॥ १५ ॥

अन्वयः–कोलाहलं श्रुत्वा त्वरा आगतैः आरक्षकैः नरैः सः नश्यन् दृष्टः, कोदंड दंडैः हत्वा न्यबध्यत. ॥ १५ ॥

अर्थः—कोलाहल सांभळीने एकदम आवेला पोलीसना माणसोए ते श्रीषेणने ( त्यांथी ) नाशतो दीठो, ( तेथी तेओए तेने ) धनुषना दंडोथी मारीने बांध्यो. ॥ १५ ॥

गर्ताशूकरवत्कोऽयं दिग्धो दुर्गन्धकर्दमैः । इति दीपकरैरेभिरीक्षितः सोपलक्षितः ॥ १६ ॥

अन्वयः—दुर्गंध कर्दमैः दिग्धः गर्ताशूकरवत् अयं कः? इति दीपकरैः एभिः ईक्षितः, च सोपलक्षितः. ॥ १६ ॥

अर्थः—दुर्गंधवाळा कादवथी खरडायेलो खाबोचीयामां आलोटता डुक्करजेवो आ कोण छे? एम विचारी हाथमां दीपक लेइ तेओए जोवाथी तेने ओळखी कहाड्यो के, ॥ १६ ॥

युक्तो मोक्तुममोक्तुं वा मित्रं क्षितिपतेरसौ । इत्यालोचपराः सर्वे नरा मूढत्वमागमन् ॥ १७ ॥

अन्वयः—असौ क्षितिपतेः मित्रं मोक्तुं वा अमोक्तुं युक्तः? इति आलोच पराः सर्वे नराः मूढत्वं आगमन्. ॥ १७ ॥

अर्थः—आ तो राजानो मित्र श्रीषेण छे, ( माटे तेने ) छोडी मूकवो के न छोडवो ठीक, एम विचारमां पडेला ते पोलीसना सर्वे मनुष्यो मुंझवणमां पड्या. ॥ १७ ॥

तदावदातधीर्वीरचर्यया संचरन्नृपः । आययौ तुमुलाकृष्टो दृष्टवान्पथि तं तथा ॥ १८ ॥

अन्वयः—तदा अवदातधीः नृपः वीर चर्यया संचरन् तुमुल आकृष्टः आययौ, तथा पथि तं दृष्टवान्. ॥ १८ ॥

अर्थः—ते समये निर्मल बुद्धिवाळो राजा गुप्तवेषे फरतोथको आ कोलाहलथी खेंचाइने त्यां आव्यो, तथा मार्गमां ( तेणे ) ते

श्रीषेणने दीठो. ॥ १८ ॥

ज्ञात्वा तं कृतिनां सीमा श्रीमान्भूमानचिन्तयत्। मन्येऽसौ मदुपाध्यायालये तुमुलकारणम् ॥ १९ ॥

अन्वयः-तं ज्ञात्वा कृतिनां सीमा श्रीमान् भूमान् अचिंतयत्, मदुपाध्याय आलये तुमुल कारणं असौ, मन्ये. ॥ १९. ॥

अर्थः—तेने ओळखीने चतुरशिरोमणि एवो ते श्रीमान् राजा विचारवा लाग्यो के, मारा उपाध्यायना घरमां कोलाहलनुं कारण आ श्रीषेण छे, एम हुं मानुं छुं. ॥ १९ ॥

संसारे स्खलितं कस्य न स्यान्मतिमतोऽपि वा। किं तु मे मित्रमाबाल्यात्तन्न युक्तमुपेक्षितुम् ॥२०॥

अन्वयः-वा संसारे कस्य मतिमतः अपि स्खलितं न स्यात्? किंतु मे आबाल्यात् मित्रं, तत् उपेक्षितुं युक्तं न. ॥ २० ॥

अर्थः—अथवा ( आ ) संसारमां कया बुद्धिमाननी पण भूल नथी थती? परंतु (आ श्रीषेण) मारो बालपणाथी मित्र छे, माटे ( आ समये ) तेमाटे मारे बेदरकार रहेवुं ठीक नही. ॥ २० ॥

दृष्ट्वा मां त्वस्य लज्जा स्याद्बाधाकृद्बन्धनादपि। इति निश्चित्य कृत्यार्थं प्रकृत्या निभृतोपकृत् ॥ २१ ॥

अन्वयः-मां दृष्ट्वा तु बाधाकृत् बंधनात् अपि अस्य लज्जा स्यात्, इति कृत्यार्थं निश्चित्य, प्रकृत्या निभृत उपकृत्. ॥२१॥

अर्थः-मने जोइने तो (आ) दुःखदाइ बंधनथी पण तेने लज्जा थशे, एम योग्यतापूर्वक कार्य करवानो निश्चय करीने स्वभावथीज अति उपकार करनारा. ॥ २१ ॥

आरक्षकाणामात्मानं ज्ञापयित्वैष सत्वरम् । श्रीषेणं मोचयांचक्रे तारापीडः स्वपीडया ॥ २२ ॥

अन्वयः—एषः तारापीडः स्व पीडया आरक्षकाणां आत्मानं ज्ञापयित्वा सत्वरं श्रीषेणं मोचयां चक्रे ॥ २२ ॥

अर्थः—ते तारापीड राजाए पोताने थतां दुःखथी पोलीसना माणसोने पोतानी खबर आपीने तुरत श्रीषेणने छोडाव्यो ।२२।

वपुःप्रमाणात्प्रच्छन्नोपकृतिप्रकृतित्वतः । स्वस्य द्राग्बन्धमोक्षाच्च नृपस्तेनोपलक्षितः ॥ २३ ॥

अन्वयः—वपुः प्रमाणात्, प्रच्छन्न उपकृति प्रकृतित्वतः, च स्वस्य द्राग् बंधमोक्षात् तेन नृपः उपलक्षितः ॥ २३ ॥

अर्थः—शरीरना प्रमाणथी, गुप्तरीते उपकार करवाना स्वभावथी, अने पोते तुरत बंधनमांथी छूटवाथी ते श्रीषेणे राजाने ओळखी कहाड्यो. ॥ २३ ॥

ततो दर्शयितुं स्वास्यमशक्तः सैष लज्जया । राज्ञादिष्टैर्भटैर्दूरादावृतः स्वगृहेऽगमत् ॥ २४ ॥

अन्वयः—ततः लज्जया स्व आस्यं दर्शयितुं अशक्तः सः एषः राज्ञा आदिष्टैः भटैः दूरात् आवृतः स्वगृहे अगमत्. ॥ २४ ॥

अर्थः—पछी लज्जाथी पोतानुं मुख देखाडवाने अशक्त एवो ते श्रीषेण राजाए हुकम करेला ते सुभटोवडे दूरथी वींटायो थको पोताने घेर गयो. ॥ २४ ॥

धौताङ्गः स प्रगे तत्रोपवनेऽस्थाल्लतागृहे । आरामपालकेभ्यश्च वाचं शुश्राव दुःश्रवाम् ॥ २५ ॥

अन्वयः—धौतांगः सः प्रगे तत्र उपवने लतागृहे अस्थात्, च आराम पालकेभ्यः दुःश्रवां वाचं शुश्राव. ॥ २५ ॥
अर्थः–शरीर साफ करीने ते श्रीषेण प्रभाते ते बगीचामां वेलडीओना मंडपमां जइने बेठो, तथा ते बगीचाना रक्षको पासेथी ( नीचे जणाव्या मुजब ) न संभळाय एवी वाणी सांभळवा लाग्यो. ॥ २५ ॥

अद्य रोहितया रात्रौ पत्युर्निद्राजुषः श्रमात् । गलं छेत्तुं समुत्क्षिप्तः क्षुरिकादुर्धरः करः ॥ २६ ॥

अन्वयः–अद्य रात्रौ रोहितया श्रमात् निद्राजुषः पत्युः गलं छेत्तुं क्षुरिका दुर्धरः करः समुत्क्षिप्तः ॥ २६ ॥
अर्थः—आजे रात्रिए रोहिताए थाकीने निद्रावश थयेला एवा पोताना स्वामीनुं गलुं कापवामाटे पकडेली छरीवाळो (पोतानो) हाथ उगाम्यो. ॥ २६ ॥

तदाभूत्क्षुरिकास्तम्भस्तारकः सहसोत्थितः । रोहिता हृद्धरे ( रैः ) बद्धा बन्धनै रज्जुवर्जितैः ॥ २७ ॥

अन्वयः–तदा क्षुरिका स्तंभः अभूत्, तारकः सहसा उत्थितः, रोहिता रज्जुवर्जितैः हृद्धरैः बंधनैः बद्धा. ॥ २७ ॥
अर्थः—ते वखते ते छरी थंभाइ गइ, अने तारक ( पण ) एकदम जागी उठ्यो, अने रोहिता पण दोरडांविनाना छाती भराइ जाय एवां बंधनोवडे बंधाइ गइ. ॥ २७ ॥

अदृष्टैः सा हता घातैरारराट तथा कटु । यथास्य पत्तयोऽन्ये च दधावुस्तुमुलाकुलाः ॥ २८ ॥

अन्वयः–अदृष्टैः घातैः हता सा तथा कटु आरराट, यथा अस्य पत्तयः च अन्ये तुमुल आकुलाः दधावुः. ॥ २८ ॥

अर्थः—वळी अदृश्य मार पडवाथी ते एटली तो बूमो पाडवा लागी के, जेथी तेना नोकरो तथा बीजा माणसो पण बूमो पाडता (त्यां) दोडी आव्या. ॥ २८ ॥

**कुतोऽप्यागाद्धराधीशः स्वोपाध्यायममत्वतः । स क्षणाद्धूपमुत्क्षिप्य नम्रस्तामित्यभाषत ॥ २९ ॥**

अन्वयः—कुतः अपि धराधीशः आगात्, स्व उपाध्याय ममत्वतः सः नम्रः क्षणात् धूपं उत्क्षिप्य तां इति अभाषत. ॥२९॥

अर्थः—(एवामां) क्यांकथी राजा (पण त्यां ) आवी पहोंच्यो, तथा पोताना उपाध्यायनी ममताथी ते नम्र थइ, धूप करीने तेणीने आरीते कहेवा लाग्यो के, ॥ २९ ॥

**महाप्रभावे कासि त्वं तत्त्वं देवि ममादिश । स्त्रीमात्रेऽत्र कृपापात्रे किममर्षः प्रकर्षितः ॥ ३० ॥**

अन्वयः—हे महाप्रभावे! त्वं का असि? (हे) देवि! मम आदिश? अत्र कृपा पात्रे स्त्रीमात्रे अमर्षः किं प्रकर्षितः? ॥ ३० ॥

अर्थः—हे महान् प्रभाववाळी तुं कोण छे? तथा (हे) देवि! मने (आ) हकीकत जणावो? आ दया करवालायक रांकडी स्त्रीपर तमोए केम कोप कर्यो छे? ३० ॥

**एताभिर्भक्तिभाषाभिस्त्यक्त्वा स्तोकतरां रुषम् । नभःप्रभवया वाण्या बभाषे देवता नृपम् ॥३१॥**

अन्वयः—एताभिः भक्तिभाषाभिः स्तोकतरां रुषं त्यक्त्वा देवता नभः प्रभवया वाण्या नृपं बभाषे ॥ ३१ ॥

अर्थः—ए रीतना भक्तिवाळां वचनोथी जरा रोषने तजीने ते देवी आकाशवाणीवडे राजाने कहेवा लागी के, ॥ ३१ ॥

सम्यग्दृष्टिरहं देवो भक्ता सर्वज्ञशासने । धर्मकर्मप्रवृत्तानां सतां विघ्नान्निवारये ॥ ३२ ॥
तत्त्वज्ञं दृढसम्यक्त्वं परदारपराङ्मुखम् । स्वपतिं निघ्नती क्रूरा मया बद्धेयमस्ति तत् ॥ ३३ ॥युग्मम्॥

अन्वयः—अहं सर्वज्ञ शासने भक्ता सम्यग्दृष्टिः देवी, धर्म कर्म प्रवृत्तानां सतां विघ्नान् निवारये, ॥ ३२ ॥ तत् तत्त्वज्ञं, दृढ सम्यक्त्वं, परदार पराङ्मुखं स्वपतिं निघ्नती इयं क्रूरा मया बद्धा अस्ति. ॥ ३३ ॥ युग्मं ॥

अर्थः—हुं श्रीजैनशासनमां भक्तिवाळी सम्यग्दृष्टी देवी छुं, अने धर्मकार्यो करनारा सज्जनोनां विघ्नो नुं निवारण करुं छुं, ॥३२॥ अने तेथी तत्वना जाणकार, दृढ समकीती, तथा परस्त्रीनो त्याग करनारा, एवा पोताना पतिने मारती, एवी आ क्रूर स्त्रीने में बांधेली छे. ॥ ३३ ॥ युग्मं ॥

किमसौ स्वपतिं हन्तीत्युक्ता राज्ञाह देवता । तमेव रमणं कर्तुं यो बद्धो मोचितस्त्वया ॥ ३४ ॥

अन्वयः—असौ स्वपतिं किं हंति ? इति राज्ञा उक्ता देवता आह, बद्धः यः त्वया मोचितः तं एव रमणं कर्तुं. ॥ ४३ ॥

अर्थः—आ स्त्री पोताना स्वामीने शामाटे मारे छे? एम राजाए कहेवाथी ते देवी बोली के, बांधेला जे पुरुषने तें छोडाव्यो, तेनीज साथे विलास करवा माटे. ॥ ३४ ॥

सर्वज्ञाज्ञास्ति तेऽमुष्य भाषसे यदि दूषणम् । प्रकाशयसि नामापि राज्ञा देवीति वारिता ॥ ३५ ॥

अन्वयः-अमुष्य यदि दूषणं भाषसे, नाम अपि प्रकाशयसि, ते सर्वज्ञ आज्ञा अस्ति, इति राज्ञा देवी वारिता. ॥ ३५ ॥

अर्थः—ते पुरुषनुं जो तुं दूषण बोलीश, अने नाम पण प्रकट करीश, तो तने सर्वज्ञ प्रभुनी आणा छे, एम कही राजाए ते देवीने तेम करतां अटकावी. ॥ ३५ ॥

**किं तूक्ता तारकेणासौ सकृपेण नृपेण च । देव्युद्बध्नाति नाद्यापि रोहितां रमणाहिताम् ॥ ३६ ॥**

अन्वयः—सकृपेण तारकेण च नृपेण उक्ता, किंतु असौ देवी रमण अहितां रोहितां अद्य अपि न उद्‌बध्नाति. ॥ ३६ ॥

अर्थः—( पछी ) ते दयाळु तारके अने राजाए कहेवा छतां पण ते देवीए ( पोताना) भर्तारनुं अहित करनारी ते रोहिताने हजु पण बंधनरहित करी नथी. ॥ ३६ ॥

**एवमाकर्ण्य कर्णेषु तप्तत्रपुसमं वचः । श्रीषेणश्चिन्तयांचक्रे बलाद्वैराग्यसंगमः ॥ ३७ ॥**

अन्वयः—एवं कर्णेषु तप्त त्रपु समं वचः आकर्ण्य बलात् वैराग्य संगमः श्रीषेणः चिंतयांचक्रे. ॥ ३७ ॥

अर्थः—एरीते श्रवणोमां तपेला सीसासरखुं वचन सांभळीने पराणे वैराग्य पामेलो ते श्रीषेण विचारवा लाग्यो के, ॥ ३७ ॥

**मन्येऽस्मिन्नेव संजाते तुमुले मलसंकुलः । क्षालतः क्षणतः क्षिप्तस्तया बहिरहं तदा ॥ ३८ ॥**

अन्वयः—अस्मिन् एव तुमुले संजाते तदा तया मलसंकुलः अहं क्षणतः क्षालतः बहिः क्षिप्तः मन्ये ॥ ३८ ॥

अर्थः—आ कोलाहल थवाथीज ते वखते ते कुटणीए मेलथी खरडाएला एवा मने तुरतज खाळमांथी कहाडीने बहार मेल्यो, एम हुं मानुं छुं. ॥ ३८ ॥

दुराचारद्रुमारामवनीरेता नितम्बिनीः । दुर्मेधाः किं व्यधाद्वेधाश्चिन्ता वासौ वृथा मम ॥ ३९ ॥

अन्वयः–दुर्मेधाः वेधाः दुराचार द्रुम आराम वनीः एताः नितंबिनीः किं व्यधात् ? वा मम असौ चिंता वृथा. ॥ ३९ ॥

अर्थः—दुर्बुद्धि विधाताए दुराचारोरूपी वृक्षोना बगीचानी वनभुमिसरखी आ स्त्रीओने शामाटे बनावी होशे ? अथवा मारे आवी चिंता करवी नकामी छे. ॥ ३९ ॥

नार्यः कुकार्यकर्तृत्वान्निन्द्याश्चेत्तत्पुमानपि । महानिन्द्योऽस्मि दुःकर्ममूलदुःशीलभाग् यतः ॥ ४० ॥

अन्वयः–कुकार्यकर्तृत्वात् नार्यः चेत् निंद्याः, तत् पुमान् अपि महानिंद्यः अस्मि, यतः दुःकर्म मूल दुःशीलभाग्. ॥ ४० ॥

अर्थः–दुष्कार्य करवाथी स्त्रीओ जो निंदाने पात्र छे, तो हुं पुरुष पण अतिनिंदाने पात्र छुं, केमके हुं आ दुष्कार्यना मूलरूप दूराचारवाळो छुं. ॥ ४० ॥

मम धिग्मानुषं जन्म कुलं येन कलङ्कितम् । सावद्या सापि विद्याभूत्पापे मय्यपि या स्थिता ॥ ४१ ॥

अन्वयः–मम मानुषं जन्म धिक्, येन कुलं कलंकितं, या मयि पापे स्थिता, सा विद्या अपि सावद्या अभूत्. ॥ ४१ ॥

अर्थः–मारा मनुष्यजन्मने धिक्कार छे, के जेणे कुलने कलंकित कर्युं, वळी पापी एवो जे हुं, तेमां रहेली ते विद्या पण पापना दूषणवाळी थइ. ॥ ४१ ॥

क्षितौ जितेन्द्रियत्वं हि मूलं गुणलताततेः । कुशीलत्वकुशीघातैर्मयोत्क्षिप्तं तदद्य हा ॥ ४२ ॥

अन्वयः–क्षितौ हि जितेंद्रियत्वं गुण लता ततेः मूलं, तत् अद्य हा मया कुशीलत्व कुशी घातैः उत्क्षिप्तं. ॥ ४२ ॥

अर्थः––आ पृथ्वीपर खरेखर जितेंद्रियपणुं गुणोरूपी वल्लीओनी श्रेणिना मूलसरखुं छे, ते मूळने आजे अरेरे ! में दुराचाररूपी कोशना प्रहारोवडे उखेडी नाख्युं ! ॥ ४२ ॥

मामकृत्यमतिं मत्वा त्रस्ता सापि त्रपा तदा । तिष्ठेदविरलं किं वा वारला पङ्किले जले ॥ ४३ ॥

अन्वयः—तदा मां अकृत्य मतिं मत्वा सा त्रपा अपि त्रस्ता, वा वारला पंकिले जले किं अविरलं तिष्ठेत्? ॥ ४३ ॥

अर्थः—ते समये मने अकार्यनी बुद्धिवाळो जाणीने ( मारी ) ते लज्जा पण नाशी गइ, अथवा हंसी कादवयुक्त जलमां शुं निरंतर रहे छे? ॥ ४३ ॥

स्तुत्यः स सत्यमित्रत्वपात्रं क्षत्रशिरोमणिः । तारापीडोऽखिलां पीडां जह्रे यो ह्रीकरीं मम ॥ ४४ ॥

अन्वयः—सत्य मित्रत्व पात्रं, क्षत्र शिरोमणिः सः तारापीडः स्तुत्यः, यः मम ह्रीकरीं अखिलां पीडां जह्रे. ॥ ४४ ॥

अर्थः-खरी मित्राइना पात्रसरखो, तथा क्षत्रीओमां मुकुटसमान ते तारापीड राजा प्रशंसाने पात्र छे, के जेणे मारी लजावनारी सर्व पीडा दूर करी. ॥ ४४ ॥

अश्रोतव्यचरित्रोऽहमपावित्र्यधनोऽधुना । स्वमुखं दर्शयिष्यामि कथं तस्योपकारिणः ॥ ४५ ॥

अन्वयः—अश्रोतव्य चरित्रः, अपावित्र्य धनः अहं अधुना तस्य उपकारिणः स्वमुखं कथं दर्शयिष्यामि ? ॥ ४५ ॥

अर्थः—न सांभळवा लायक आचरणवाळो, तथा मलीनतारूपी धनवाळो, एवो हुं हवे ते उपकारी मित्रने मारुं मुख शी रीते बतावी शकीश ? ॥ ४५ ॥

धन्यास्ते ये स्मिताम्लानमानमाल्यधरा नराः । स्वकीर्तिमुक्ताभरणैर्विभुष्य भुवनान्ययुः ॥ ४६ ॥

अन्वयः-ये नराः स्मित अम्लान मान माल्य धराः स्व कीर्ति मुक्ता आभरणैः भुवनानि विभुष्य अयुः, ते धन्याः. ॥ ४६ ॥

अर्थः—जे पुरुषो विकस्वर थयेली तथा नही करमायेली एवी सन्मानरूपी पुष्पमालाने धारण करीने, तथा पोतानी कीर्तिरूपी मोतीना आभूषणोवडे त्रणे भुवनोने शणगारीने चाल्या गया छे, तेओने धन्य छे. ॥ ४६ ॥

इत्थं चिन्तयतोऽत्यर्थं तस्य संविग्नचेतसः । तारकौकःप्रदेशेऽभूज्जयकोलाहलोऽम्बरे ॥ ४७ ॥

अन्वयः-इत्थं अत्यर्थं चिंतयतः, संविग्न चेतसः तस्य, तारक ओकः प्रदेशे अंबरे जय कोलाहलः अभूत्. ॥ ४७ ॥

अर्थः-एम अत्यंत विचारतो, तथा वैराग्ययुक्त मनवाळो ते होते छते, ते तारक उपाध्यायना घरनी आसपास आकाशमां जय-जय शब्दोनो कोलाहल थयो. ॥ ४७ ॥

तमाकर्ण्यं स ऊर्ध्वास्यो यावत्तिष्ठति विस्मितः । तावदाभाष्यतागत्य कात्यायन्या विरक्तया ॥ ४८ ॥

अन्वयः-तं आकर्ण्य विस्मितः सः यावत् ऊर्ध्वास्यः तिष्ठति, तावत् विरक्तया कात्यायन्या आगत्य आभाष्यत. ॥ ४८ ॥

अर्थः—ते सांभळीने आश्चर्य पामेलो ते श्रीषेण जेवामां उंचु मुख करीने उभो छे, तेवामां विरक्त थयेली ते कुटणीए ( त्यां ) आवीने (तेने) कह्युं के, ॥ ४८ ॥

मया वत्स स्ववत्साया वात्सल्यान्मूढचेतसा । ह्यस्तनेऽहनि सद्बुद्धिधिक्कृतं दुःकृतं कृतम् ॥ ४९ ॥

अन्वयः-( हे ) वत्स ! स्व वत्सायाः वात्सल्यात् मूढ चेतसा मया ह्यस्तने अहनि सुद्बुद्धि धिक्कृतं दुःकृतं कृतं. ॥ ४९ ॥

अर्थः-( हे ) वत्स ! मारी पुत्रीना प्रेमथी मूढ हृदयवाळी एवी जे हुं, तेणीए गइ काले सद्बुद्धिवाळा लोकोने तिरस्कार करवा लायक दुष्कार्य कर्युं छे. ॥ ४९ ॥

तत्त्वदीयमहाकष्टैः स्वपुत्र्या दुष्टचेष्टितैः । अनुभूतमिदं दुःखं सद्योऽवद्यफलं मया ॥ ५० ॥

अन्वयः-तत् त्वदीय महाकष्टैः, स्वपुत्र्याः दुष्ट चेष्टितैः मया सद्यः अवद्यफलं इदं दुःखं अनुभूतं. ॥ ५० ॥

अर्थः-अने तेथी तने महाकष्टमां नाखीने, तथा मारी पुत्रीना दुराचरणोथी में पापना तुरतफलरूपी आ दुःख अनुभव्युं छे.

त्वत्कृते यत्तया पत्युरहितं विहितं निशि । तल्लोकज्ञातमप्यत्र मम वक्तुं न युज्यते ॥ ५१ ॥

अन्वयः—त्वत्कृते तया निशि पत्युः यत् अहितं विहितं, तत् लोक ज्ञातं अपि, अत्र मम वक्तुं न युज्यते. ॥ ५१ ॥
अर्थः—तारे माटे तेणीए रात्रीसमये ( पोताना ) स्वामीनुं जे बुरुं कर्युं छे, ते जोके लोकोमां प्रसिद्ध थयुं छे, तो पण अहीं मारे ते कहेवुं लायक नथी. ॥ ५१ ॥

**तन्निःशेषं श्रुतं मातः प्रातरुद्यानपालतः । कस्त्वयं तद्गृहोद्देशगगने मङ्गलध्वनिः ॥ ५२ ॥**

अन्वयः—(हे मातः ! तत् निःशेषं प्रातः उद्यानपालतः श्रुतं, तु तद् गृहोद्देश गगने मंगलध्वनिः कः? ॥ ५२ ॥
अर्थः—हे माताजी ! ते सघळुं प्रभातमां (में) आ उद्यानपालपासेथी सांभळ्युं छे, परंतु तेना घरनी आसपास आकाशमां (आ) मंगलीक शब्द शानो संभळाय छे? ॥ ५२ ॥

**इति श्रीषेणपृष्टेयमाचष्टे स्म सविस्मया । इदं वत्स स्वधर्मस्य स्वल्पस्यापि फलं शृणु ॥ ५३ ॥ युग्मम् ॥**

अन्वयः-इति श्रीषेणपृष्टा सविस्मया इयं आचष्टेस्म, ( हे ) वत्स! स्वल्पस्य अपि स्वधर्मस्य इदं फलं शृणु? ॥ ५३ ॥
अर्थः—एरीते श्रीषेणे पूछवाथी आश्चर्य पामेली ते कुटणी कहेवा लागी के, हे वत्स! पोताना स्वल्प धर्मनुं पण आ फल (तुं) सांभळ? ॥ ५३ ॥ युग्मं ॥

**सकृपेण नृपेणापि प्रोक्ता शासनदेवता । बद्धक्रोधा विधत्ते न मत्पुत्र्या बन्धमोक्षणम् ॥ ५४ ॥**

अन्वयः—सकृपेण नृपेण प्रोक्ता अपि बद्ध क्रोधा शासन देवता मत्पुत्र्याः बंध मोक्षणं न विधत्ते. ॥ ५४ ॥

अर्थः—ते दयाळु राजाए कह्या छतां पण क्रोध न तजती एवी ते शासनदेवीए मारी ते पुत्रीने बंधनथी छूटी करी नही. ५४

**पृथ्वीनाथोऽप्यथ व्यर्थाभ्यर्थनः सव्यथो हृदि । ययावस्तोकलोकेन स्वमोकः शोकसंकुलः ॥ ५५ ॥**

अन्वयः-अथ व्यर्थ अभ्यर्थनः हृदि सव्यथः पृथ्वीनाथः अपि शोकसंकुलः अस्तोक लोकेन स्वं ओकः ययौ. ॥ ५५ ॥

अर्थः—पछी फोकट गयेली प्रार्थनावाळो, तथा हृदयमां खेद पामेलो ते राजा पण दिलगिर थयोथको सर्व लोको सहित पोताने घेर गयो. ॥ ५५ ॥

**संप्रत्यकस्मादस्माकं सुकृतैः प्रेरितं गृहे । साध्वीयुगलमध्वेक्षादक्षं भिक्षाकृतेऽविशत् ॥ ५६ ॥**

अन्वयः-संप्रति अकस्मात् अस्माकं सुकृतैः प्रेरितं, अध्व ईक्षा दक्षं साध्वी युगलं भिक्षाकृते गृहे अविशत् ॥ ५६ ॥

अर्थः-एवामां अमारां पुण्योवडे प्रेरायेलुं, तथा मार्ग जोवामां चतुर (ईर्यासमिति पाळतुं) एवुं साध्वीओनुं जोडुं भिक्षामाटे घरमां दाखल थयुं. ॥ ५६ ॥

**दृष्ट्वा तदुच्चरोमाञ्चकञ्चुका साश्रुलोचना । बन्धनाभावतोऽकुण्ठा भूमिपीठे लुठन्त्यसौ ॥ ५७ ॥**

**शरणं मे त्वदीयौ स्तश्चरणाविति वादिनी । अनमच्च सुता साध्वीमभवच्चाम्बरे वचः ॥ ५८ ॥ युग्मम्॥**

अन्वयः—तद् दृष्ट्वा उच्च रोमांच कंचुका, साश्रुलोचना बंधन अभावतः अकुंठा, भूमिपीठे लुठंती असौ सुता, मे त्वदीयौ

चरणौ शरणं स्त', इति वादिनी साध्वीं अनमत्, च अंबरे वचः अभवत्. ॥ ५७ ॥ ५८ ॥ युग्मं ॥

अर्थः-तेमने जोइने उभां थयेलां रोमांचरूपी कंचुकवाळी, अश्रुओ सहित आंखोवाळी, तथा बंधनरहित थवाथी अटकाव विना पृथ्वीतलपर लोटती, एवी ते (मारी) पुत्री, मने आपना चरणोनुं शरण छे, एम बोलती थकी ते साध्वीने नमी, अने (तेजसमये) आकाशमां वाणी थवा लागी के, ॥ ५७ ॥ ५८ ॥युग्मं ॥

शुद्धा श्रद्धा त्वया दध्रे साध्वीं नन्तुं मुदा यदा । तदैव दैवता बन्धाः संहृता रोहिते मया ॥ ५९ ॥

यत्त्वया सुव्रताख्येयमजिह्मब्रह्मचारिणी । साध्वी नता पवित्रासि तत्त्वं साधर्मिका मम ॥ ६० ॥

इत्युदीर्य चिरं वर्यतूर्यध्वानेन मिश्रितम् । जयकोलाहलं कृत्वा तिरोधत्ते स्म देवता ॥६१॥त्रिभिर्विशेष.

अन्वयः—हे रोहिते! यदा त्वया साध्वीं नंतुं मुदा शुद्धा श्रद्धा दध्रे, तदैव मया दैवताः बंधाः संहृताः. ॥ ५९ ॥यत् त्वया अजिह्म ब्रह्मचारिणी इयं सुव्रताख्या साध्वी न ता तत् पवित्रा त्वं मम साधर्मिका असि, ॥ ६० ॥ इति उदीर्य वर्य तूर्य ध्वानेन मिश्रितं जय कोलाहलं चिरं कृत्वा देवता तिरोधत्तेस्म. ॥ ६१ ॥ त्रिभिर्विशेषकं ॥

अर्थः—(हे) रोहिते! ज्यारे तें साध्वीने नमवा माटे हर्षथी निर्मल श्रद्धाने धारण करी त्यारेज में तारां दिव्यबंधनो संहरी लीधां छे, ॥ ५९ ॥ (वळी) जे तें अखंडित ब्रह्मचर्य धरनारी आ सुव्रता नामनी साध्वीने वांदी, तेथी पवित्र थयेली तुं मारी साधर्मिक थइ छो. ॥ ६० ॥ एम कही उत्तम वाजित्रोना नाद सहित घणा काळसुधी जयजयारव करीने ते शासनदेवी अदृश्य थइ.

अथात्मचरितोद्विग्नं व्रते तस्थौ मनो मम । वह्निना व्यथितः पाथस्यमृतः पारदो यथा ॥ ६२ ॥

अन्वयः—अथ वह्निना व्यथितः पारदः यथा पाथसि अमृतः, आत्मचरित उद्विग्नं मम मनः व्रते तस्थौ. ॥ ६२ ॥

अर्थः—पछी अग्निथी तपेलो पारो जेम जलमां अमृतरूप थाय छे, तेम मारां (दुष्ट) आचरणोथी उद्वेग पामेलुं मारु मन चारित्र (लेवामां) स्थिर थयुं छे. ॥ ६२ ॥

पापतापच्छिदे देहि देहिनो मे व्रतामृतम् । इत्थमभ्यर्थितात्यर्थं सुव्रता मामवीवदत् ॥ ६३ ॥

अन्वयः–देहिनो मे पाप ताप च्छिदे व्रत अमृतं देहि? इत्थं अत्यर्थं अभ्यर्थिता सुव्रता मां अवीवदत्. ॥ ६३ ॥

अर्थः–देहधारी एवी जे हुं, तेनां पापोरूपी तापने नाश करवा माटे ( तमो ) चारित्ररूपी अमृत आपो? एम घणीज प्रार्थना करवाथी ते सुव्रता साध्वीए ( मने ) कह्युं के, ॥ ६३ ॥

भाग्यवत्यसि भद्रे त्वं तत्त्वज्ञश्चेतनस्तव । कर्मद्रुमभिदे वज्रं ययाचे यत्त्वया व्रतम् ॥ ६४ ॥

अन्वयः–( हे ) भद्रे ! त्वं भाग्यवती असि, तव चेतनः तत्त्वज्ञः, यत् त्वया कर्म द्रुम भिदे वज्रं व्रतं ययाचे. ॥ ६४ ॥

अर्थः–हे भद्रे ! तुं भाग्यशाली छो, तथा तारो आत्मा तत्वोनो जाणकार छे, के जेथी तें कर्मोरूपी वृक्षोने तोडी पाडवा माटे वज्रसरखा चारित्रनी मागणी करी छे. ॥ ६४ ॥

किं तु मे गुरवः सन्ति श्रीशीलप्रभसूरयः । लीलोद्यानतटेऽभ्येत्य तदभ्यर्णे व्रतं भज ॥ ६५ ॥

अन्वयः–किं तु लीला उद्यान तटे मे श्रीशीलप्रभसूरयः गुरवः संति, अभ्येत्य तदभ्यर्णे व्रतं भज ? ॥ ६५ ॥

अर्थः—परंतु क्रीडा करवाना उद्यानपासे मारा श्रीशीलप्रभसूरि नामना गुरुमहाराज छे, (त्यां) आवी तेमनी पासे तुं चारित्र ले ?

इत्युक्ताहं तया हन्त तवान्तिकमिहागमम् । ममापराधः सोढव्योऽनुमन्यस्व व्रताय माम् ॥ ६६ ॥

अन्वयः–इति तया उक्ता अहं हंत इह तव अंतिकं आगमं, मम अपराधः सोढव्यः, मां व्रताय अनुमन्यस्व ? ॥ ६६ ॥

अर्थः—एम तेणीए कह्याथी अरेरे ! हुं अहीं तारी पासे आवी छुं, मारा अपराधनी क्षमा करवी, तथा मने चारित्र लेवामाटे तुं आज्ञा आप ? ॥ ६६ ॥

एवं निशम्य रम्यार्थं वचः सचिवसंभवः । दध्यावुत्तुङ्गवैराग्यतरङ्गच्छन्नमानसः ॥ ६७ ॥

अन्वयः–एवं रम्य अर्थं वचः निशम्य उत्तुंग वैराग्य तरंग च्छन्न मानसः सचिव संभवः दध्यौ. ॥ ६७ ॥

अर्थः—एरीते मनोहर भावार्थवाळुं वचन सांभळीने वैराग्यना मोजांओथी आच्छादित थयेलां हृदयवाळो ते मंत्रिपुत्र विचारवा लाग्यो के, ॥ ६७ ॥

अहह प्रहतज्ञानह्रीयशोभययामिकैः । विषयैर्मुषितं मेऽद्य तस्करैः सुकृतं धनम् ॥ ६८ ॥

अन्वयः—अहह ! प्रहत ज्ञान ह्री यशः भय यामिकैः विषयैः तस्करैः अद्य मे सुकृतं धनं मुषितं. ॥ ६८ ॥

अर्थः—अरेरे ! हणेला छे ज्ञान, लज्जा, यश तथा भयरूपी चोकीदारोने जेओए, एवा विषयोरूपी चोरोए आजे मारुं पुण्यरूपी द्रव्य लुंटी लीधुं छे. ॥ ६८ ॥

तानेव पुरुषान्मन्ये न येषां विषमेषुणा । स्त्रीविभ्रमेषुभिर्भित्वा चित्तं धृतिरगृह्यत ॥ ६९ ॥

अन्वयः-विषम इषुणा स्त्री विभ्रम इषुभिः चित्तं भित्वा येषां धृतिः न अगृह्यत, तान् एव पुरुषान् मन्ये. ॥ ६९ ॥

अर्थः-कामदेवे स्त्रीना विलासरूपी बाणोवडे हृदयने भेदीने जेओनुं धैर्य लुंटी लीधुं नथी, तेओनेज (खरेखरा) पुरुषो हुं मानुं छुं.

सुव्रताया व्रतस्याहो माहात्म्यमभवत्कियत् । यदेवं मुदिता देवी वितनोति प्रभावनाम् ॥ ७० ॥

अन्वयः-अहो ! सुव्रतायाः व्रतस्य कियत् माहात्म्यं अभवत् ! यत् एवं मुदिता देवी प्रभावनां वितनोति. ॥ ७० ॥

अर्थः-अहो ! (ते) सुव्रतासाध्वीना व्रतनुं केटलुं माहात्म्य (प्रगट) थयुं ! के आवी रीते खुशी थयेली देवीए (जेणीनी) प्रभावना करी.

ततः स्वस्य व्रतिन्याश्चाब्रह्मणो ब्रह्मणोऽन्तरम् । विज्ञाय स्यान्ममादातुं साम्प्रतं साम्प्रतं व्रतम् ॥७१॥

अन्वयः-ततः स्वस्य अब्रह्मणः च व्रतिन्याः ब्रह्मणः अंतरं विज्ञाय सांप्रतं मम व्रतं आदातुं सांप्रतं स्यात्. ॥ ७१ ॥

अर्थः—तेथी मारां लंपटपणा अने ते साध्वीना ब्रह्मचर्यवचेनुं अंतर जाणीने हवे तो मारे चारित्र लेवुं योग्य छे. ॥ ७१ ॥

किं चैतत्कुर्वतः स्यान्मे मुखच्छविरिहोज्ज्वला । अमुत्र च भवे भद्रं भूरिभाग्यभवं भवेत् ॥ ७२ ॥

अन्वयः—किं च एतत् कुर्वतः इह मे मुखच्छविः उज्ज्वला स्यात्, च अमुत्र भवे भूरि भाग्य भत्रं भद्रं भवेत्. ॥ ७२ ॥

अर्थः—वळी तेम कर्याथी आ लोकमां मारा मुखनी कांति उज्ज्वल रहेशे, तथा परभवमां (पण) घणां भाग्योनी उत्पत्तिवाळुं (मारुं) कल्याण थशे. ॥ ७२ ॥

**एवं चित्ते स निश्चित्य कृत्यं कात्यायनीं जगौ । स्वाभिप्रायं वदन्त्याम्ब त्वयाहं साधु बोधितः ॥ ७३ ॥**

अन्वयः—एवं कृत्यं चित्ते निश्चित्य सः कात्यायनीं जगौ, (हे) अंब! स्वअभिप्रायं वदंत्या त्वया अहं साधु बोधितः.॥७३॥

अर्थः—एवीरीतना कार्यमाटेनो मनमां निश्चय करीने ते श्रीषेणे ते कुटणीने कह्युं के, हे माताजी! आपनो आशय जणावीने आपे मने ठीक प्रतिबोध आप्यो. ॥ ७३ ॥

**ममाकृत्यकृतः कर्मोन्मूलने मूढचेतसः । उपायं ज्ञापयांचक्रे भवती भवतीरदम् ॥ ७४ ॥**

अन्वयः—अकृत्य कृतः, मूढ चेतसः मम कर्म उन्मूलने भव तीरदं उपायं भवती ज्ञापयां चक्रे. ॥

अर्थः—दुष्कार्य करनारो तथा मूढ हृदयवाळो एवो जे हुं, तेनां कर्मोने उखेडी नाखवा माटे, संसारसागरनो पार आपनारो उपाय तमोए मने सूचव्यो छे. ॥ ७४ ॥

**आत्मा प्रमादपर्यङ्के शयानो मोहनिद्रया । कथं जागर्ति चेन्न स्यादुपदेशस्वरः पुरः ॥ ७५ ॥**

अन्वयः—चेत् पुरः उपदेश स्वरः न स्यात्, प्रमाद पर्यंके मोह निद्रया शयानः आत्मा कथं जागर्ति ? ॥ ७५ ॥

अर्थः—जो (आपणी) आगळ उपदेशनो अवाज न थाय, तो प्रमादरूपी पलंगपर मोहनिद्रामां सूतेलो आत्मा क्यांथी जागे?

ततः श्राद्धे त्वया सार्धं श्रद्धया गुरुसंनिधौ । ध्वंसाय स्वापराधस्य ग्रहीष्ये व्रतमार्हतम् ॥ ७६ ॥

अन्वयः—ततः (हे) श्राद्धे! स्व अपराधस्य ध्वंसाय श्रद्धया त्वया सार्धं गुरुसंनिधौ आर्हतं व्रतं ग्रहीष्ये. ॥ ७६ ॥

अर्थः–तेथी (हे) श्राविका! मारा अपराधना नाशमाटे श्रद्धाथी तारीसाथेज गुरुमहाराजपासे (हुं पण) जैन चारित्र ग्रहण करीश.

इति प्रतिज्ञां कृत्वा सोऽग्रतस्तस्या व्रतस्पृहः । आपृच्छयातुच्छविच्छेदकातरौ पितरौ बलात् ॥ ७७ ॥

वन्द्यमानन्द्य तत्त्वज्ञं क्षत्रं मित्रमकृत्रिमम् । संबोध्य बान्धवान्कृत्वा कृतार्थानर्थिनो जनान् ॥ ७८ ॥

परिवारपरित्यागं कृत्वा कात्यायनीयुतः । श्रीशीलप्रभसूरीणां संनिधौ व्रतमाददे ॥७९॥ त्रिभिर्विशेषकं.

अन्वयः—इति तस्याः अग्रतः प्रतिज्ञां कृत्वा व्रतस्पृहः सः अतुच्छ विच्छेद कातरौ पितरौ बलात् आपृच्छय, ॥७७॥ वंद्यं, तत्त्वज्ञं, अकृत्रिमं क्षत्रं मित्रं आनंद्य, बांधवान् संबोध्य, अर्थिनः जनान् कृतार्थन् कृत्वा, ॥ ७८ ॥ परिवार परित्यागं कृत्वा, कात्यायनीयुतः श्रीशीलप्रभसूरीणां संनिधौ व्रत आददे. ॥ ७९ ॥ त्रिभिर्विशेषकं ॥

अर्थः—एरीते तेणीनी समक्ष प्रतिज्ञा लेइने, चारित्र लेवानी इच्छावाळा एवा ते श्रीषेणे, अतिविरह थवाने लीधे खेद पामता (पोताना) मातापितानी मुश्केलीथी आज्ञा मेळवीने, ॥ ७७ ॥ तथा नमवालायक, तत्त्वोना जाणकार, अने अंतःकरणथी मित्राइ राखनारा एवा ते क्षत्रीयराजाने खुशी करीने, तथा स्वजनोने समजावीने, अने याचक लोकोने पण (दानथी) कृतार्थ करीने,

॥ ७८ ॥ परिवारनो त्याग करी ते कुटणीनी साथे श्रीशीलप्रभआचार्यपासे चारित्र लीधुं. ॥ ७९ ॥ त्रिभिर्विशेषकं ॥

विहरन्गुरुभिः सार्धं श्रीषेणः कर्मशोषणः । तपांसि तन्वन्सिद्धान्तं शुद्धान्तःकरणोऽपठत् ॥ ८० ॥

अन्वयः-तपांसि तन्वन् कर्मशोषणः श्रीषेणः गुरुभिः सार्धं विहरन् शुद्ध अंतःकरणः सिद्धांतं अपठत्. ॥ ८० ॥

अर्थः-(पछी) तप तपी कर्मोने खपावनारा ते श्रीषेणमुनि गुरुसाथे विचरताथका निर्मल हृदयथी आगमोनो अभ्यास करवा लाग्या.

काले कियत्यपि क्रान्ते गुर्वादेशमवाप्य सः । इहैव स्थण्डिले तस्थौ शुद्धध्यानरतिर्यतिः ॥ ८१ ॥

अन्वयः-कियति अपि काले क्रांते गुरु आदेशं अवाप्य शुद्ध ध्यान रतिः सः यतिः इह एव स्थंडिले तस्थौ. ॥ ८१ ॥

अर्थः—केटलोक समय वीत्याबाद गुरुमहाराजनी आज्ञा मेळवीने निर्मल ध्यानमां लीन थइने ते श्रीषेणमुनि अहींज शुद्ध भूमिपर स्थिर रह्या. ॥ ८१ ॥

दृष्टब्रह्मानुभावापि रोहितातुच्छमोहिता । श्रीषेणे नात्यजत्कामं स्नेहबन्धो हि दुस्त्यजः ॥ ८२ ॥

अन्वयः-दृष्ट ब्रह्म अनुभावा अपि श्रीषेणे अतुच्छमोहिता रोहिता कामं न अत्यजत्, हि स्नेहबंधः दुस्त्यजः. ॥ ८२ ॥

अर्थः—ब्रह्मचर्यनो प्रभाव जोवा छतां पण श्रीषेणप्रते अति मोहित थयेली रोहिताए कामवासना तजी नही, केमके स्नेहनुं बंधन तजवुं मुश्केल छे. ॥ ८२ ॥

पत्युरावर्जनायासौ तन्वती गृहिणां व्रतम् । अक्षीणरागा क्षीणाङ्गी मृत्वाभूद्व्यन्तरी वरा ॥ ८३ ॥

अन्वयः–पत्युः आवर्जनाय गृहिणां व्रतं तन्वती असौ, अक्षीण रागा, क्षीण अंगी मृत्वा वरा व्यंतरी अभूत्. ॥ ८३ ॥
अर्थः—( पोताना ) स्वामीने खुशी करवामाटे गृहस्थीनुं व्रत पाळती एवी ते रोहिता ( श्रीषेणपरनो ) मोह न तजवाथी दुर्बळ थइ थकी मरण पामीने उत्तम व्यंतरी थइ. ॥ ८३ ॥

अवधिज्ञानतो ज्ञात्वा तं मुनिं स्थानकेऽत्र सा । आगमत्प्राग्भवप्रेमपूरपूरितमानसा ॥ ८४ ॥

अन्वयः–अवधि ज्ञानतः तं मुनिं अत्र स्थानके ज्ञात्वा प्राग्भव प्रेम पूर पूरित मानसा सा आगमत्. ॥ ८४ ॥
अर्थः–अवधिज्ञानथी ते मुनिने आ जगोए ( रहेला ) जाणीने, पूर्वभवना प्रेमना समूहथी भरेला हृदयवाळी ते व्यंतरी आवी.

हावैः प्रीतिगिरां भावैर्व्यन्तर्योपद्रुतोऽपि सः । नाचलद्ध्यानतो दन्तिदन्तघातैरिवाचलः ॥ ८५ ॥

अन्वयः–हावैः प्रीतिगिरां भावैः व्यंतर्या उपद्रुतः अपि सः दंति दंत घातैः अचलः इव ध्यानतः न अचलत्. ॥ ८५ ॥
अर्थः—प्रेमयुक्त वचनोना हावभावोवडे ते व्यंतरीए ( अनुकूल ) उपद्रव कर्या छतां पण ते श्रीषेणमुनि, हाथीना दंतघातोवडे पर्वतनीपेठे ध्यानथी चलायमान थया नही. ॥ ८५ ॥

किं त्वस्य क्षपकश्रेण्यामारूढस्य मुनीशितुः । केवलज्ञानमुत्पेदे विच्छेदे घातिकर्मणाम् ॥ ८६ ॥

अन्वयः—किंतु क्षपक श्रेण्यां आरूढस्य अस्य मुनीशितुः घातिकर्मणां विच्छेदे केवलज्ञानं उत्पेदे. ॥ ८६ ॥
अर्थः—परंतु क्षपकश्रेणिपर चडेला ते मुनिराजने घातिकर्मोना नाशथी केवलज्ञान उत्पन्न थयुं. ॥ ८६ ॥

**तन्मत्वा व्यन्तरी मुक्तमोहा भक्तिमिमां व्यधात् । सुगन्धानिलहेमाब्जरत्नसिंहासनादिकाम् ॥ ८७ ॥**

अन्वयः-तत् मत्वा मुक्तमोहा व्यंतरी सुगंध अनिल हेम अब्ज रत्न सिंहासन आदिकां इमां भक्तिं व्यधात्. ॥ ८७ ॥

अर्थः-ते जाणीने मोहने तजी ते व्यंतरीए सुगंधी वायु, सुवर्णनुं कमल, तथा रत्नना सिंहासन आदिकनी आ भक्ति करेली छे

**जाते च निर्विषे नागे व्योम्नि वाग्निर्ममेऽनया । भवेत्प्रभावनायां हि सम्यग्दृष्टेरभीष्टता ॥ ८८ ॥**

अन्वयः—च नागे निर्विषे जाते अनया व्योम्नि वाग् निर्ममे, हि प्रभावनायां सम्यग्दृष्टेः अभीष्टता भवेत्. ॥ ८८ ॥

अर्थः—वळी ते नागकौटुंबीनुं झेर उतरी गयाबाद आ व्यंतरीए आकाशवाणी करी, केमके (धर्मनी) प्रभावना करवामां सम्यग्दृष्टीदेवने प्रेम होय छे. ॥ ८८ ॥

**सोऽहं श्रीषेणनामास्मि यतिर्नृपतिनन्दन । विनीता व्यन्तरी चेयं तव दक्षिणतः स्थिता ॥ ८९ ॥**

अन्वयः—हे नृपति नंदन! सः अहं श्रीषेणनामा यतिः अस्मि, च तव दक्षिणतः स्थिता इयं विनीता व्यंतरी. ॥ ८९ ॥

अर्थः—(हे) राजकुमार! तेज हुं (आ) श्रीषेणनामनो मुनि छुं. अने तारी जमणी बाजुए बेठेली ते आ विनयवंत व्यंतरी छे.

**पप्रच्छे यत्त्वया सौम्य द्वितीयं व्रतकारणम् । तदेतदिति वैराग्यं ज्ञेयं विषयदोषजम् ॥ ९० ॥**

अन्वयः--(हे) सौम्य! त्वया यत् द्वितीयं व्रतकारणं पप्रच्छे, तत् एतत् इति विषयदोषजं वैराग्यं ज्ञेयं. ॥ ९० ॥

अर्थः—(हे) सौम्य ! तें जे व्रतमाटेनुं बीजुं कारण पूछ्युं, ते आ रीते विषयना दोषथी उत्पन्न थयेला वैराग्यरूप जाणवुं ॥९०॥

**इत्थं कथायास्तत्त्वार्थमवबुध्य धियां निधिः । सनत्कुमारः संसारकान्तारातिक्रमोद्यमः ॥ ९१ ॥**

**उन्मीलितमुखाम्भोजः केवलज्ञानभास्करम् । गुरुं विज्ञपयामास नत्वा सत्त्वाधिकाधिपः ॥ ९२॥युग्मम्॥**

अन्वयः-इत्थं कथायाः तत्त्वार्थं अवबुध्य धियां निधिः, संसार कांतार अतिक्रम उद्यमः, उन्मीलित मुख अंभोजः, सत्त्वाधिक अधिपः सनत्कुमारः केवलज्ञान भास्करं गुरुं नत्वा विज्ञपयामास. ॥ ९१ ॥ ९२ ॥ युग्मं ॥

अर्थः—एवीरीते कथानो भावार्थ जाणीने बुद्धिनो भंडार, तथा संसाररूपी वनने उल्लंघवामाटे उद्यमि थयेलो, विकस्वर मुखकमलवाळो, तथा महापराक्रमीओमां शिरोमणि एवो ते सनत्कुमार केवलज्ञानवडे सूर्यसमान एवा ते गुरुमहाराजने वांदीने विनववा लाग्यो के, ॥ ९१ ॥ ९२ ॥ युग्मं ॥

**सच्चारित्र चरित्रं ते पवित्रं यन्मया श्रुतम् । तस्योचितं ततः स्याच्चेद् व्रतमासेव्यते परम् ॥ ९३ ॥**

अन्वयः-( हे ) सत् चारित्र ! मया यत् ते पवित्रं चरित्रं श्रुतं, ततः चेत् परं व्रतं आसेव्यते तस्य उचितं स्यात्. ॥ ९३ ॥

अर्थः—( हे ) उत्तम चारित्रवान् मुनि ! में जे आपनुं निर्मल चरित्र सांभळ्युं, तेथी जो ( हवे हुं ) महाव्रत स्वीकारुं, तोज में उचित कर्युं कहेवाय. ॥ ९३ ॥

तत्कर्तुं नास्म्यलं वोढुमिव वत्सतरो रथम् । किं तु स्वदारसंतोषं कुर्वेऽनर्थनिवारणम् ॥ ९४ ॥

अन्वयः—वत्सतरः रथं वोढुं, इव, तत् कर्तुं अहं अलं न अस्मि, किंतु अनर्थ निवारणं स्वदार संतोषं कुर्वे. ॥ ९४ ॥

अर्थः—(परंतु) न्हानो वाछरडो जेम रथनो (भार) न उपाडी शके, तेम ते महाव्रत पाळवाने हुं समर्थ नथी, अने तेथी आपदाओने निवारनारां स्वदारसंतोषव्रतनो हुं स्वीकार करुं छुं. ॥ ९४ ॥

ततो दन्तांशुसंसूच्यमानादेशविधूदयः । अवोचदौचितीकल्पलतारोहावनिर्मुनिः ॥ ९५ ॥

अन्वयः—ततः दंत अंशु संसूच्यमान आदेश विधु उदयः, औचिती कल्पलता आरोह अवनिः मुनिः अवोचत् . ॥ ९५ ॥

अर्थः—पछी दांतोना किरणोवडे सूचवातो छे आदेशरूप चंद्रनो उदय जेनाथी, तथा उचिततारूपी कल्पवेलीने उगवा माटे भूमिसरखा एवा ते मुनिराज बोल्या के, ॥ ९५ ॥

स्वबुद्धयाभिग्रहश्चक्रे यस्त्वया ज्ञाततत्त्वया । शममेष्यति तेनैव कृतिन्भवदवस्तव ॥ ९६ ॥

अन्वयः–(हे) कृतिन् ! ज्ञाततत्त्वया स्वबुध्धया त्वया यः अभिग्रहः चक्रे, तेन एव तव भव दवः शमं एष्यति. ॥ ९६ ॥

अर्थः–हे विचक्षण सनत्कुमार ! तत्वने जाणनारी तारी पोतानी बुद्धिवडे तें जे अभिग्रह कर्यो, तेथीज तारो संसाररूपी दावानल शांत थइ जशे. ॥ ९६ ॥

परदारपरोहारस्तन्यते येन गेहिना । तेन सिद्धयङ्गनालीलं शीलं शीलितमुज्ज्वलम् ॥ ९७ ॥

अन्वयः-येन गेहिना पर दार परीहारः तन्यते, तेन सिद्धि अंगना लीलं उज्ज्वलं शीलं शीलितं ॥ ९७ ॥

अर्थ—जे गृहस्थीए परस्त्रीनो त्याग करेलो छे, तेणे मुक्तिरूपी स्त्रीनी क्रीडावालुं निर्मळ शील पाळेलुं ( जाणवुं. ) ॥ ९७ ॥

**यस्तु स्वदारसंतोषी विषयेषु विरागवान् । गृहस्थोऽपि स्वशीलेन यतिकल्पः स कल्प्यते ॥ ९८ ॥**

अन्वयः-तु यः विषयेषु विरागवान् स्वदार संतोषी- सः गृहस्थः अपि स्वशीलेन यतिकल्पः कल्प्यते. ॥ ९८ ॥

अर्थः-वळी जे मनुष्य विषयोमां वैराग्यवान थइने पोतानी स्त्रीमांज संतोष राखे छे, ते गृहस्थ छतां पण पोताना शीलथी मुनि सरखो लेखाय छे. ॥ ९८ ॥

**विश्वप्रीतिप्रदास्वेकं शीलं भूषासु शस्यते । जायते येन जीवोऽयं भूषितो निर्वृतेः प्रियः ॥ ९९ ॥**

अन्वयः—विश्व प्रीतिप्रदासु भूषासु एकं शीलं शस्यते, येन भूषितः अयं जीवः निर्वृतेः प्रियः जायते. ॥ ९९ ॥

अर्थः—जगतने प्रीतिकारक आभूषणोमां एक शीलरूपी आभूषणज प्रशंसाने पात्र छे, के जेथी शणगारेलो आ जीव मुक्तिरूपी स्त्रीने (पण) प्रिय थइ पडे छे. ॥ ९९. ॥

**तत्कुमार त्वया सारतरं व्रतमगृह्यत । विशेषादप्रमत्तेन भव्य भाव्यमिहान्वहम् ॥ १२०० ॥**

अन्वयः-तत् ( हे ) कुमार! त्वया सारतरं व्रतं अगृह्यत, (हे) भव्य! इह अन्वहं विशेषात् अप्रमत्तेन भाव्यं ॥ १२०० ॥

अर्थः—माटे (हे) सनत्कुमार! तमोए (आ) वधारे उत्तम व्रत ग्रहण करेलुं छे, अने ते व्रत पाळवामां हमेशां विशेषरीते प्रमाद-

रहित रहेवुं ॥ १२००॥

इत्युक्तो गुरुणावादीददीनमिति भूपभूः । नियमस्त्वत्प्रसादान्मे प्रभो प्रामाण्यमेष्यति ॥ १ ॥

अन्वयः–गुरुणा इति उक्तः भूपभूः इति अदीनं अवादीत्, (हे) प्रभो! त्वत्प्रसादात् मे नियमः प्रामाण्यं एष्यति. ॥ १ ॥

अर्थः–गुरुमहाराजे एम कहेवाथी ते राजकुमारे उत्साहथी एम कह्युं के, (हे) स्वामी! आपनी कृपाथी मारो (आ) नियम सत्यपणाने प्राप्त थशे. ॥ १ ॥

अत्रान्तरे पवित्रान्तःकरणा करुणार्णवम् । गुरुं प्रणम्य शृङ्गारसुन्दरीति व्यजिज्ञपत् ॥ २ ॥

अन्वयः–अत्र अंतरे पवित्र अंतःकरणा शृंगारसुंदरी करुणा अर्णवं गुरुं प्रणम्य इति व्यजिज्ञपत्. ॥ २ ॥

अर्थः—एवामां निर्मल हृदयवाळी ते शृंगारसुंदरी (ते) करुणासागर गुरुमहाराजने वांदीने एम कहेवा लागी के, ॥ २ ॥

मनोवचनकायेन शुद्धं श्रद्धानबन्धुरा । परपुंसः परित्यागं विधास्ये जीवितावधि ॥ ३ ॥

अन्वयः—श्रद्धान बंधुरा (अहं) जीवित अवधि मनः वचन कायेन शुद्धं पर पुंसः परित्यागं विधास्ये. ॥ ३ ॥

अर्थः—श्रद्धाथी मनोहर थयेली एवी (हुं पण) छेक जीवितपर्यंत मन वचन अने कायानी शुद्धिपूर्वक परपुरुषनो त्याग करीश.

गुरुरित्याह वत्से त्वं सत्यं शृङ्गारसुन्दरी । शीलं स्त्रीणां हि शृङ्गारः क्षान्तिर्दर्शनिनामिव ॥ ४ ॥

अन्वयः—गुरुः इति, आह, ( हे ) वत्से ! त्वं सत्यं शृंगारसुंदरी, हि दर्शनिनां क्षांतिः इव स्त्रीणां शृंगारः शीलं. ॥ ४ ॥
अर्थः—(पछी) गुरुमहाराजे एम कह्युं के, (हे) वत्से ! तुं खरेखरी शृंगारसुंदरी छो, केमके साधुओने जेम क्षमा, तेम स्त्रीओनो शणगार शीयल छे. ॥ ४ ॥

**इत्थं कृत्वा स्थिरीकारमग्राहयदभिग्रहम् । सनत्कुमारशृङ्गारसुन्दर्योर्विधिना मुनिः ॥ ५ ॥**

अन्वयः–इत्थं सनत्कुमार शृंगारसुंदर्योः स्थिरीकारं कृत्वा मुनिः विधिना अभिग्रहं अग्राहयत्. ॥ ५ ॥
अर्थः—ए रीते ते सनत्कुमार तथा शृंगारसुंदरीने दृढ करीने ते मुनिराजे विधिपूर्वक (तेओने) अभिग्रह कराव्यो. ॥ ५ ॥

**भवतां दर्शनं भूयात्पुनर्मे सुलभं प्रभो । इति नत्वा गुरुं स्तूयमानः सभ्यैर्नृपाङ्गभूः ॥ ६ ॥**
**सभार्योऽथ सभागर्भादात्तपुण्योऽगमन्मुदा । स्वस्थानं व्यवसायीवार्जितवित्तोऽन्यदेशतः ॥ ७ ॥ युग्मम् ॥**

अन्वयः–(हे) प्रभो ! पुनः मे भवतां दर्शनं सुलभं भूयात्, इति गुरुं नत्वा, सभ्यैः स्तूयमानः नृपांगभूः ॥ ६ ॥ अथ अर्जित वित्तः व्यवसायी अन्य देशतः स्वस्थानं इव आत्तपुण्यः सभार्यः मुदा सभागर्भात् अगमत्. ॥ ७ ॥ युग्मम् ॥
अर्थः–(हे) प्रभु ! वळी पण मने आपनुं दर्शन सुलभ थाओ, एम (कही), गुरुमहाराजने वांदीने, सभासदोवडे स्तुति करातो, एवो ते राजकुमार, पछी धन उपार्जन करीने व्यापारी परदेशमांथी जेम पोताने घेर जाय, तेम पुण्य उपार्जन करीने स्त्रीसहित हर्षथी सभामांथी ( निकळी ) चालवा लाग्यो. ॥ ७ ॥

तत्र निर्मितनिःशेषकृत्यः सत्कृत्य धार्मिकान् । आनन्दप्रमुखांश्चक्रे स प्रस्तावे प्रयाणकम् ॥ ८ ॥

अन्वयः—निर्मित निःशेष कृत्यः सः तत्र आनंद प्रमुखान् धार्मिकान् सत्कृत्य प्रस्तावे प्रयाणकं चक्रे. ॥ ८ ॥

अर्थः—करेल छे सर्व कार्यो जेणे एवो ते सनत्कुमार त्यां (ते) आनंदआदिक साधर्मिओनो सत्कार करीने समय मळ्ये प्रयाण करवा लाग्यो. ॥ ८ ॥

स मङ्गल्यान्यतुल्यानि प्रतीच्छन्प्रतिपत्तनम् । अखण्डगमनैश्चण्डदोर्दण्डः स्वपुरीमगात् ॥ ९ ॥

अन्वयः—चंड दोर्दंडः सः प्रतिपत्तनं अतुल्यानि मंगल्यानि प्रतीच्छन् अखंड गमनैः स्व पुरीं अगात्. ॥ ९ ॥

अर्थः—पराक्रमी भुजदंडवाळो ते सनत्कुमार दरेक शेहेरमां अनुपम सन्मान मेळवतो थको अविच्छिन्न प्रयाणथी पोतानी नगरीमां गयो. ॥ ९ ॥

तत्र चित्राट्टशोभायां क्षोभाकुलितयोषिति । श्रीकान्तायां सकान्तोऽसौ प्रविवेश महोत्सवैः ॥ १० ॥

अन्वयः—चित्र अट्ट शोभायां, क्षोभ आकुलित योषिति तत्र श्रीकांतायां सकांतः असौ महोत्सवैः प्रविवेश ॥ १० ॥

अर्थः—नाना प्रकारनी दुकानोनी शोभावाळी, तथा जोवाना क्षोभथी व्याकुळ थयेली छे स्त्रीओ जेमां, एवी ते श्रीकांतानामनी नगरीमां पत्नीसहित ते सनत्कुमारे महोत्सवपूर्वक प्रवेश कर्यो. ॥ १० ॥

शृङ्गारसुन्दरीं नार्यो नराधिपसुतं नराः । तौ धन्यौ मेनिरे पाणिपीडनक्रीडया मिथः ॥ ११ ॥

अन्वयः—नार्यः शृंगारसुंदरीं, नराः नराधिप सुतं, तौ मिथः पाणि पीडन क्रीडया धन्यौ मेनिरे. ॥ ११ ॥

अर्थः–स्त्रीओ शृंगारसुंदरीने, तथा पुरुषो ते राजकुमारने, एम तेओ बन्ने वच्चे परस्पर थयेलां लग्ननी लीलाथी तेओने धन्य मानवा लाग्या. ॥ ११ ॥

**चन्द्रिकामिव चन्द्रस्य पश्यन्पुत्रस्य तां प्रियाम् । समुद्र इव भूमीन्द्रः परमुल्लासमासदत् ॥ १२ ॥**

अन्वयः–चंद्रस्य चन्द्रिकां इव, पुत्रस्य तां प्रियां पश्यन्, भूमींद्रः समुद्र इव परं उल्लासं आसदत्. ॥ १२ ॥

अर्थः–चन्द्रनी चांदनीनीपेठे (पोताना) पुत्रनी ते स्त्रीने जोतो, एवो राजा (पण) महासागरनीपेठे अति उल्लास पामवा लाग्यो

**अनङ्गमङ्गलोत्फुल्लभालया सह बालया । केन केन विलासेन विललास रसी न सः ॥ १३ ॥**

अन्वयः—अनंग मंगल उत्फुल्ल भालया बालया सह सः रसी केन केन विलासेन न विललास? ॥ १३ ॥

अर्थः—कामविलासथी विकस्वर थयेलां ललाट अथवा तेजवाळी एवी ते शृंगारसुंदरीनी साथे ते रसिक सनत्कुमारे कया कया विलासवडे भोगो न भोगव्या? (अर्थात् सर्व प्रकारे भोगव्या) ॥ १३ ॥

**स्मरस्य सरतेः सख्युर्भ्रमेणेव प्रियान्वितम् । तदा कुमारमाराद्धुमुत्तीर्णः क्ष्मां मधुर्मुदा ॥ १४ ॥**

अन्वयः–सरतेः स्मरस्य सख्युः भ्रमेण इव प्रियान्वितं कुमारं आराद्धुं तदा मुदा मधुः क्ष्मां उत्तीर्णः ॥ १४ ॥

अर्थः–रतिसहित कामदेवरूपी (पोताना) मित्रना भ्रमथी जाणे होय नही! तेम प्रिया सहित ते कुमारनी सेवा करवा माटे ने

समये हर्षथी वसंत ऋतु पृथ्वीपर आवी ॥ १४ ॥

**पीतपुष्पमधुर्गायन्भृङ्गारावैरितस्ततः । चचार शनकैर्मत्तकलया मलयानिलः ॥ १५ ॥**

अन्वयः—पीत पुष्प मधुः, भृंग आरावैः गायन् मलय अनिलः मत्त कलया शनकैः इतस्ततः चचार. ॥ १५ ॥

अर्थः-पीधेल छे, पुष्पोमांथी मद्यरस जेणे, तथा भमराओना नादोथी गायन, गातो एवो मलयाचलनो वायु उन्मत्त थइने धीमेधीमे आसपास वावा लाग्यो. ॥ १५ ॥

**गृहीतवसुसर्वस्वः शिशिरेण विरोधिना । श्रीदस्य दिशमासाद्य सश्रीकस्तपनोऽजनि ॥ १६ ॥**

अन्वयः—विरोधिना शिशिरेण गृहीत वसु सर्वस्वः तपनः श्रीदस्य दिशं आसाद्य सश्रीकः अजनि. ॥ १६ ॥

अर्थः-शत्रुसरखा शीयाळाए खुंचवी लीधेल हतुं सर्व सामर्थ्य जेनुं, एवो सूर्य कुबेरनो आश्रय लेइने पाछो लक्ष्मीवान थयो, अर्थात् उत्तर दिशा तरफ आवीने तेजस्वी थवा लाग्यो. ॥ १६ ॥

**ग्रहीतुमिव पुष्पाणि द्रुमेषु किसलच्छलात् । काममङ्गुलयः कामप्रवीरेण प्रपञ्चिताः ॥ १७ ॥**

अन्वयः—पुष्पाणि ग्रहीतुं इव किसलच्छलात् काम प्रवीरेण द्रुमेषु कामं अंगुलयः प्रपंचिताः. ॥ १७ ॥

अर्थः—जाणे पुष्पो तोडी लेवा माटे होय नही! तेम कुंपलोना मिषथी कामसुभटे वृक्षोपर जत्थाबंध (पोतानी) आंगळीओ विस्तारी दीधी. ॥ १७ ॥

वनीरंगावनीरंगाः कुहूकण्ठीकुहूरवाः । कन्दर्पकेलिनाट्यस्य नान्दीनादा इवाभवन् ॥ १८ ॥

अन्वयः–कंदर्प केलि नाटयस्य नांदीनादाः इव वनी रंगावनी रंगाः कुहूकंठी कुहूरवाः अभवन् . ॥ १८ ॥

अर्थः—कामदेवना क्रीडानाटकना नांदीपाठोनीपेठे वनरूपी रंगभूमि पर विस्तार पामता, एवा कोयलना टहुकारो थवा लाग्या.

गायति स्मृतिभूकीर्तिं भृंगशृंगारिणीगणे । रतिर्ननर्त सिञ्जानमञ्जीरहंसकूजितैः ॥ १९ ॥

अन्वयः–भृंज शृंगारिणी गणे स्मृतिभू कीर्तिं गायति, सिंजान मंजीर हंस कूजितैः रतिः ननर्त. ॥ १९ ॥

अर्थः–भमरीओनो समूह कामदेवनी कीर्तिनुं गायन करते छते झमकता झांझरो सरखा हंसोना अवाजो सहित रतिरूपी (नटी) नृत्य करवा लागी. ॥ १९ ॥

दहन्विरहिणीर्विश्वव्यापी पुष्पकलापतः । परागः पुष्पचापस्य प्रताप इव निर्ययौ ॥ २० ॥

अन्वयः–विरहिणीः दहन् विश्वव्यापी, पुष्प चापस्य प्रतापः इव पुष्प कलापतः परागः निर्ययौ. ॥ २० ॥

अर्थः–(पतिना) विरहवाळी स्त्रीओने बाळतो, तथा जगतमां व्यापेलो, एवो जाणे कामदेवनो प्रताप होय नही! तेम पुष्पोना समूहमांथी पराग निकळवा लाग्यो. ॥ २० ॥

जगज्जययशांसीव कुसुमानि मनोभुवः । जितानां दुर्यशोजालैरिवालिंग्यन्त षट्पदैः ॥ २१ ॥

अन्वयः—मनोभुवः जगत् जय यशांसि इव कुसुमानि, जितानां दुर्यशः जालैः इव षट्पदैः आलिंग्यंत. ॥ २१ ॥

अर्थः—जगतने जीतवाथी मळेला जाणे कामदेवना जश होय नही! तेम पुष्पो (शोभतां हतां), तथा जीतायेलाना अपयशोना समूहोसरखा भमराओवडे (ते पुष्पो चुंबातां हतां.) ॥ २१ ॥

**पुष्पजातैर्जगत्प्राणान्सुरभिः सुरभीन्सृजन् । कस्यैकस्यैष नानन्दसंदर्भाय व्यजायत ॥ २२ ॥**

अन्वयः—पुष्प जालैः जगत्प्राणान् सुरभी सृजन् एषः सुरभिः कस्य कस्य आनंद संदर्भाय न व्यजायत? ॥ २२ ॥

अर्थः—पुष्पोना समूहोवडे जगतना प्राणोने सुगंधी करती, एवी आ वसंतऋतु कोना कोना आनंदना उभरामाटे न थइ? ।२२।

**तदा हृद्यां वसन्तेन वासन्तीशसुतायुतः । स विनोदवनीमापदवनीपतिनन्दनः ॥ २३ ॥**

अन्वयः—तदा वासंती ईश सुता युतः सः अवनी पति नंदनः वसंतेन हृद्यां विनोदवनीं आपत् ॥ २३ ॥

अर्थः—ते वखते वासंतीनगरीना स्वामिनी पुत्रीथी युक्त थयेलो ते राजपुत्र सनत्कुमार वसंतऋतुथी मनोहर थयेला क्रीडावनमां आव्यो. ॥ २३ ॥

**द्युजलस्थलदेवीभिर्मुहुः सस्पृहमीक्षितः । अयं सफलयामास विलासान्प्रियया सह ॥ २४ ॥**

अन्वयः—द्यु जल स्थल देवीभिः सस्पृहं मुहुः ईक्षितः अयं प्रियया सह विलासान् सफलयामास, ॥ २४ ॥

अर्थः—आकाशदेवी, जळदेवी, तथा स्थलदेवीओवडे उत्कंठासहित वारंवार जोवायेलो ते सनत्कुमार शृंगारसुंदरीसाथे विला-

सोने सफल करवा लाग्यो. ॥ २४ ॥

**असावितस्ततः खेलन्वसन्तेन विलोकितः । कलितांग इवानंगः सुहृत्कुसुमहासिना ॥ २५ ॥**

अन्वयः—कुसुम हासिना वसंतेन सुहृत् कलित अंगः अनंगः इव असौ इतस्ततः खेलन् विलोकितः. ॥ २५ ॥

अर्थः-पुष्पोरूपी हास्यवाळी वसंतऋतुए (पोताना) शरीरधारी मित्र कामदेवसरखा ते सनत्कुमारने आसपास क्रीडा करतो जोयो.

**लीलाद्रिरत्नशृङ्गेषु लीलावापिजलेषु च । कष्टं कुमारः सस्मार तां मायामात्मबिम्बनात् ॥ २६ ॥**

अन्वयः-लीला अद्रि रत्न शृंगेषु, च लीला वापि जलेषु कुमारः कष्टं आत्म बिंबनात् तां मायां सस्मार. ॥ २६ ॥

अर्थः—क्रीडा करवाना पर्वतोना रत्नोना शिखरोमां, तथा क्रीडा करवानी वावोना जलोमां ते राजकुमार पोतानुं प्रतिबिंब पडवाथी दुःखीपणे ते (स्वयंवर समयनी) मायाने याद करवा लाग्यो. ॥ २६ ॥

**विलासस्य परां भूमिमथ गन्तुमिवोत्सुकः । कुमारोऽयं समारोहद्दोलां कामविमानवत् ॥ २७ ॥**

अन्वयः—अथ अयं कुमारः विलासस्य परां भूमिं गंतुं उत्सुकः इव, कामविमानवत् दोलां समारोहत्. ॥ २७ ॥

अर्थः—पछी ते सनत्कुमार विलासनी उत्कृष्टी कोटिने पहोंचवामाटे जाणे उत्कंठित थयो होय नहीं! तेम हींचोळापर चड्यो. ॥

**शृङ्गारसुन्दरीहस्तलोलया दोलया तया । सुकृती यां मुदं प्राप वेत्ति तन्मन एव ताम् ॥ २८ ॥**

अन्वयः-शृंगारसुंदरी हस्त लोलया तया दोलया सुकृती यां मुदं प्राप, तां तन्मन एव वेत्ति. ॥ २८ ॥

अर्थः—शृंगारसुंदरीना हाथथी हींचोळाता एवा ते हींचोळावडे ते पुण्यशाली सनत्कुमार जे हर्षने पाम्यो तेने तेनुं मनज जाणे छे. ॥ २८ ॥

हारस्रजः कुमारस्य दोलाकेलिधुताश्च्युताः । तत्पादप्रहतस्योडुनिवहा नु विहायसः ॥ २९ ॥

अन्वयः—दोला केलि धुताः च्युताः कुमारस्य हारस्रजः तत्पाद प्रहतस्य विहायसः नु उडुनिवहाः. ॥ २९ ॥

अर्थः-हींचोलानी क्रीडाथी अथडाइने खरी पडेलां ते राजकुमारनी मालानां पुष्पो, तेना चरणोथी हणायेला आकाशमांथी खरेला शुं ताराओना समूह हता ? ॥ २९ ॥

अहो प्रेम्णैकचित्तत्वं बाला दोलामियेष च । अमूं रमयितुं तत्र कुमारः प्रोत्ततार च ॥ ३० ॥

अन्वयः—अहो ! प्रेम्णा एकचित्तत्वं ! बाला च दोलां इयेष, च तत्र अमुं रमयितुं कुमारः प्रोत्ततार. ॥ ३० ॥

अर्थः—अहो ! प्रेमने लीधे केवुं एकहृदयपणुं छे ! हवे ते शृंगारसुंदरीए हींचोळापर बेसवानी इच्छा करी, अने ते हींचोळापर तेने रमाडवामाटे सनत्कुमार ( हींचोळापरथी ) नीचे उतर्यो. ॥ ३० ॥

इमां दोर्भ्यामुदस्यैष पुलकी पुलकाञ्चिताम् । स्वमिवानन्दचूलायां दोलायामध्यरोपयत् ॥ ३१ ॥

अन्वयः-पुलकी एषः पुलक अंचितां इमां दोर्भ्यां उदस्य स्वं इव आनंद चूलायां दोलायां अध्यरोपयत्. ॥ ३१ ॥

अर्थः—रोमांचित थयेला ते सनत्कुमारे रोमांचित थयेली ते शृंगारसुंदरीने बे हाथे उंचकीने पोतानीपेठे हर्षना शिखर सरखा हींचोळापर बेसाडी. ॥ ३१ ॥

**कुमारो दोलया बालां दिवि दूरं व्यलासयत्। यन्त्रेणेव स्मरः शक्तिमन्तः क्षामां मरुज्जये ॥ ३२ ॥**

अन्वयः—स्मरः मरुज्जये यंत्रेण शक्ति इव, कुमारः दोलया अंतःक्षामां बालां दिवि दूरं व्यलासयत्. ॥ ३२ ॥

अर्थः—कामदेव देवोने जीतवामाटे यंत्रवडे जाणे (अणीदार) बरछी उछाळतो होय नही! तेम ते सनत्कुमार हींचोळाथी पातळी कटीतटवाळी ते शृंगारसुन्दरीने आकाशमां दूरसुधी हींचोळवा लाग्यो. ॥ ३२ ॥

**दोलागतागतैस्तस्याः कान्तिरेखाकरं वपुः। हेमेव कषपाषाणनिभे नभसि दिद्युते ॥ ३३ ॥**

अन्वयः—दोला गतागतैः तस्याः कांति रेखा करं वपुः कषपाषाणनिभे नभसि हेम इव दिद्युते. ॥ ३३ ॥

अर्थः—हींचोळाना आंदोलनोथी तेणीनुं तेजनी रेखाओ पाडतुं शरीर कसोटी सरखा आकाशमां सुवर्णनीपेठे चळकवा लाग्युं. ३३

**द्यां मुहुर्दोलया गत्वा हत्वा गर्वं द्युयोषिताम्। उत्तरन्ती कुमारेण कुतुकेन व्यलोकि सा ॥ ३४ ॥**

अन्वयः—दोलया मुहुः द्यां गत्वा, द्युयोषितां गर्वं हत्वा उत्तरंती सा कुमारेण कुतुकेन व्यलोकि. ॥ ३४ ॥

अर्थः—हींचोळावडे वारंवार आकाशमां जइने, तथा (त्यां) देवांगनाओना गर्वनो नाश करीने (पाछी) नीचे उतरती एवी ते शृंगारसुंदरीने सनत्कुमारे आश्चर्यथी जोइ. ॥ ३४ ॥

दोलाहेलाभरत्रुटयत्तन्मुक्तावलिविस्तृतौ । दृष्टं सनत्कुमारेण दिवा तारकितं नभः ॥ ३५ ॥

अन्वयः-दोला हेला भर त्रुटयत् तत् मुक्तावलि विस्तृतौ, सनत्कुमारेण दिवा तारकितं नभः दृष्टं. ॥ ३५ ॥

अर्थः—हींचोळाना आंचकाओना समूहथी त्रुटी जता, एवा तेणीना हारना मोतीओ ( उडीने ) वीखरावाथी, ते सनत्कुमार दिवसे पण तारावाळुं आकाश जोवा लाग्यो. ॥ ३५ ॥

ताद्दग्विलाससंरम्भजृम्भमाणस्मरोदयः । आलिङ्गितुं प्रियाङ्गानि रङ्गद्गाढमनोरथः ॥ ३६ ॥

दिवो दोलावतारस्य निमेषार्धमपि क्षणम् । उत्सुको गणयन्नब्दशतादप्यधिकं तदा ॥ ३७ ॥

दोलामस्थिरयद्यावत्तावन्नास्त्येव तत्र सा । वदन् हा हेति हत्वा हृत्कुमारेन्दुर्मुमूर्छ सः ॥ ३८ ॥

अन्वयः-तादृक् विलास संरंभ जृंभमाण स्मर उदयः, प्रिया अंगानि आलिंगितुं रंगत् गाढ मनोरथः, ॥ ३६ ॥ उत्सुकः तदा दिवः दोला अवतारस्य निमेष अर्धं क्षणं अपि अब्दशतात् अपि अधिकं गणयन्, ॥ ३७ ॥ यावत् दोलां अस्थिरयत्, तावत् तत्र सा नास्ति एव, हा हा ! इति वदन् हृत् हत्वा कुमारेंदुः मुमूर्छ. ॥ ३८ ॥ त्रिभिर्विशेषकं ॥

अर्थः—तेवीरीतनो विलास करवाथी विस्तार पामेलो छे कामनो उदय जेनो, ( अने तेथी पोतानी ते ) प्रियाने आलिंगन करवाने उत्पन्न थयेल छे अत्यंत मनोरथ जेने, ॥ ३६ ॥ एवो उत्सुक थयेलो ते सनत्कुमार, ते समये हींचोळाना उंचेथी

नीचे आववाना अर्धा निमेष जेटला समयने पण सो वर्षथी पण अधिक गणतो थको, ॥ ३७ ॥ जेत्रामां हींचोळाने स्थिर करे छे, तेवामां ते हींचोळामां ते शृंगारसुंदरीज नहोती, ( अने तेथी ) हा ! हा ! एम बोलतो थको, छाती कूटीने ते सनत्कुमार मूर्छा पाम्यो. ॥ ३८ ॥ त्रिभिर्विशेषकं ॥

**किं किमेतदिति व्यग्रगिरा परिजनेन सः। प्रसूनरससेकेन मूर्छन्मूर्छः कृतस्ततः ॥ ३९ ॥**

अन्वयः—ततः एतत् किं ? किं ? इति व्यग्र गिरा परिजनेन प्रसूनरस सेकेन सः मूर्छत् मूर्छः कृतः. ॥ ३९ ॥

अर्थः—पछी आ शुं थयुं ? शुं थयुं ? एम व्याकुल वचनोवाळा परिवारे गुलाबजळ छांटीने तेने मूर्छारहित कर्यो. ॥ ३९ ॥

**हा प्रिये क्व गतासीति गद्गदां गिरमुद्गिरन्। आस्फाल्य भुवि मूर्धानमगच्छन्मूर्छनं पुनः ॥ ४० ॥**

अन्वयः- हा प्रिये ! क्व गता असि ? इति गद्गदां गिरं उद्गिरन् भुवि मूर्धानं आस्फाल्य पुनः मूर्छनं अगच्छत्. ॥ ४० ॥

अर्थः-अरे ! प्यारी ! तुं क्यां गइ ? एम गद्गद वाणी बोलतो ते सनत्कुमार जमीनपर मस्तक पछाडी पाछो मूर्छित थइ पड्यो.

**समाश्वसिहि वीरेन्द्र समाश्वसिहि धीनिधे। इत्युक्तयोऽस्य सचिवाः शीतकर्म व्यधुः पुनः ॥ ४१ ॥**

अन्वयः-(हे) वीरेंद्र ! समाश्वसिहि ? (हे) धीनिधे ! समाश्वसिहि ? इति उक्तयः सचिवाः अस्य पुनः शीतकर्म व्यधुः. ।४१।

अर्थः—हे वीरशीरोमणि ! तुं हिम्मत राख ? हे बुद्धिना भंडार ! तुं हिम्मत राख ? एम बोलता मंत्रिओ तेनापर फरीने शीतल उपचार करवा लाग्या. ॥ ४१ ॥

**मूर्छामयं तमो हित्वा श्रितः शोकमयं तमः । कुमारो विललापाथ तरूनपि विलापयन् ॥ ४२ ॥**

अन्वयः—अथ मूर्छामयं तमः हित्वा, शोकमयं तमः श्रितः कुमारः तरून् अपि विलापयन् विललाप. ॥ ४२ ॥

अर्थः—पछी मूर्छावाळुं बेभानपणुं तजीने शोकमय बेभानपणामां रहेलो ते सनत्कुमार वृक्षोने पण रडावतोथको विलाप करवा लाग्यो. ॥ ४२ ॥

**अथागत्य पुरो लीनान्दीनान्साश्रुदृशो भृशम् । लीलाखगमृगानूचे गिरा रोदनदीर्घया ॥ ४३ ॥**

अन्वयः—अथ पुरः आगत्य लीनान् दीनान् भृशं साश्रुदृशः लीला खग मृगान् रोदन दीर्घया गिरा ऊचे. ॥ ४३ ॥

अर्थः—पछी ( ते राजकुमारनी ) आगळ आवीने स्थिर थयेला, दीन मुखवाळा, तथा अश्रुओसहित आंखोवाळा, एवा पाळेला पक्षीओ तथा मृगोने विलापथी लांबां वचनोवडे ते कहेवा लाग्यो के, ॥ ४३ ॥

**रे हंस कंसजित्कान्ताकमलेऽपि कथं तव । तत्कराग्रवियुक्तस्य वराक भविता रतिः ॥ ४४ ॥**

अन्वयः—रे वराक हंस ! तत्कर अग्र वियुक्तस्य तव कंसजित् कांता कमले अपि कथं रतिः भविता ? ॥ ४४ ॥

अर्थः—अरे ! रांकडा हंस ! तेणीना हस्ताग्रनो वियोग पामेला एवा तने कृष्णनी स्त्री लक्ष्मीना ( निवासरूप ) कमलमां पण तने आनंद क्यांथी आवशे ? ॥ ४४ ॥

स्मर्तव्येष्वधुना स्नाततत्केशस्यन्दबिन्दुषु । कथं दीनोऽम्बुदादम्बु रे बप्पीह समीहसे ॥ ४५ ॥

अन्वयः—रे बप्पीह ! स्नात तत्केश स्यंद बिंदुषु स्मर्तव्येषु अधुना दीनः अंबुदात् कथं अंबु समीहसे ? ॥ ४५ ॥

अर्थः–अरे ! बपैया ! स्नानबाद तेणीना केशना झरता बिंदुओ तने याद आवतां, हवे दीन थइने वरसादपासेथी तुं शीरीते जलने इच्छे छे ? ॥ ४५ ॥

क्व नृत्ये तादृशीः केकिन् शृणोषि करतालिकाः । यत्केकिरथमातापि जाता शूलभृताधिता ॥ ४६ ॥

अन्वयः–(हे) केकिन् ! नृत्ये तादृशीः करतालिकाः क्व शृणोषि ? यत् केकि रथ माता अपि शूलभृता अर्धिता जाता. ॥४६॥

अर्थः—हे मयूर ! नृत्य समये तेवी हस्ततालीओ तुं क्यां सांभळवानो हतो ? केमके केकिरथ एटले कार्तिकेयनी माता पार्वती पण महादेववडे अर्धी थइ गइ छे. ॥ ४६ ॥

भजन्वायुतुरङ्गत्वं सारङ्ग त्वं हि सर्वगः । लालयिष्यति सा धन्यं त्वां कुत्रापि वयं हताः ॥ ४७ ॥

अन्वयः—(हे) सारंग ! वायु तुरंगत्वं भजन् त्वं हि सर्वगः, धन्यं त्वां कुत्र अपि सा लालयिष्यति, वयं हताः. ॥ ४७ ॥

अर्थः—हे हरिण ! वायुना वाहनपणाने भजनारो तुं तो सर्व ठेकाणे जइ शकनारो छो, माटे धन्य एवा तने क्यांक पण ते शृंगारसुंदरी क्रीडा करावशे, अमो तो (हवे) मुआज छीये. ॥ ४७ ॥

[ रे कोकिल कलध्वानं किं तनोषि न गर्वितः । दूरीभूतोऽद्य यत्तस्याः सर्वगर्वहरः स्वरः ॥ ]

अन्वयः-[ रे कोकिल ! गर्वितः कलध्वानं किं न तनोषि ? यत् अद्य सर्व गर्व हरः तस्याः स्वरः दूरीभूतः. ]

अर्थः-[ अरे कोकिल ! तुं गर्वित थइने टहुकार केम करतो नथी ?, केमके आजे सर्वना गर्वने हरनारो तेणीनो स्वर दूर चाल्यो गयो छे. ॥ ]

इत्यार्तं विलपन्तं तं धीराणां योगिनामपि । पश्यतां धैर्यमुत्सार्य पूत्कारा निर्ययुर्मुखात् ॥ ४८ ॥

अन्वयः-इति आर्तं विलपंतं तं पश्यतां धीराणां योगिनां अपि धैर्यं उत्सार्य मुखात् पूत्काराः निर्ययुः. ॥ ४८ ॥

अर्थः—एरीते पीडित थयेला तथा विलाप करता एवा ते सनत्कुमारने जोता धैर्यवंत योगिओ पण हिम्मत तजीने मुखथी पोकार करवा लाग्या. ॥ ४८ ॥

अथ प्रियावियोगार्तिं स दृढां सोढुमक्षमः । प्रेङ्खन्त्या प्रेङ्खयात्मानं क्षिप्त्वा खे मृत्युमैहत ॥ ४९ ॥

अन्वयः-अथ दृढां प्रिया वियोग अर्तिं सोढुं अक्षमः सः प्रेंखत्या प्रेंखया आत्मानं खे क्षिप्त्वा मृत्युं ऐहत. ॥ ४९ ॥

अर्थः—पछी ते स्त्रीना वियोगथी थयेली अति पीडाने सहन न करी शकवाथी ते कुमार ते झुलता हींचोळापरथी पोताने आकाशमां उछाळी आपघात करवाने इच्छवा लाग्यो. ॥ ४९ ॥

इहान्तरे परिज्ञाततत्प्रवृत्तिः परस्वरः । कुमारमाश्वासयितुं वनमाप क्षमापतिः ॥ ५० ॥

अन्वयः—इह अंतरे परिज्ञात तत्प्रवृत्तिः क्षमापतिः परस्वरः कुमारं आश्वासययितुं वनं आप. ॥ ५० ॥

अर्थः--एवामां आ खबर मळवाथी राजा पोते एकदम उतावळथी पुत्रने शांत करवामाटे (त्यां) बगीचामां आव्यो. ॥ ५० ॥

**पितुः प्रणामव्याजेन लज्जया नमयञ्छिरः । कुमारः संववार स्वमथ गूढदृढव्यथः ॥ ५१ ॥**

अन्वयः—अथ दृढ गूढ व्यथः कुमारः पितुः प्रणाम व्याजेन लज्जया शिरः नमयन् स्वं संववार. ॥ ५१ ॥

अर्थः—पछी हृदयमां अति पीडित थयेलो ते सनत्कुमार (पोताना) पिताने नमवाना मिषथी लज्जावडे मस्तक नमावीने पोताने गोपववा लाग्यो. ॥ ५१ ॥

**क्रोडे कुमारमारभ्य परिश्लिष्यन्मुर्मुहुः । ययौ नरविमानेन नरेन्दुर्मन्दिरं ततः ॥ ५२ ॥**

अन्वयः—ततः नरेंदुः कुमारं क्रोडे आरभ्य मुहुःमुहुः परिश्लिष्यन् नरविमानेन मंदिरं ययौ. ॥ ५२ ॥

अर्थः—पछी ते राजा ते कुमारने खोळामां बेसाडी, वारंवार आलिंगन आपतो थको मीयानामां बेसी घेर गयो. ॥ ५२ ॥

**धिग्धिग्मे शूरतामस्य प्रिया यन्मेऽग्रतो हृता । एवं ह्रियेव निस्तेजा ययौ द्वीपान्तरं रविः ॥ ५३ ॥**

अन्वयः—मे शुरतां धिक् धिक्, यत् मे अग्रतः अस्य प्रिया हृता, एवं ह्रिया, इव निस्तेजाः रविः द्वीपांतरं ययौ. ॥ ५३ ॥

अर्थः—मारां शूरवीरपणाने धिक्कार छे! धिक्कार छे! जेमके मारी समक्ष आ कुमारनी स्त्रीनुं हरण थयुं, एम जाणे लज्जाथी तेजरहित थयेलो सूर्य बीजा द्वीपमां गयो. ॥ ५३ ॥

ततः संध्यारुणं रेजे लोहगोलनिभं नभः । कुमारविरहज्वालामालाभिरिव तापितम् ॥ ५४ ॥

अन्वयः—ततः कुमार विरह ज्वाला मालाभिः तापितं इव, संध्या अरुणं नभः लोह गोल निभं रेजे. ॥ ५४ ॥

अर्थः—पछी ते कुमारना विरहानलनी ज्वालाओनी श्रेणिओथी जाणे तपेलुं होय नही! तेम संध्याथी लाल थयेलुं आकाश लोखंडना गोळा सरखुं शोभवा लाग्युं. ॥ ५४ ॥

उद्भ्रान्त इव शोकाब्धिः कुमारस्य हृदस्तदा । तमःस्तोममिषाद्व्योमकुक्षिम्भरिरलक्ष्यत ॥ ५५ ॥

अन्वयः-तदा कुमारस्य हृदः उद्भ्रांतः शोक अब्धिः इव तमः स्तोम मिषात् व्योम कुक्षिंभरिः अलक्ष्यत. ॥ ५५ ॥

अर्थः-ते समये ते सनत्कुमारनां हृदयमांथी उछळेलो जाणे शोकनो महासागर होय नही! तेम अंधकारना समूहना मिषथी ते आकाशमां व्यापेलो जोवामां आव्यो. ॥ ५५ ॥

कुमारस्फारनिःश्वासज्वालावलिवशादभूत् । ताराकुलच्छलाद्व्योम्नः स्फुटं पिटकपेटकम् ॥ ५६ ॥

अन्वयः—कुमार स्फार निःश्वास ज्वाला आवलि वशात् तारा कुल च्छलात् व्योम्नः स्फुटं पिटक पेटकं अभूत् . ॥ ५६ ॥

अर्थः—ते कुमारना विस्तीर्ण निःश्वासोनी ज्वालाओनी श्रेणिने लीधे ताराओना समूहना मिषथी आकाशमां प्रगटपणे फोल्लाओनो समूह थइ गयो. ॥ ५६ ॥

मनस्तस्य रतेर्गेहं दहतो विरहानलात् । स्फुलिङ्गा इव निष्पेतुः प्रदीपाः प्रतिमन्दिरम् ॥ ५७ ॥

अन्वयः—रतेः गेहं तस्य मनः दहतः विरह अनलात् स्फुलिंगाः इव प्रतिमंदिरं प्रदीपाः निष्पेतुः ॥ ५७ ॥

अर्थः–रतिना घर सरखां तेनां मनने बाळता एवा विरहाग्निना जाणे तणखाओ (उड्या) होय नहिं ! तेम दरेक घरमां दीपको प्रगट थया. ॥ ५७ ॥

दूरात्तारापथे तारापतिः पतितवानथ । क्षिप्तः कुमारे मारेण यन्त्रोपल इवोज्ज्वलः ॥ ५८ ॥

अन्वयः—अथ कुमारे मारेण क्षिप्तः यंत्र उपल इव उज्ज्वलः तारापतिः दूरात् तारापथे पतितवान्. ॥ ५८ ॥

अर्थः—पछी ते कुमारपर कामदेवे फेंकेलो जाणे गोफणनो पत्थर होय नही ! तेम उज्ज्वल चंद्र दूरदूर आकाशमां जइ पड्यो, (अर्थात् चंद्रनो उदय थयो ) ॥ ५८ ॥

यथा यथा रुचिश्चान्द्री सान्द्रीभूता भुवस्तले । तथा तथाभवत्तस्य म्लानमाननपङ्कजम् ॥ ५९ ॥

अन्वयः—चांद्री रुचिः यथा यथा भुवस्तले सांद्रीभुता, तथा तथा तस्य आननपंकजं म्लानं अभवत्. ॥ ५९ ॥

अर्थः–चंद्रनुं तेज जेम जेम पृथ्वीपीठपर फेलावा लाग्युं, तेम तेम ते सनत्कुमारनुं मुखरूपी कमल झांखुं थवा लाग्युं. ॥ ५९ ॥

सुधारश्मेः सुधाधाराकारा अपि करोत्कराः । कुमारस्यादहन्देहं प्रियास्नेहग्रहं मुहुः ॥ ६० ॥

अन्वयः—सुधारश्मेः सुधा धारा आकाराः करोत्कराः अपि प्रिया स्नेह गृहं कुमारस्य देहं मुहुः अदहन् . ॥ ६० ॥
अर्थः—चंद्रना अमृतधारासरखां किरणोना समूहो पण प्रियतमाना स्नेहना घरसरखां ते सनत्कुमारना शरीरने वारंवार बाळवा लाग्या. ॥ ६० ॥

**अथारतिकरं दूरे परित्यज्य परिच्छदम् । भीतः शीतरुचेः कामं चित्रधाम जगाम सः ॥ ६१ ॥**

अन्वयः—अथ अरतिकरं परिच्छदं दूरे परित्यज्य, शीतरुचेः भीतः सः कामं चित्रधाम जगाम. ॥ ६१ ॥
अर्थः—पछी ते अणगमता परिवारने दूर तजीने, चंद्रथी डरेलो ते सनत्कुमार पोतानी इच्छाथी चित्रशालामां गयो. ॥ ६१ ॥

**स दुःखी यावदेकान्ते कान्ताचिन्तामयोऽभवत् । तावत्पुरः सुरस्त्रीव काप्यभूद् दृक्पथे सुदृक् ॥ ६२ ॥**

अन्वयः—दुःखी सः यावत् एकांते कांता चिंतामयः अभवत्, तावत् पुरः सुरस्त्री इव कापि सुदृक् दृक्पथे अभूत्. ॥ ६२ ॥
अर्थः—(पछी) दुःखी एवो ते कुमार जेवामां एकांते ते स्त्रीनी चिंतामां लीन थयो, तेवामां आगळ देवांगना सरखी कोइक स्त्री तेनी दृष्टिए पडी. ॥ ६२ ॥

**साक्षात्कटाक्षविक्षेपदक्षां प्रेक्षाम्बुधिः स ताम् । आह तत्साहसाक्षिप्तमना मानपराङ्मुखीम् ॥ ६३ ॥**

अन्वयः—प्रेक्षा अंबुधिः, तत्साहस आक्षिप्तमनाः सः साक्षात् कटाक्ष विक्षेप दक्षां, मान पराङ्मुखीं तां आह ॥ ६३ ॥
अर्थः—बुद्धिनो महासागर, तथा तेणीना साहसथी विक्षेपयुक्त मनवाळो ते सनत्कुमार, प्रगटपणे कटाक्षो मारवामां चतुर, तथा

अभिमान रहित एवी ते स्त्रीने कहेवा लाग्यो के, ॥ ६३ ॥

**कासि कल्याणि केन त्वं कार्येणेहागता कुतः । इति पृष्टामुना हृष्टा स्पष्टमाचष्ट सा रसात् ॥ ६४ ॥**

अन्वयः-(हे) कल्याणि! त्वं का असि? केन कार्येण इह कुतः आगता? इति अमुना पृष्टा हृष्टा सा रसात् स्पष्टं आचष्ट. ॥

अर्थः—हे कल्याणि! तुं कोण छे? तथा शा माटे अने क्यांथी अहीं आवी छे? एम तेणे पूछवाथी खुशी थएली ते आनंदथी स्पष्ट कहेवा लागी के, ॥ ६४ ॥

**शृणु सौभाग्यभाग्यैकसिन्धो नेत्रविधूदय । रथनूपुरचक्राख्यं वैताढ्येऽस्ति गिरौ पुरम् ॥ ६५ ॥**

अन्वयः—(हे) सौभाग्य भाग्य एक सिंधो! (हे) नेत्र विधु उदय! वैताढ्ये गिरौ रथनूपुरचक्राख्यं पुरं अस्ति. ॥ ६५ ॥

अर्थः—हे सौभाग्य अने भाग्यना एक महासागरसरखा तथा हे चक्षुओ प्रते चंद्रना उदय सरखा सनत्कुमार! वैताढ्यपर्वतपर रथनूपुरचक्र नामनुं नगर छे. ॥ ६५ ॥

**तत्रास्ति धैर्यनिःसीमो भीमो भीमोहिताहितः । विश्वविद्यानिधिर्विद्याधरचक्री बलोध्धुरः ॥ ६६ ॥**

अन्वयः—तत्र धैर्य निःसीमः, भी मोहित अहितः, विश्व विद्या निधिः, बल उध्धुरः भीमः विद्याधर चक्री अस्ति. ॥ ६६ ॥

अर्थ—ते नगरमां अनहद धैर्यवाळो, भयथी शत्रुओने मूढ करनारो, सर्व विद्याओनो भंडार तथा बळथी गर्विष्ट भीमनामे विद्याधरपति छे. ॥ ६६ ॥

**तत्पट्टमहिषो भानुमतीसंज्ञा कृतीश्वर । त्वद्‌गुणायत्तचित्ताहमिहायाता विहायसा ॥ ६७ ॥**

अन्वयः-( हे ) कृतीश्वर? भानुमती संज्ञा अहं तत्पट्ट महीषी, त्वद्‌गुण आयत्त चित्ता विहायसा इह आयाता. ॥ ६७ ॥

अर्थः—हे चतुरशिरोमणि! भानुमती नामनी हुं तेनी पट्टराणी छुं, अने तारा गुणोमां म्हारुं चित्त चोटवाथी आकाशमार्गे अहीं आवी छुं. ॥ ६७ ॥

**एकदा विशदानन्दः स विमानी समं मया । खेलन्खे तत्र वासन्तीपुर्यां धुर्यो नृणां ययौ ॥ ६८ ॥**

अन्वयः—एकदा विशद् आनंदः, नृणां धुर्यः सः विमानी मया समं खे खेलन् तत्र वासंतीपुर्यां ययौ. ॥ ६८ ॥

अर्थः—एक दिवसे निर्मल आनंदवाळो, तथा मनुष्योमां अग्रेसर एवो ते विद्याधर विमानमां बेसी मारी साथे आकाशमां क्रीडा करतोथको ते वासंतीनगरीमां गयो. ॥ ६८ ॥

**अन्तरिक्षे स्थितोऽद्राक्षीदेष शृङ्गारसुन्दरीम् । अलंकर्तुम्भवत्कठं सोत्कण्ठां वरमालया ॥ ६९ ॥**

अन्वयः-अंतरिक्षे स्थितः एषः, वरमालया भवत्कंठं अलंकर्तुं सोत्कंठां शृंगारसुंदरीं अद्राक्षीत्. ॥ ६९ ॥

अर्थः-आकाशमां रहेला ते भीमविद्याधरे, वरमालाथी आपना कंठने शोभाववाने आतुर थयेली शृंगारसुंदरीने दीठी. ॥ ६९ ॥

**चिद्रूपः स भवद्रूपमायां निर्माय कौतुकात् । त्वदर्धासनमासीनस्तस्थावास्थानमोहकृत् ॥ ७० ॥**

अन्वयः-चिद्रूपः सः कौतुकात् भवद् रूप मायां निर्माय त्वत् अर्धासनं आसीनः आस्थान मोहकृत् तस्थौ. ॥ ७० ॥

अर्थः—मनवांछित रूप धरनारो ते विद्याधर कौतुकथी आपना रूपनी माया करीने आपना अर्धा आसनपर बेसीने सभामंडपना लोकोने भ्रांति उपजाववा लाग्यो. ॥ ७० ॥

**स्वकण्ठन्यस्तमालायां बालायां स विलक्षधीः । अलब्धपिण्डः काकोल इवोत्पत्य वियत्यगात् ॥७१॥**

अन्वयः—बालायां स्व कंठ न्यस्त मालायां विलक्षधीः सः अलब्ध पिंडः काकोलः इव उत्पत्य वियति अगात्. ॥ ७१ ॥

अर्थः—( परंतु ) ते बालाए पोतानाज कंठमां वरमाला नाखवाथी विलखो पडेलो ते विद्याधर, पिंड नही मेळवनारा कागडानीपेठे उडीने आकाशमां चाल्यो गयो. ॥ ७१ ॥

**मया सह सहर्षोऽयमद्य खेलन्निहागतः । ददर्श दर्शनीयाङ्गीं दोलालोलां तव प्रियाम् ॥ ७२ ॥**

अन्वयः—सहर्षः मया सह खेलन् अयं अद्य इह आगतः, दर्शनीय अंगीं, दोला लोलां तव प्रियां ददर्श. ॥ ७२ ॥

अर्थः—हर्षसहित मारी साथे क्रीडा करतोथको ते विद्याधर आजे अहीं आव्यो, ( अने ) मनोहर शरीरवाळी हींचोळापर झुलती तमारी स्त्रीने तेणे दीठी. ॥ ७२ ॥

**किमेतदिति संमोहप्ररोहद्रोहितस्वरा । हृता धृतानुरागेण ततस्तेनाङ्गना तव ॥ ७३ ॥**

अन्वयः—ततः धृत अनुरागेण तेन, एतत् किं इति संमोह प्ररोह द्रोहित स्वरा तव अंगना हृता. ॥ ७३ ॥

अर्थः—पछी धारण करेल छे अनुराग जेणे एवा ते भीमविद्याधरे, आ शुं? एम मुंझवणमां पडवाथी रुंधायो छे कंठ जेणीनो एवी

तमारी स्त्रीनुं तेणे हरण कर्युं. ॥ ७३ ॥

तत्र तद्व्यसनव्यग्रे तव रागग्रहादहम् । त्वत्सेवावसरं यावददृश्यैव दिवि स्थिता ॥ ७४ ॥

अन्वयः–तत्र तद्व्यसन व्यग्रे तव राग ग्रहात् अहं त्वत्सेवा अवसरं यावत् दिवि अदृश्या एव स्थिता. ॥ ७४ ॥

अर्थः–ते मारो स्वामी तेणीनी जंजाळमां व्यग्र थतां, आपपरना रागथी हुं आपनी सेवामाटे राह जोतीथकी आटलो वखत आकाशमां अदृश्यपणेज रही हती. ॥ ७४ ॥

स्वानुरागः स्वतन्त्रेण सुदूरं तेन पूरितः । पूनर्मे परतन्त्रायास्त्वमीशो रागजागरे ॥ ७५ ॥

अन्वयः–स्वतंत्रेण तेन स्व अनुरागः सुदूरं पूरितः, पुनः परतंत्रायाः मे राग जागरे त्वं ईशः ॥ ७५ ॥

अर्थः–स्वतंत्र एवा ते विद्याधरे पोतानो अनुराग तो छेवटे संपूर्ण कर्यो, परंतु परतंत्र एवी जे हुं, तेप्रते राग उत्पन्न करवामाटे आप मालीक छो. ॥ ७५ ॥

तन्नाथ मान्मथैर्बाणैर्मथ्यमानहृदो मम । कारुण्यहरिणारण्य शरण्य शरणीभव ॥ ७६ ॥

अन्वयः–(हे) नाथ! हे कारुण्य हरिण अरण्य! (हे) शरण्य! मान्मथैः बाणैः मथ्यमान हृदः मम शरणी भव? ॥ ७६ ॥

अर्थः–हे स्वामी! हे दयारूपी हरिणने वनसरखा! हे शरण करवा लायक! कामना बाणोथी पीडातां हृदयवाळी जे हुं, तेने तमो आधाररूप थाओ? ॥ ७६ ॥

त्वद्संगानलज्वालावलीढाया दृढं मम। चित्तेश चारुतारुण्य शरण्य शरणीभव ॥ ७७ ॥

अन्वयः—(हे) चित्तईश! हे चारु तारुण्य! हे शरण्य! दृढं त्वत् असंग अनल ज्वाला अवलीढायाः मम शरणीभव? ॥७७॥

अर्थः—(हे) हृदयेश्वर! (हे) मनोहर यौवनवाळा! हे शरण करवा लायक! तमारा वियोगरूपी अग्निनी ज्वालाथी बळती एवी जे हुं, तेना (तमो) रक्षण करनार थाओ? ॥ ७७ ॥

अतुच्छवाञ्छापाथोधिमध्यमग्नस्य मे हृदः। कन्दर्पकेलिनैपुण्य शरण्य शरणीभव ॥ ७८ ॥

अन्वयः—(हे) कंदर्पकेलि नैपुण्य! (हे) शरण्य! अतुच्छ वांछा पाथोधि मग्नस्य मे हृदः शरणी भव? ॥ ७८ ॥

अर्थः—हे कामक्रीडा करवामां विचक्षण! हे शरण करवालायक! घणी इच्छाओरूपी समुद्रमां डुबेला एवा मारा हृदयना (तमो) रक्षण करनार थाओ? ॥ ७८ ॥

ममान्यासक्तचित्तेन पत्या संतप्तचेतसः। अगण्यपुण्यलावण्य शरण्य शरणीभव ॥ ७९ ॥

अन्वयः—(हे) अगण्य पुण्य लावण्य! (हे) शरण्य! अन्य आसक्त चित्तेन पत्या संतप्त चेतसः मम शरणी भव? ॥ ७९ ॥

अर्थः-हे अगणीत पवित्र लावण्यवाळा! हे शरण करवालायक! अन्य स्त्रीमां आसक्त मनवाळा पतिथी तपेलां हृदयवाळी जे हुं तेना (तमो रक्षक थाओ)? ॥ ७९ ॥

इत्याकर्ण्य सुवर्णश्रीसकर्णामृतवर्णिकाम्। तत्त्वज्ञः सत्त्ववानूचे वाचं वाचंयमोचिताम् ॥ ८० ॥

अन्वयः-इति आकर्ण्य तत्त्वज्ञः सत्त्ववान् सुवर्ण श्री सकर्ण अमृतवर्णिकां वाचंयम उचितां वाचं ऊचे. ॥ ८० ॥

अर्थः-एम सांभळीने तत्त्वज्ञानी तथा हिम्मतवान ( एवो ते सनत्कुमार ) उत्तम अक्षरोनी शोभाथी विद्वानोमाटे अमृतना नमुना सरखी, तथा मुनिने बोलवा लायक वाणी बोल्यो के. ॥ ८० ॥

**मुग्धे धर्मस्य सर्वस्वं न वेत्सीति वदस्यदः । तत्त्वज्ञैरिन्दुलीलस्य रक्षा शीलस्य शस्यते ॥ ८१ ॥**

अन्वयः-(हे) मुग्धे! धर्मस्य सर्वस्वं न वेत्सि, इति अदः वदसि, इन्दु लीलस्य शीलस्य रक्षा तत्त्वज्ञैः शस्यते. ॥ ८१ ॥

अर्थः—हे मुग्धे! तुं धर्मनुं रहस्य नथी जाणती, अने तेथी ( तुं ) आम बोले छे. चन्द्र सरखा निर्मल शीलनी रक्षानी ज्ञानीओए प्रशंसा करी छे. ॥ ८१ ॥

**परस्त्रीसंगनामानमुल्लसत्पङ्कसंकुलम् । तत्कथं सुपथां पान्थैस्त्यक्तं पन्थानमाश्रये ॥ ८२ ॥**

अन्वयः—तत् उल्लसत् पंक संकुलं, सुपथां पांथैः त्यक्तं परस्त्री संग नामानं पंथानं कथं आश्रये? ॥ ८२ ॥

अर्थः—माटे उभराइ जतां पापोथी (कादवथी) भरेला, तथा उत्तम मार्गे चालनारा सज्जनोए तजेला परस्त्रीना संगरूप मार्गने हुं केम स्वीकारुं? ॥ ८२ ॥

**वाञ्छन्ति पररम्भोरूपरिरम्भेण ये सुखम् । उदारैः खदिराङ्गारैः शृङ्गारं स्पृहयन्ति ते ॥ ८३ ॥**

अन्वयः—पर रंभा ऊरू परिरंभेण ये सुखं वांछंति, ते उदारैः खदिर अंगारैः शृंगारं स्पृहयंति. ॥ ८३ ॥

अर्थः—परस्त्रीना साथळना आलिंगनवडे जेओ सुखने इच्छे छे, तेओ धगधगता खेरना अंगाराओवडे ( शरीरपर ) शृंगार करवाने इच्छे छे. ॥ ८३ ॥

**यदि सत्येन चित्तेऽहं तव प्रिय इति स्थितः । तत्किमर्थयसे दुःखसंमुखाय सुखाय माम् ॥ ८४ ॥**

अन्वयः—यदि सत्येन तव चित्ते अहं प्रियः इति स्थितः, तत् दुःखसंमुखाय सुखाय मां किं अर्थयसे ? ॥ ८४ ॥

अर्थः—जो खरेखर तारा हृदयमां हुं प्रिय थइ पड्यो होउं, तो दुःख छे सन्मुख जेमां एवां सुख माटे तुं मने केम प्रार्थना करेछे?

**अहो परनरासक्तिर्व्यक्तं युक्ता तवापि न । कुलीनापि विलीनासि किमस्मिन्कश्मले मले ॥ ८५ ॥**

अन्वयः—अहो ! तव अपि व्यक्तं पर नर आसक्तिः युक्ता न, कुलीना अपि अस्मिन् कश्मले मले किं विलीना असि ? ८५.

अर्थः—अहो ! तने पण प्रगटरीते पर पुरुषमां आसक्ति राखवी योग्य नथी, तुं कुलीन थइने पण आवी गंदी मलीनतामां केम रक्त थइ छे ? ॥ ८५ ॥

**तदिदं धर्महृत्कर्म विद्याधरि परित्यज । भज शीलं यतः कीर्तिरत्रामुत्र च निर्वृतिः ॥ ८६ ॥**

अन्वयः—तत् (हे) विद्याधरि ! इदं धर्महृत् कर्म परित्यज ? शीलं भज ? यतः अत्र कीर्तिः, च अमुत्र निर्वृतिः. ॥ ८६ ॥

अर्थः—माटे हे विद्याधरि ! आ धर्मने हरनारुं कार्य तजी दे ? अने शीलने धारण कर ? के जेथी आ लोकमां कीर्ति अने परलोकमां मुक्ति ( मळशे. ) ॥ ८६ ॥

सद्धर्ममूलं या शीलं सेवते देवतेव सा । महनोया महेच्छानामप्यत्रापि भवे भवेत् ॥ ८७ ॥

अन्वयः—या सद्धर्म मूलं शीलं सेवते, सा देवता इव महेच्छानां अपि, अत्र अपि महनीया भवेत् . ॥ ८७ ॥

अर्थः-जे स्त्री उत्तम धर्मना मूलरूप शीलने पाळे छे, ते देवीनी पेठे महान् पुरुषोने पण आ लोकमांज पूजनीक थाय छे. ॥

सौख्यं भर्तृभयान्नात्र नामुत्र वृजिनव्रजात् । तत्त्वं वद हृदस्तत्त्वं किं वरं परपूरुषे ॥ ८८ ॥

अन्वयः—अत्र भर्तृ भयात् सौख्यं न, अमुत्र वृजिन व्रजात् न, तत् त्वं हृदः तत्त्वं वद? परपूरुषे किं वरं? ॥ ८८ ॥

अर्थः—(व्यभिचारथी) आ लोकमां भर्तारना भयथी सुख मळतुं नथी, अने परलोकमां पापोना समूहथी मळतुं नथी. तो तुं मनथी तत्त्व विचारीने कहे के, परपुरुषने सेववाथी शो लाभ छे?

एवं वचःसुधासारैः कुमारेन्दोरुदित्वरैः । तस्या मनसि विध्यातो वह्निर्मारविकारजः ॥ ८९ ॥

अन्वयः—एवं कुमार इन्दोः उदित्वरैः वचः सुधा आसारैः तस्याः मनसि काम विकारजः वह्निः विध्यातः ॥ ८९ ॥

अर्थः—एरीते ते सनत्कुमाररूपी चंद्रमांथी प्रगटेला वचनोरूपी अमृतनां छटकावथी तेणीना हृदयमां कामविकारथी उत्पन्न थयेलो अग्नि बूझाइ गयो. ॥ ८९ ॥

चिन्तयामास साप्येवमहो मे भाग्यसंचयः । पापारम्भोऽप्ययं पुण्यव्रजाय यदजायत ॥ ९० ॥

अन्वयः—सा अपि एवं चिंतयामास, अहो! मे भाग्य संचयः! यद् अयं पाप आरंभः अपि पुण्य व्रजाय अजायत. ॥ ९० ॥

अर्थः—ते पण एम विचारवा लागी के, अहो! हजु मारां भाग्योनो समूह छे! के जेथी आ पापनो प्रारंभ पण पुण्योना समूह माटे थयो? ॥ ९० ॥

**अयं धर्मगुरुर्मेऽभूत्तदस्मै गुरुदक्षिणाम्। दास्ये विद्यावलीं विद्याधरैश्वर्यपदप्रदाम् ॥ ९१ ॥**

अन्वयः-अयं मे धर्म गुरुः अभूत्, तत् अस्मै गुरु दक्षिणां विद्याधर ऐश्वर्यप्रदां विद्या आवलीं दास्ये. ॥ ९१ ॥

अर्थः-आ सनत्कुमार मारा धर्मगुरु थया, माटे तेने गुरुदक्षिणातरिके विद्याधरनी समृद्धि आपनारी विद्याओनी श्रेणि हुं आपीश.

**स्वभावबलिना विद्याबलोग्रेणाधुनामुना। प्रियाहृतिविरोधेन सक्रोधेन धृतो युधि ॥ ९२ ॥**

**सर्वथा वितथारम्भो मत्पतिर्निरहंकृतिः। यदि श्रयति सन्मार्गमहो सोऽपि महो मम ॥ ९३ ॥युग्मम्॥**

अन्वयः—स्वभाव बलिना, अधुना विद्या बल उग्रेण, प्रिया धृति विरोधेन सक्रोधेन अमुना युधि धृतः, ॥ ९२ ॥ मत्पतिः यदि सर्वथा वितथ आरंभः निरहंकृतिः सन्मार्गं श्रयति, अहो! सः अपि मम महः ॥ ९३ ॥ युग्मं ॥

अर्थः—स्वभावथीज बलवान, अने हवे विद्याओना बळथी उग्र बनेला, तथा पोतानी स्त्रीने उपाडी जवाना वैरथी क्रोधायमान थयेला एवा आ सनत्कुमारे युद्धमां पकडेलो, ॥ ९२ ॥ एवो मारो स्वामी जो (हवे कदाच) सर्वथा प्रकारे निष्फल प्रयासवाळो, तथा अहंकाररहित थइने सारे मार्गे चडशे, तो अहो! ते पण मने लाभज (थयेलो हुं मानीश.) ॥ ९३ ॥ युग्मं ॥

**इति निश्चित्य चित्ते साभ्यर्थ्य सप्रश्रयोक्तिभिः। कुमारायानवद्याय ददौ विद्यां यथाविधि ॥ ९४ ॥**

अन्वयः-इति चित्ते निश्चित्य, सप्रश्रय उक्तिभिः अभ्यर्थ्य सा अनवद्याय कुमाराय यथाविधि विद्यां ददौ. ॥ ९४ ॥

अर्थः-एम मनमां निश्चय करीने, तथा प्रेमाळ वचनोथी प्रार्थना करीने ते विद्याधरीए ते निर्दोष कुमारने विधिपूर्वक विद्या आपी.

**सा तस्माद्धर्ममासाद्य सद्यो विद्यास्ततश्च सः । अहम्पूर्विकयान्योन्यं गुरुत्वान्नेमतुर्मुदा ॥ ९५ ॥**

अन्वयः-सा तस्मात् धर्मं, च सः ततः सद्यः विद्याः आसाद्य, अहंपूर्विकया अन्योन्यं गुरुत्वात् मुदा नेमतुः. ॥ ९५ ॥

अर्थः-ते विद्याधरीए ते कुमारपासेथी धर्मने, तथा ते कुमारे तेणीनी पासेथी तुरत विद्या मेळवीने, हुं पेहेलां हुं पहेलां एम परस्पर गुरुबुद्धिथी हर्षवडे नमवा लाग्या. ॥ ९५ ॥

**अथापृच्छ्य कुमारं सा रंहसा स्वपुरीमगात् । दधौ च तद्वचः स्मृत्वा वपुः सपुलकं मुहुः ॥ ९६ ॥**

अन्वयः—अथ कुमारं आपृच्छ्य सा रंहसा स्वपुरीं अगात्, च तद्वचः स्मृत्वा मुहुः सपुलकं वपुः दधौ. ॥ ९६ ॥

अर्थः—पछी कुमारनी रजा लेइने ते विद्याधरी झडपथी पोतानी नगरीमां गइ, अने ते कुमारनुं वचन याद करीने वारंवार रोमांचित शरीरने धारण करवा लागी. ॥ ९६ ॥

**सिद्धां विद्येश्वरीं प्राज्ञः प्रज्ञप्तिं स्मरणागताम् । स पप्रच्छ प्रियालापैः प्रियावृत्तान्तमुन्मनाः ॥ ९७ ॥**

अन्वयः—सः प्राज्ञः उन्मनाः स्मरण आगतां सिद्धां प्रज्ञप्तिं विद्या ईश्वरीं प्रिय आलापैः प्रिया वृत्तांतं पप्रच्छ. ॥ ९७ ॥

अर्थः—(पछी) ते चतुर तथा उचक मनवाळा सनत्कुमारे याद करतांज हाजर थयेली अने सिद्ध थयेली प्रज्ञप्तिनामनी विद्या-

धिष्ठायिकाने मधुर शब्दोवडे पोतानी स्त्रीनो वृत्तांत पूछ्यो, ॥ ९७ ॥

कुमारकर्णपीयूषसारणीसारया गिरा । अवोचदुचितं वाच्यमथ विद्याधिदेवता ॥ ९८ ॥

अन्वयः—अथ विद्या अधिदेवता कुमार कर्ण पीयूष सारणी सारया गिरा उचितं वाच्यं अवोचत्. ॥ ९८ ॥

अर्थः—पछी विद्यानी अधिष्ठात्री एवी ते प्रज्ञप्तिविद्यादेवीए ते कुमारना कर्णोमां अमृतनी नीकसरखी वाणीवडे योग्य वचन कह्युं के,

नीत्वा निजपुरारामे भीमेन भवतः प्रिया । इत्यूचे खेचरेन्द्रेण पटुभिश्चटुभाषितैः ॥ ९९ ॥

अन्वयः—भीमेन खेचर इंद्रेण भवतः प्रिया निजपुर आरामे नीत्वा पटुभिः चाटु भाषितैः इति ऊचे. ॥ ९९ ॥

अर्थः—ते भीम खेचराधीशे तमारी स्त्रीने पोताना नगरपासेना बगीचामां लेइ जइने मनोहर तथा मीठां वचनोवडे एम कह्युं के.

मुग्धे मुधा सुधारश्मिसमानं कथमाननम् । कलङ्कयित्वा कुरुषे दृग्जलैः सज्जकज्जलैः ॥ १३०० ॥

अन्वयः—(हे) मुग्धे! सज्ज कज्जलैः दृग्जलैः मुधा कलंकयित्वा आननं सुधा रश्मि समानं कथं कुरुषे? ॥ १३०० ॥

अर्थः—हे मुग्ध! काजळयुक्त अश्रुजलवडे फोकट डाघावाळुं करीने तुं तारुं मुख चंद्र सरखुं शामाटे (कलंकित) करे छे? ॥

मयि दासेऽप्यविश्वासान्निःश्वासानलकेलिभिः । किं बाले ज्वालयस्यङ्गं शिरीषसुमकोमलम् ॥ १ ॥

अन्वयः—हे बाले! दासे अपि मयि अविश्वासात् निःश्वास अनल केलिभिः शिरीष सुम कोमलं अंगं किं ज्वालयसि? ॥ १ ॥

अर्थः—हे बालिका! (तारा) दाससरखो एवो पण जे हुं, तेपर अविश्वास लावीने निसासानी अग्निज्वाळाथी सरसवना पुष्प सरखां (तारां) कोमळ शरीरने शामाटे बाळे छे? ॥ १ ॥

किमादेशकरं देवि मामिन्दीवरलोचने । नालोकयस्यमूँल्लोकान्कुर्वतीन्दीवराकरान् ॥ २ ॥

अन्वयः—(हे) देवी! (हे) इंदीवर लोचने! अमून् लोकान् इंदीवर आकरान् कुर्वती आदेशकरं मां किं न आलोकयसि?

अर्थः—हे देवि! हे कमलमुखी! आ लोकोने श्याम कमलोनी खाणरूप (झंखवाणा) करतीथकी (तारो) तावेदार जे हुं, तेना तरफ केम जोती नथी? ॥ २ ॥

नाविष्करोषि किं तोषाद्वदने सुदति स्मितम् । मदङ्गेऽनङ्गदाहार्ते सुधासेचनसन्निभम् ॥ ३ ॥

अन्वयः—हे सुदति! अनंग दाह आर्ते मदंगे सुधा सेचन सन्निभं तोषात् वदने स्मितं किं न आविष्करोषि? ॥ ३ ॥

अर्थः—हे उत्तम दांतोवाळी! कामाग्निथी पीडित थयेलां मारां शरीरपर अमृतना सिंचन सरखुं आनंदथी (तारां) मुखपर (तुं) हास्य केम प्रगट करती नथी? ॥ ३ ॥

धात्रीशमात्रपुत्रस्य विरहेऽप्यातुरासि किम् । इदं विद्याधरैश्वर्यं भुजिष्येण मया भज ॥ ४ ॥

अन्वयः—धात्री ईश मात्र पुत्रस्य विरहे किं आतुरा असि? भुजिष्येण मया इदं विद्याधर ऐश्वर्यं भज? ॥ ४ ॥

अर्थः—फक्त एक पृथ्वीपरनाज राजपुत्रना विरहथी तुं केम व्याकुळ थइ गइ छे? भोगो भोगववामाटे लायक एवो जे हुं, तेनी साथे ( रहीने ) विद्याधरनी समृद्धिने ( तुं ) भोगव? ॥ ४ ॥

**इत्यालापी तया पापी मौनेनैव न्यषेधि सः । वार्योऽवगुण्ठनेनैव सरजस्को हि मारुतः ॥ ५ ॥**

अन्वयः—-इति आलापी सः पापी तया मौनेन एव न्यषेधि, हि सरजस्कः मारुतः अवगुंठनेन एव वार्यः. ॥ ५ ॥

अर्थः—एम बोलता एवा ते पापीनो तेणीए मौनवडेज तिरस्कार कर्यो, केमके धूड उडाडता पवनने वस्त्रना आवरणथीज अटकाववो जोइए ॥ ५ ॥

**विद्याछेदभयात्तस्याः सत्याः शापभयाच्च सः । शीललीलाविलोपाय बलात्कारं चकार न ॥ ६ ॥**

अन्वयः—विद्या छेद भयात्, च सत्याः शाप भयात् सः शील लीला विलोपाय बलात्कारं न चकार. ॥ ६ ॥

अर्थः—विद्याओना विनाशना भयथी, तेमज ते सतीना श्रापना भयथी तेणे ( तेणीनी ) शीलक्रीडाना नाश माटे ( तेणीपर ) बलात्कार कर्यो नही. ॥ ५६ ॥

**श्रुत्वेति भीमरोषेण प्रियाशीलमदेन च । द्वौ संकीर्णौ रसौ भेजे स प्रगल्भो यथा नटः ॥ ७ ॥**

अन्वयः—इति श्रुत्वा भीम रोषेण, च प्रिया शील मदेन यथा प्रगल्भः नटः, सः संकीर्णौ द्वौ रसौ भेजे. ॥ ७ ॥

अर्थः—एम सांभळीने भीमपरना क्रोधथी, तथा ( पोतानी ) स्त्रीना शीलसंबंधी हर्षथी विदूषक नटनीपेठे ते सनत्कुमार सेळभेळ थयेला बन्ने रसने भजवा लाग्यो. ॥ ७ ॥

**अथायं विद्यया सद्यो विद्याधरगिरिं गतः । रथनूपुरचक्राख्यपुरोद्यानं समासदत् ॥ ८ ॥**

अन्वयः-अथ अयं सद्यः विद्यया विद्याधर गिरिं गतः, रथनूपुर चक्र आख्य पुर उद्यानं समासदत्. ॥ ८ ॥

अर्थः—पछी ते सनत्कुमार तुर्त विद्यावडे करीने वैताढ्य पर्वतपर गयो, तथा (त्यां) रथनूपुरचक्र नामना नगर पासे रहेला बगीचामां जइ पहोंच्यो. ॥ ८ ॥

**तत्र चित्रगिरः श्रुत्वा निष्ठुराः करुणाश्च सः । पश्यन्नदृश्यीभूयाग्रे भीमं भार्यां च दृष्टवान् ॥ ९ ॥**

अन्वयः—तत्र निष्ठुराः च करुणाः चित्र गिरः श्रुत्वा, अदृश्यीभूय अग्रे पश्यन् सः भीमं च भार्यां दृष्टवान्. ॥ ९ ॥

अर्थः—(पछी) त्यां निर्दय अने दयायुक्त एम नाना प्रकारनी वाणी सांभळीने, अदृश्य थइ आगळ जोतां थकां तेने ते भीम विद्याधरने तथा (पोतानी) स्त्री शृंगारसुंदरिने जोयां. ॥ ९ ॥

**कालेऽस्मिन्करवालेन भीमो भीमोऽभ्यधादिमाम् । न मन्यसे मां हन्यासि तदिष्टां देवतां स्मर ॥१०॥**

अन्वयः—अस्मिन् काले करवालेन भीमः भीमः इमां अभ्यधात्, मां न मन्यसे, हन्या असि, तत् इष्टां देवतां स्मर? ॥१०॥

अर्थः—आ समये तलवारथी भयंकर थयेलो ते भीमविद्याधर तेणीने कहेतो हतो के, तुं मारुं वचन जो नही माने, तो तने मारी नाखुं छुं, माटे (तारा) इष्ट देवनुं तुं स्मरण कर? ॥ १० ॥

**अथाभाषत नाभाकतनया नयनायिका। शरणं सिंहसूनुर्मे स्त्रियो हि पतिदेवताः ॥ ११ ॥**

अन्वयः—अथ नय नायिका नाभाक तनया अभाषत, मे सिंहसूनुः शरणं, हि स्त्रियः पति देवताः ॥ ११ ॥

अर्थः—पछी न्यायथी शिरोमणि एवी नाभाकराजानी पुत्री ते शृंगारसुंदरीए कह्युं के, ( मने तो ) सिंहराजाना पुत्र सनत्कुमारनुं शरणुं छे, केमके स्त्रीओ पतिनेज देवतरीके माने छे. ॥ ११ ॥

**सैंहिनामग्रहादेष विशेषकुपितस्ततः। निस्त्रिंशः कृष्टनिस्त्रिंशस्तद्वधायोद्धतोऽस्फुरत् ॥ १२ ॥**

अन्वयः—सैंहि नाम ग्रहात् एषः विशेष कुपितः, ततः कृष्टनिस्त्रिंशः उद्धतः तद्वधाय अस्फुरत् ॥ १२ ॥

अर्थः—सनत्कुमारनुं नाम लेवाथी ते विद्याधर अति क्रोधातुर थयो, अने पछी तलवार खेंचीने निर्दय तथा उद्धत थइ तेणीने मारवा माटे तैयार थयो ॥ १२ ॥

**आः पाप कुरुषे किं रे म्रियसे म्रियसेऽधुना। इत्युच्चैरुच्चरन् राजसूनुराविरभूत्तदा ॥ १३ ॥**

अन्वयः—आः पाप! किं कुरुषे? रे! अधुना म्रियसे म्रियसे इति उच्चैः उच्चरन् तदा राजसूनुः आविरभूत् ॥ १३ ॥

अर्थः—अरे! पापी! तुं (आ) शुं करे छे? अरे! हमणा मरीश मरीश, एम म्होटे स्वरे बोलतो ते राजपुत्र सनत्कुमार तेज समये (त्यां) प्रगट थयो. ॥ १३ ॥

आकस्मिकभयाद् भ्रष्टः खड्गो भीमस्य हस्ततः। परदाररिरंसूनामूना हि बलसंपदः ॥ १४ ॥

अन्वयः—आकस्मिक भयात् भीमस्य हस्ततः खड्गः भ्रष्टः, हि परदार रिरंसूनां बल संपदः ऊनाः. ॥ १४ ॥

अर्थः—अचानक भय थवाथी ते भीमना हाथमांथी तलवार पडी गइ. केमके परस्त्रीलंपटोनी बलनी समृद्धि न्यून होय छे. १४

कृपाणं पाणिना वीर गृहाण विग्रहाण माम्। एवमप्रहरन्नेव क्षत्रपुत्रो रिपुं जगौ ॥ १५ ॥

अन्वयः—(हे) वीर! पाणिना कृपाणं गृहाण? मां विग्रहाण? एवं क्षत्र पुत्रः अप्रहरन् एव रिपुं जगौ. ॥ १५ ॥

अर्थः—हे शूरवीर हाथमां तलवार पकड? अने मारी साथे युद्ध कर? ए रीते क्षत्रीयपुत्र ते सनत्कुमार (पोते) प्रहार कर्या विनाज ते शत्रुने कहेवा लाग्यो. ॥ १५ ॥

ततः प्रततलज्जेन रणासज्जेन चेतसा। अचिन्तयदयं विद्याधरनाथस्तथा स्थितः ॥ १६ ॥

अन्वयः—ततः तथा स्थितः विद्याधर नाथः प्रतत लज्जेन रण असज्जेन चेतसा अचिंतयत्. ॥ १६ ॥

अर्थः—पछी तेमज स्थिर थइ गयेलो ते विद्याधरपति लज्जायुक्त, तथा युद्धमाटे तैयार नही थयेलां हृदयथी विचारवा लाग्यो के,

खुरलीमध्यमभ्यास्य सकलोऽस्त्रकलोत्करः । आजन्म यो मयाभ्यस्तः प्रस्तावे त्रस्त एव सः ॥ १७ ॥

अन्वयः—खुरली मध्यं अध्यास्य आजन्म यः अस्त्र कला उत्करः मया अभ्यस्तः, सः सकलः प्रस्तावे एव त्रस्तः. ॥ १७ ॥

अर्थः—कसरतशाळामां रहीने छेक जन्मथी मांडीने जे शस्त्रकलाना समूहनो में अभ्यास कर्यो हतो, ते सघळो आ खरे समयेज नष्ट थयो. ॥ १७ ॥

अकृत्यं तावदेकं मे परस्त्री यदियं हृता । द्वितीयं तु त्रपाकारि भ्रष्टं युधि यदायुधम् ॥ १८ ॥

अन्वयः-यत् इयं परस्त्री हृता, मे तावत् एकं अकृत्यं, युधि यत् आयुधं भ्रष्टं, द्वितीयं तु त्रपाकारि ॥ १८ ॥

अर्थः-जे आ परस्त्रीनुं में हरण कर्युं, ते मारुं एक अकार्य थयुं, तथा आ युद्धसमये जे मारुं शस्त्र (हाथमांथी) सरी पडयुं, ते आ बीजुं लज्जास्पद थयुं. ॥ १८ ॥

तदहं निरहंकारः कथमाननमात्मनः । दर्शयिष्यामि वश्यासु निजं स्वान्तःपुरीष्वपि ॥ १९ ॥

अन्वयः—तत् निरहंकारः अहं वश्यासु स्व अंतःपुरीषु अपि आत्मनः आननं कथं दर्शयिष्यामि ? ॥ १९ ॥

अर्थः-तेथी (हवे) अभिमान रहित थयेलो एवो हुं, मारी वशवर्ती (बीजी) राणीओने पण मारुं मुख शीरीते बतावी शकीश ?

तदीदृशीं दशां नीतो यैरहं हन्त कर्मभिः । तान्येव रिपुरूपाणि जेतुमुद्यममाश्रये ॥ २० ॥

अन्वयः—तत् हंत यैः कर्मभिः अहं ईदृशीं दशां नीतः, रिपुरूपाणि तानि एव जेतुं उद्यमं आश्रये. ॥ २० ॥

अर्थः—माटे अरेरे ! जे कर्मोए मने आवी दशाए पहोंचाड्यो, एवां शत्रुरूप ते कर्मोनेज जीतवामाटे (हवे) हुं उद्यम करुं. ॥२०॥

**इति ध्यात्वा कुमारं तं क्षमयित्वा प्रियायुतम् । पुण्ये विद्याधरारण्ये व्रतं तापसमाप सः ॥ २१ ॥**

अन्वयः—इति ध्यात्वा प्रियायुतं तं कुमारं क्षमयित्वा सः पुण्ये विद्याधर अरण्ये तापसं व्रतं आप. ॥ २१ ॥

अर्थः—एम विचारीने शृंगारसुन्दरी सहित ते सनत्कुमारने खमावीने ते भीम विद्याधरे विद्याधरोना पवित्र अरण्यमां ( जइ ) तापसव्रत अंगीकार कर्युं. ॥ २१ ॥

**निशम्य भीमवृत्तान्तं क्षणादारामरक्षकात् । भ्रान्ता भानुमती यावत्तदुद्यानं समासदत् ॥ २२ ॥**

**पुरतः पुरतस्तावद्धावमानजनोत्थितः । तुमुलः समभूद्भीष्मो ग्रीष्मेऽम्भोधिरिवाधिकः ॥ २३ ॥युग्मम्॥**

अन्वयः—क्षणात् आराम रक्षकात् भीम वृत्तांतं निशम्य भ्रांता भानुमती यावत् उद्यानं समासदत्. ॥ २२ ॥ तावत् पुरतः ग्रीष्मे अंभोधिः इव पुरतः धावमान जन उत्थितः भीष्मः तुमुलः समभूत् ॥ २३ ॥ युग्मं ॥

अर्थः—क्षणवारमां बगीचाना चोकीदार पासेथी (पोताना स्वामी) भीम विद्याधरनुं ते वृत्तांत सांभळीने गभराटमां पडेली भानुमती जेवामां ते बगीचामां आवी, ॥ २२ ॥ तेवामां आगळना भागमां, ग्रीष्मऋतुना महासागरनी पेठे, नगरमांथी नासभाग करता माणसोथी उत्पन्न थयेलो भयंकर कोलाहल थयो. ॥ २३ ॥ युग्मं ॥

इतः सनत्कुमारोऽपि प्रियालापशतैः प्रियाम् । शुद्धशीलां समाश्वास्य स्वपुराभिमुखोऽभवत् ॥ २४ ॥

अन्वयः-इतः सनत्कुमारः अपि प्रिय आलाप शतैः शुद्ध शीलां प्रियां समाश्वास्य स्वपुर अभिमुखः अभवत् ॥ २४ ॥

अर्थः—एवामां ते सनत्कुमार पण सेंकडोगमे मिष्ट वचनोथी निर्मल शीलवाळी ( पोतानी ) प्रियाने शांत करीने पोताना नगर तरफ जवाने तैयार थयो. ॥ २४ ॥

तं तथा प्रस्थितं प्रेक्ष्य भीता भीमप्रियाऽवदत् । विपक्षेभ्यः कृपादक्ष रक्ष रक्ष पुरीमिति ॥ २५ ॥

अन्वयः-तं तथा प्रस्थितं प्रेक्ष्य भीता भीमप्रिया इति अवदत्, ( हे ) कृपादक्ष ! विपक्षेभ्यः पुरीं रक्ष? ॥ २५ ॥

अर्थः-तेने आवीरीते पयाण करतो जोइने भयभीत थयेली ते भीम विद्याधरनी स्त्री एम कहेवा लागी के, हे दयाळु सनत्कुमार तमो शत्रुओथी मारी नगरीनुं रक्षण करो! रक्षण करो ? ॥ २५ ॥

इमं मद्भर्तृवृत्तान्तं जानन्तः खेचरेश्वराः । भीमारयो रयोत्तुङ्गाः पुरभङ्गार्थमागमन् ॥ २६ ॥

अन्वयः-इमं मद्भर्तृ वृत्तांतं जानंतः भीम अरयः खेचर ईश्वराः रय उत्तुंगाः पुर भंगार्थ आगमन्. ॥ २६ ॥

अर्थः—मारा स्वामीनो आ वृत्तांत जाणीने, तेना दुश्मन खेचराधीशो एकदम उतावळा आ नगरनो नाश करवामाटे आवी पहोंच्या छे. ॥ २६ ॥

इत्युक्तः स तया सद्यो दयाहृद्यो दयाशयः । पुरीरक्षामुरीकृत्य ववले प्रबलायुधः ॥ २७ ॥

अन्वयः–तया इति उक्तः दया हृद्यः, दया आशयः, प्रबल आयुधः सः पुरी रक्षां उरीकृत्य ववले. ॥ २७ ॥

अर्थः–तेणीए एम कहेवाथी दयालु अने दयाना आशयवाळो, तथा बलवान शस्त्रोवाळो एवो ते सनत्कुमार ते नगरनुं रक्षण करवानुं माथे लेइ (त्यांथी) पाछो वळ्यो. ॥ २७ ॥

**म्रियध्वं मा म्रियध्वं मा रे रे पत्तनभञ्जकाः । तमित्युग्रगिरं चन्द्ररत्नचूडौ प्रणेमतुः ॥ २८ ॥**

अन्वयः— रे रे! पत्तन भंजकाः! मा म्रियध्वं? मा म्रियध्वं? इति उग्रगिरं तं चंद्ररत्नचूडौ प्रणेमतुः. ॥ २८ ॥

अर्थः–अरे! नगरनो नाश करनाराओ! तमो मरो नही? मरो नही? एरीते भयंकर वाणी उच्चारता एवा ते सनत्कुमारने चंद्रचूड तथा रत्नचूड नामना बन्ने विद्याधरो (आवीने) नम्या. ॥ २८ ॥

**एतयोः पृच्छतोः प्रीत्या शेखरीकृतहस्तयोः । स्ववृत्तान्तं निवृत्तान्तस्तापः क्ष्मापजनिर्जगौ ॥ २९ ॥**

अन्वयः–शेखरीकृत हस्तयोः पृच्छतोः एतयोः निवृत्त अंतः तापः क्ष्माप जनिः स्ववृत्तांतं जगौ. ॥ २९ ॥

अर्थः–(पछी) मुकुटरूप करेल छे एटले मस्तकपर जोडेल छे बन्ने हाथ जेओए, अने पूछता एवा ते बन्ने विद्याधरोने, गयेल छे हृदयनो संताप जेनो, एवा ते राजपुत्र सनत्कुमारे पोतानुं वृत्तांत कही संभळाव्युं. ॥ २९ ॥

**कुमारमथ तौ हर्षपथतूर्यत्विषा गिरा । तमूचतुश्चतुर्वर्गसंवर्गणगुणोदयम् ॥ ३० ॥**

अन्वयः—अथ तौ हर्ष पथ तूर्य त्विषा गिरा चतुर्वर्ग संवर्गण गुण उदयं तं कुमारं ऊचतुः. ॥ ३० ॥

अर्थः—पछी ते बन्ने विद्याधरो हर्षना मार्गमां वाजित्र सरखी वाणी वडे ( धर्मआदिक ) चारे वर्गोना पृथक्करणसंबंधि गुणना उदयवाळा एवा ते सनत्कुमारने कहेवा लाग्या के, ॥ ३० ॥

**अन्वहं नन्वहंकारभृता खेचरचक्रिणा । वैरिणा कारणाभावादावामेतेन ताडितौ ॥ ३१ ॥**

अन्वयः—ननु अहंकारभृता एतेन वैरिणा खेचरभृता कारण अभावात् आवां अन्वहं ताडितौ. ॥ ३१ ॥

अर्थः—अरे! अभिमानी एवा आ ( अमारा ) शत्रु भीमविद्याधरे कारण विनाज अमोने हमेशां मार्या छे. ॥ ३१ ॥

**तदीदृशदशस्यास्य द्रङ्गभङ्गार्थमागतौ । ऋणस्येव न वैरस्य यतो जायेत जीर्णता ॥ ३२ ॥**

अन्वयः—तत् ईदृशदशस्य अस्य द्रंग भंगार्थं आगतौ, यतः ऋणस्य इव वैरस्य जीर्णता न जायेत. ॥ ३२ ॥

अर्थः—माटे आ दशाए पहोंचेला एवा ते भीम विद्याधरना नगरनो नाश करवामाटे अमो आव्या छीये, केमके करजनीपेठे वेरनी जीर्णता थती नथी. ॥ ३२ ॥

**त्वं चेत्पुनः पुरस्यास्य त्रायकः क्षत्रनायकः । तत्त्राता भव दासेरभावयोरावयोरपि ॥ ३३ ॥**

अन्वयः—पुनः चेत् क्षत्र नायकः त्वं अस्य पुरस्य त्रायकः, तत् दासेर भावयोः आवयोः अपि त्राता भव? ॥ ३३ ॥

अर्थः—परंतु जो क्षत्रीयशिरोमणि एवा तमो आ नगरना रक्षक थया छो, तो उंटसरखा जे अमो, तेना पण तमो रक्षक थाओ?

इत्युक्त्वा तौ मुदाभोगभासुरौ भूपजन्मनः । तस्य खेचरचक्रित्वाभिषेकं तत्र चक्रतुः ॥ ३४ ॥

अन्वयः—इति उक्त्वा मुद् आभोग भासुरौ तौ तस्य भूपजन्मनः तत्र खेचर चक्रित्व अभिषेकं चक्रतुः ॥ ३४ ॥

अर्थः—एम कहीने हर्षना आवेशथी दीपता एवा ते बन्ने विद्याधरोए ते राजपुत्र सनत्कुमारनो त्यां विद्याधरोना चक्रिपणानो राज्याभिषेक कर्यो. ॥ ३४ ॥

सनत्कुमारसाम्राज्यप्रेक्षाप्राज्यप्रमोदभाक् । पथिका पथि कान्तस्य जाता भानुमती ततः ॥ ३५ ॥

अन्वयः—ततः सनत्कुमार साम्राज्य प्रेक्षा प्राज्य प्रमोदभाक् भानुमती कांतस्य पथि पथिका जाता. ॥ ३५ ॥

अर्थः—पछी सनत्कुमारनी खेचराधीशनी पदवी जोवाथी घणी खुशी थयेली भानुमती (पण) पोताना स्वामिना मार्गे चालती थइ, ( अर्थात् तापसणी थइ ) ३५ ॥

स्वल्पैरपि दिनैस्तस्य चक्रिणः खेचरेश्वराः । निग्रहानुग्रहारम्भैरवश्यं वश्यतां गताः ॥ ३६ ॥

अन्वयः—तस्य खेचर चक्रिणः स्वल्पैः अपि दिनैः खेचर ईश्वराः निग्रह अनुग्रह आरंभैः वश्यतां गताः ॥ ३६ ॥

अर्थः—ते खेचराधीश सनत्कुमारने थोडाज दिवसोमां विद्याधरोना (सर्व) राजाओ, दंड तथा सामनीतिना दबाणथी वश थइ गया. ॥ ३६ ॥

पितृपादवियोगार्तिः खेचरालिवृतोऽथ सः । समं शृङ्गारसुन्दर्या प्रतस्थे स्वपुरं प्रति ॥ ३७ ॥

अन्वयः—अथ पितृ पाद वियोग अर्तिः, सः खचर आलि वृतः शृंगारसुंदर्या समं स्वपुरं प्रति प्रतस्थे. ॥ ३७ ॥

अर्थः—पछी (पोताना) मातापिताना चरणोना वियोगनी पीडावाळो, ते सनत्कुमार, खेचरोनी श्रेणिथी वींटायो थको शृंगारसुंदरीसहित पोताना नगर प्रते जवा लाग्यो. ॥ ३७ ॥

पुर्याः पर्यन्तमायाति स यावत्तावदैक्षत । धूमस्तोमं ससंरम्भो नभस्यम्भोदविभ्रमम् ॥ ३८ ॥

अन्वयः—सः ससंरंभः यावत् पुर्याः पर्यंतं आयाति, तावत् नभसि अंभोद विभ्रमं धूम स्तोमं ऐक्षत. ॥ ३८ ॥

अर्थः—ते सनत्कुमार उतावळथी जेटलामां (पोताना) नगरनी नजीक आवेछे, तेटलामां आकाशमां मेघसरखो धूमाडानो समूह तेणे जोयो. ॥ ३८ ॥

किमेतदिति चिन्तार्तः सोऽवनौ नयनं नयन् । पुरोसरित्तटेऽपश्यदसंख्यं दुःखिनं जनम् ॥ ३९ ॥

अन्वयः—एतत् किं? इति चिंता आर्तः सः अवनौ नयनं नयन् पुरी सरित् तटे असंख्यं दुःखिनं जनं अपश्यत्. ॥ ३९ ॥

अर्थः—आ ते शुं हशे? एम चितातुर थयेला ते सनत्कुमारे पृथ्वीपर नजर करतां नगरना नदीकिनारे असंख्याता दुःखी लोकोने जोया. ॥ ३९ ॥

तन्मध्ये चानलज्वालामालाभिर्निचितां चिताम् । लोकयन्नाकुलस्वांतो विमानादुत्ततार सः ॥ ४० ॥

अन्वयः—च तन्मध्ये अनल ज्वाला मालाभिः निचितां चितां लोकयन् आकुल स्वांतः सः विमानात् उत्ततार. ॥ ४० ॥

अर्थः—वळी तेनी अंदर अग्निनी ज्वालानी श्रेणिओथी भरेली चिताने जोवाथी व्याकुल हृदयवाळो ते सनत्कुमार विमानमांथी ( नीचे ) उतर्यो. ॥ ४० ॥

**सोत्कर्षतुमुलैः सैष प्रेक्ष्यमाणः प्रजाकुलैः । चितोपान्तजुषो मातुः पाद्योरातुरोऽपतत् ॥ ४१ ॥**

अन्वयः—सोत्कर्ष तुमुलैः प्रजाकुलैः प्रेक्ष्यमाणः सः एषः आतुरः चिता उपांतजुषः मातुः पादयोः अपतत्. ॥ ४१ ॥

अर्थः—अति कोलाहल करता, एवा प्रजाना समूहोथी जोवातो ते आ सनत्कुमार उत्सुक थयोथको चितापासे उभेली (पोतानी) माताना चरणोमां पड्यो. ॥ ४१ ॥

**इयन्तं समयं वत्स क स्थितोऽसीति वत्सला । सूनोः कण्ठे लगित्वासौ रुदत्परिजनारुदत् ॥ ४२ ॥**

अन्वयः—(हे) वत्स ! इयंतं समयं क्व स्थितः असि ? इति वत्सला असौ रुदत्परिजना सूनोः कंठे लगित्वा अरुदत्. ॥४२॥

अर्थः—हे वत्स! आटलो वखत (तुं) क्यां रह्यो हतो ? एम (कहेती) ते हेताळ माता परिवारने (पण) रडावतीथकी पुत्रने कंठे वळगीने रडवा लागी. ॥ ४२ ॥

**मातः श्रीतातपादेभ्यः क्षेम इत्यस्य पृच्छतः । ज्ञातपुत्रागतिस्तत्राययौ भूपः पुरः पुरात् ॥ ४३ ॥**

अन्वयः—हे मातः! श्रीतातपादेभ्यःक्षेम? इति अस्य पृच्छतः, ज्ञात पुत्र आगतिः भूपः पुरात् तत्र पुरः आययौ. ॥ ४३ ॥

अर्थः—हे माताजी ! ( म्हारा ) पिताजीने तो कुशल छेने ? एम ते पूछतो हतो (तेवामां) पुत्रनुं आगमन जाणीने राजा (पण) नगरमांथी त्यां सामे आव्यो. ॥ ४३ ॥

पतन्तमेव पादाग्रे तमुत्सुकतमो नृपः । आलिलिङ्ग मुहुर्दोर्भ्यां मुहुर्मूर्ध्नि चुचुम्ब च ॥ ४४ ॥

अन्वयः-पादाग्रे पतंतं एव तं उत्सुकतमः नृपः मुहुः दोर्भ्यां आलिलिंग, च मुहुः मूर्ध्नि चुचुंब. ॥ ४४ ॥

अर्थः—पगे पडतांवेंतज ते पुत्रने अति उत्कंठित थयेला राजाए वारंवार बन्ने हाथवडे आलिंगन दीधुं, तथा वारंवार मस्तकपर चुंबन कर्युं. ॥ ४४ ॥

कथं चितेति पुत्रस्य शङ्कातङ्कस्य पृच्छतः । जगाद जगतीजानिर्वत्स किं वेत्सि दूरगः ॥ ४५ ॥

अन्वयः-चिता कथं ? इति शंकातंकस्य पृच्छतः पुत्रस्य जगती जानिः जगाद, (हे) वत्स ! दूरगः किं वेत्सि ? ॥ ४५ ॥

अर्थः—( आ ) चिता शामाटे छे ? एम शंकाथी भयभीत थइने पूछता एवा ते पुत्रने राजाए कह्युं के. हे वत्स ! तुं दूर रहेलो शुं जाणी शके ? ॥ ४५ ॥

तदा त्वयोज्झिता पुत्र चित्रशाला शुचेऽभवत् । विमुक्ता जीवितव्येन स्वजनस्य तनूरिव ॥ ४६ ॥

अन्वयः-( हे ) पुत्र ! तदा त्वया उज्झिता चित्रशाला, जीवितव्येन मुक्ता स्वजनस्य तनूः इव शुचे अभवत्. ॥ ४६ ॥

अर्थः—हे पुत्र ! ते वखते तें तजेली चित्रशाला जीवरहित थयेलां स्वजनना शरीरनीपेठे (अमोने) शोककारक थइ पडी. ॥४६॥

पुरं पुरन्दरावाससदृशं सुदृशां पदम् । यमवेश्मेव भूतानामास्पदं तद्भूत्तदा ॥ ४७ ॥

अन्वयः—तदा पुरंदर आवास सदृशं सुदृशां पदं तत् पुरं यमवेश्म इव भूतानां आस्पदं अभूत्. ॥ ४७ ॥

अर्थः—(वळी) ते वखते इंद्रना आवाससरखुं, तथा सज्जनोना स्थानसरखुं ते नगर (पण) यमना घरनीपेठे भूतोना रहेठाणसरखुं थइ पडयुं. ॥ ४७ ॥

अमन्दाक्रन्दसंदर्भे दूरं पौरजने तदा । शुचेव प्रतिशब्देन चक्रन्दे मन्दिरैरपि ॥ ४८ ॥

अन्वयः—तदा अमंद आक्रंद संदर्भे पौरजने दूरं, शुचा इव प्रतिशब्देन मंदिरैः अपि चक्रंदे. ॥ ४८ ॥

अर्थः—ते वखते अत्यंत विलाप करता, एवा नगरना लोको तो दूर रह्या, (परंतु) जाणे शोकने लीधे (ते विलापोना) प्रतिध्वनिथी मंदिरो पण विलाप करवा लाग्यां. ॥ ४८ ॥

कृत्याकृत्याद्यजानन्तो वत्स त्वत्संगमं विना । हा जीवन्तोऽप्यजीवन्त इव जाता वयं तदा ॥ ४९ ॥

अन्वयः—(हे) वत्स ! त्वत्संगमं विना कृत्य अकृत्य आदि अजानंतः वयं तदा हा ! जीवंतः अपि अजीवंतः इव जाताः. ।४९।

अर्थः—हे वत्स ! तारी हाजरीविना कृत्य अकृत्य आदिकना संबंधमां (पण) बेभान थयेला अमो ते वखते अरेरे ! जीवतां छतां पण मरण पामेला जेवा थइ गया. ॥ ४९ ॥

रम्यरामारमाराममधामकामकलादयः । अकृतार्थाः पदार्थास्ते तदासन्विषसोदराः ॥ ५० ॥

अन्वयः-रम्य रामा रमा आराम धाम काम कला आदयः ते अकृतार्थाः पदार्थाः तदा विष सोदराः आसन्. ॥ ५० ॥

अर्थः-मनोहर स्त्रीओ, लक्ष्मी, बगीचा, मेहेलो, तथा कामक्रीडा आदिक ते उपभोगविनाना ( सर्वे ) पदार्थो ते समये विष समान थइ पड्या. ॥ ५० ॥

त्वद्वियोगाग्निकीलार्ता धर्तुं जीवितमक्षमा । अजनिष्ट परित्यक्तभोजना जननी तव ॥ ५१ ॥

अन्वयः-त्वद्वियोग अग्नि कीला आर्ता जीवितं धर्तुं अक्षमा तव जननी परित्यक्त भोजना अजनिष्ट. ॥ ५१ ॥

अर्थः—( वळी ) तारा वियोगरूपी अग्निनी ज्वालाथी पीडित थयेली, अने तेथी जीवन धारण करवाने असमर्थ बनेली तारी माताए भोजननो ( पण ) त्याग कर्यो. ॥ ५१ ॥

कुलालंकारभूतस्य तवादर्शनदुःस्थिता । कुलाधिदेवतामेव सेवमानाग्रतः स्थिता ॥ ५२ ॥

अन्वयः—कुल अलंकारभूतस्य तव अदर्शन दुःस्थिता, कुल अधिदेवतां एव सेवमाना अग्रतः स्थिता. ॥ ५२ ॥

अर्थः—कुलना आभूषणरूप एवा तने नही जोवाथी दुःखी थएली ( ते तारी माता ) कुलदेवीनीज सेवा करती थकी तेनी पासेज बेसवा लागी. ॥ ५२ ॥

तपसः साष्टमस्यान्ते नितान्तं भक्तिनिर्भरा । आदिश्यत स्वयं स्वप्ने कुलदेवतया तया ॥ ५३ ॥

अन्वयः—अष्टमस्य तपसः अंते नितांतं भक्ति निर्भरा सा तया कुलदेवतया स्वयं स्वप्ने आदिश्यत ॥ ५३ ॥
अर्थः—अठ्ठमना तपने अंते अति भक्तिवंत एवी ते तारी माताने ते कुलदेवीए पोते स्वप्नमां कह्युं के, ॥ ५३ ॥

लब्धविद्याधरैश्वर्यः शीलवर्यः प्रियायुतः । स ते सति सुतः सत्यं मासस्यान्ते मिलिष्यति ॥ ५४ ॥

अन्वयः—(हे) सति! लब्ध विद्याधर ऐश्वर्यः, शील वर्यः, प्रिया युतः सः ते सुतः सत्यं मासस्य अंते मिलिष्यति. ॥५४॥
अर्थः—हे सती! विद्याधरनी समृद्धिने प्राप्त थयेलो, शीलव्रत पालवाथी मनोहर, अने स्त्रीथी युक्त थयेलो ते तारो पुत्र खरेखर एक मासने अंते तने मळशे. ॥ ५४ ॥

तत्ताद्दशसुतासङ्गसमुत्सुकतमानिमान् । प्राणान्धारयितुं वत्से विधत्से किं न भोजनम् ॥ ५५ ॥

अन्वयः—तत् (हे) वत्से! ताद्दश सुत असंग समुत्सुकतमान् इमान् प्राणान् धारयितुं भोजनं किं न विधत्से ? ॥ ५५ ॥
अर्थः—माटे हे पुत्री ! तेवा पुत्रना विरहथी अति उत्कंठित थयेला आ प्राणोने टकावी राखवा माटे तुं भोजन केम करती नथी ?

इयं स्वप्नमिति प्रातर्निवेदितवती मया । कथंचिदुपरोधेन प्रतिबोधेन भोजिता ॥ ६ ॥

अन्वयः—प्रातः इति स्वप्नं निवेदितवती इयं मया कथंचित् उपरोधेन प्रतिबोधेन भोजिता. ॥ ५६ ॥
अर्थः—प्रभाते एरीतनुं स्वप्न प्रगट करती एवी आ (तारी माताने) में केटलीक मुश्केलीथी समजावीने भोजन कराव्युं. ॥ ५६ ॥

**मासस्यान्तदिनं प्रातरद्य प्राप्य महाग्रहा । मयात्यर्थं निषिद्धापि मर्तुमेषा चितां व्यधात् ॥ ५७ ॥**

अन्वयः—अद्य प्रातः मासस्य अंत दिनं प्राप्य मया अत्यर्थं निषिद्धा अपि महाग्रहा एषा चितां व्यधात्. ॥ ५७ ॥
अर्थः—आजे प्रभातमां ( ते ) मासनो छेल्लो दिवस आवी पहोंचवाथी में अत्यंत निवार्या छतां पण तेणीए घणोज आग्रह करीने ( आ ) चिता खडकावी. ॥ ५७ ॥

**गाः सत्यापयितुं देव्याः स्पृहां पूरयितुं मम । अस्याश्च रक्षितुं प्राणाञ्जातस्तात तवागमः ॥ ५८ ॥**

अन्वयः—देव्याः गाः सत्यापयितुं, मम स्पृहां पूरयितुं च अस्याः प्राणान् रक्षितुं (हे) तात! तव आगमः जातः. ॥ ५८ ॥
अर्थः—( एवामां ) कुलदेवीनुं वचन सत्य करवामाटे, मारी इच्छा पूर्ण करवामाटे, तथा आ तारी माताना प्राण बचाववामाटे तारुं आगमन थयुं. ॥ ५८ ॥

**अधुना विधुना तुल्यं वदनं सदनं श्रियः । पौरचक्षुश्चकोराणां स्वं दर्शय महाशय ॥ ५९ ॥**

अन्वयः—( हे ) महाशय! अधुना श्रियः सदनं, विधुना तुल्यं स्वं वदनं पौर चक्षुः चकोराणां दर्शय? ॥ ५९ ॥
अर्थः—( माटे ) हे गंभीर हृदयवाळा! हवे लक्ष्मीना निवाससरखुं, अने चंद्रतुल्य तारुं मुख नागरिकोना नेत्रोरूपी चकोरपक्षिओने बताव? ॥ ५९ ॥

अथ पुत्रावृतोत्सङ्गः पट्टमातङ्गसंगतः । पट्टदेव्या सस्नुषया वशावाहनयान्वितः ॥ ६० ॥
चारुपार्श्वद्वयश्चन्द्ररत्नचूडादिखेचरैः । अमन्दैर्बन्दिनां वृन्दैर्वर्ण्यपुण्यमहोदयः ॥ ६१ ॥
प्राविशत्परमानन्दसुधापूरपरिप्लुतम् । भूजानिः स्वजनैः साकमुत्पताकमसौ पुरम् ॥ ६२ ॥

अन्वयः—अथ पुत्र आवृत उत्संगः, पट्ट मातंग संगतः, वशा वाहनया सस्नुषया पट्टदेव्या अन्वितः, ॥ ६० ॥ चंद्र रत्नचूडादि खेचरैः चारु पार्श्व द्वयः, बंदिनां अमंदैः वृंदैः वर्ण्य पुण्य महोदयः ॥ ६१ ॥ असौ भूजानिः परम आनंद सुधा पूर परिप्लुतं, उत्पताकं पुरं स्वजनैः साकं प्राविशत्. ॥ ६२ ॥ त्रिभिर्विशेषकं ॥

अर्थः—पछी पुत्रथी ढंकायेला उत्संगवाळो, पट्टहस्तिपर बेठेलो, हाथणीपर बेठेली पुत्रवधूसहित पट्टराणीथी युक्त थयेलो, ॥६०॥ चंद्रचूड तथा रत्नचूडआदिक विद्याधरोवडे मनोहर पार्श्वोवाळो, बंदिओना वाचाल समूहोवडे वर्णवाता पुण्यना महान् उदयवाळो, ॥ ६१ ॥ एवा आ राजाए, अति हर्षरूपी अमृतना प्रवाहथी उभराइ निकळेलां, तथा उंचे उडती धजाओवाळां ते नगरमां स्वजनोनी साथे प्रवेश कर्यो. ॥ ६२ ॥ त्रिभिर्विशेषकं ॥

अस्मिन्नेव क्षणे क्ष्मापः क्षणदायिनि दक्षिणः । अभिषिच्याङ्गजं राज्ये सभार्योऽगात्तपोवनम् ॥ ६३ ॥

अन्वयः—क्षण दायिनि अस्मिन् एव क्षणे दक्षिणः क्ष्मापः राज्ये अंगजं अभिषिच्य सभार्यः तपोवनं अगात्.

अर्थः—महोत्सव दायक एवा तेज समये ते विचक्षण राजा राज्यपर ते सनत्कुमारपुत्रनो अभिषेक करीने राणीसहित तपोवनमां गयो. ॥ ६३ ॥

अवाप्य पैत्रिकं राज्यं मुदितो मित्रयोरयम् । विद्याधरपुरश्रेणिद्वयं खेचरयोर्ददौ ॥ ६४ ॥

अन्वयः-पैत्रिकं राज्यं अवाप्य मुदितः अयं मित्रयोः खेचरयोः विद्याधर पुर श्रेणि द्वयं ददौ ॥ ६४ ॥

अर्थः—(एरीते) पितानुं राज्य मेळवीने खुशी थयेला ते सनत्कुमारे (पोताना) मित्र एवा ते बन्ने खेचरोने विद्याधरोना नगरोनी बन्ने श्रेणिओ आपी दीधी. ॥ ६४ ॥

ततो विद्यावशेनायं वशीकृतमहीतलः । यशोभिः शोभयामास भासुरैर्भुवनत्रयम् ॥ ६५ ॥

अन्वयः-ततः विद्यावशेन वशीकृत महीतलः अयं भासुरैः यशोभिः भुवनत्रयं शोभयामास. ॥ ६५ ॥

अर्थः-पछी विद्याओना प्रभावथी वश करेल छे पृथ्वीपीठ जेणे, एवा ते सनत्कुमारे ( पोताना ) तेजस्वी यशवडे त्रणे जगतने शोभाव्यां. ॥ ६५ ॥

सलीलशीलमाधुर्ये धर्मधुर्येऽत्र भूभुजि । जज्ञे धर्ममयं शश्वद्विश्वं विश्वम्भरातलम् ॥ ६६ ॥

अन्वयः-सलील शील माधुर्ये धर्मधुर्ये अत्र भूभुजि विश्वं विश्वम्भरा तलं शश्वत् धर्ममयं जज्ञे. ॥ ६६ ॥

अर्थः–सरल शीलव्रतनी मीठाशवाळा, तथा धर्मकार्योमां अग्रेसर एवा आ सनत्कुमारना राजअमल दरम्यान समस्त पृथ्वीतल हमेशां धर्ममयज थइ गयुं. ॥ ६६ ॥

शृङ्गारसुन्दरीजानिं शीलादुन्मीलितोदयम् । भूचरैः खेचरैः सेव्यं पश्यन्कोऽभून्न शीलभाक् ॥६७॥

अन्वयः—शीलात् उन्मीलित उदयं, भूचरैः खेचरैः सेव्यं शृंगारसुंदरी जानिं पश्यन् कः शीलभाक् न अभूत् ॥६७॥

अर्थः—शीलना प्रभावथी थयेल छे उदय जेनो एवा, तथा मनुष्यो अने विद्याधरोने सेववालायक, एवा शृंगारसुंदरीना स्वामी सनत्कुमारने जोइने कयो माणस शीलव्रतने भजनारो न थयो? ॥ ६७ ॥

इत्थं पृथ्वीश्रियं भुक्त्वा जन्मान्तेऽनशनोत्तमः । सभार्यः स ययौ राजा विमानेऽनुत्तरेऽजिते ॥ ६८ ॥

अन्वयः—इत्थं पृथ्वीश्रियं भुक्त्वा जन्मांते अनशन उत्तमः सः राजा सभार्यः अजिते अनुत्तरे विमाने ययौ. ॥ ६८ ॥

अर्थः—एवीरीते पृथ्वीनी समृद्धिने भोगवीने जीवीतने अंते अनशनथी उत्तम थयेलो ते राजा शृंगारसुंदरी सहित अनुपम अनुत्तर विमानमां गयो. ॥ ६८ ॥

शीलमूले गुणस्तम्बे राज्यपत्रे यशःसुमे । धर्मकल्पद्रुमे सैष लब्धा शिवफलं क्रमात् ॥ ६९ ॥

अन्वयः—शील मूले, गुण स्तंबे राज्य पत्रे, यशः सुमे, धर्म कल्पद्रुमे सः एषः क्रमात् शिव फलं लब्धा. ॥ ६९ ॥

अर्थः—शीलरूपी मूलवाळां, गुणोरूपी थडवाळां, राज्यरूपी पत्रोवाळां, अने यशरूपी पुष्पोवाळां, एवां धर्मरूपी कल्पवृक्षमांथी ते आ सनत्कुमार राजा अनुक्रमे मोक्षरूपी फलने पामशे. ॥ ६९ ॥

**सनत्कुमारशृङ्गारसुन्दरीचरितश्रुतेः । नव्याद्भुतश्रिये भव्याः सेव्यतां शीलमुज्ज्वलम् ॥ ७० ॥**

**॥ इति शीलधर्मे सनत्कुमारशृङ्गारसुन्दरीकथा ॥**

अन्वयः—(हे) भव्याः! सनत्कुमार शृंगारसुंदरी चरित श्रुतेः नव्य अद्भुत श्रिये उज्ज्वलं शीलं सेव्यतां? ॥ ७० ॥

अर्थः—हे भव्यलोको! (आ) सनत्कुमार तथा शृंगारसुंदरीनुं चरित्र सांभळीने नवी अने आश्चर्यकारक, एवी मोक्षलक्ष्मी मेळववामाटे (तमो) निर्मल शीलने सेवो? ॥ ७० ॥

इति शीलमाहात्म्योपदर्शने सनत्कुमारशृंगारसुंदरी चरित्रं समाप्तं ॥ श्रीरस्तु ॥

**आ ग्रंथनो अन्वय तथा तेनुं गुजराती भाषांतर जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे रचीने स्वपरना श्रेय माटे ते ग्रंथ पोताना श्री जैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे. श्री रस्तु.।**

**॥ समाप्तोऽयं श्रीवासुपूज्यचरित्रस्य सान्वयो गूर्जरभाषांतरोपेतश्च तृतीयो भागः ॥**

**गुरुश्रीमच्चारित्रविजय सुप्रसादात्. ॥ श्री रस्तु. ॥**

॥ इति श्रीवासुपूज्यचरित्रे तृतीयो भागः समाप्तः ॥